संस्कृतशिक्षणम्-नवीनप्रविधयश्च

Teaching Sanskrit with New Techniques



डॉ. च.ल.ना. शर्मा
डॉ. फतेहसिंहः

संस्कृतशिक्षणम्-नवीनप्रविधयश्च

Teaching Sanskrit with New Techniques

लेखकौ

प्रो. च.ल.ना. शर्मा

साहित्य-व्याकरणविद्याप्रवीणः

एम.ए. (संस्कृतम्), एम.एड.,पीएच.डी.

अध्यक्षः-प्रशिक्षणविभागः

डॉ. फतेहसिंहः

एम.ए. (संस्कृतम्), एम.एड.,पीएच.डी. (शिक्षा)

प्रवाचकः-प्रशिक्षणविभागः

राष्ट्रियसंस्कृतसंस्थानम् (मानित-विश्वविद्यालयः)

जयपुरपरिसरः, त्रिवेणीनगरम्, जयपुरम्

राजस्थानप्रदेशः-302018

प्रकाशकः

आदित्यप्रकाशनम्, जयपुरम्

Forwarded free of cost with the compliments of Rashtriya Sanskrit Sansthan, New Delhi

Published by :
Smt. KUSUM LATA
ADITYA PRAKASHANAM
105-C
SURYA NAGAR,
GOPAL PURA BYE PASS,
JAIPUR-302015 (Rajasthan)

First Edition : 1996
Second Edition : 2008

PRICE – Rs. 300

Type Setters
S.K. COMPUTERS, JAIPUR

Printed by
SHEETAL PRINTERS, JAIPUR

प्रो॰ रामानुजदेवनाथः
प्राचार्यः
राष्ट्रिय-संस्कृत-संस्थानम्
(मानितविश्वविद्यालयः)
गुरुवायूर् परिसरः, पुरनाट्टुकरा,
त्रिचूर, केरलप्रदेशः

Prof. Ramanuja Devanathan
Principal
Rashtriya Sanskrit Sansthan,
(Deemed University)
Guruvayoor Campus,
Puranattukara, Trichur
Kerala.

भद्रं शृणुयाम

तद्धि तपस्तद्धि तप इति श्रुतिः स्वाध्यायप्रवचने विधत्ते। अद्वापरस्स्वाध्याये परङ्किं हि प्रवचनम्? तत्सन्धानमिति श्रूयते। अदः प्रवचनमाश्रयते शिक्षाशास्त्रमर्वाचीनं स विषयः प्रधानम्। सम्बन्धाधिकारिणा आचार्यश्रुत्याऽभ्यधायिषाताम्। तद्यथाप्रकरणन्दृश्येत बहुधा। तदनुपलब्धावयत्नानध्ययन एव हेतू, न पुनरविद्यमानता। प्राप्येत सूत्रन्तदनु विवृतिरस्मदायत्ता। ईदृक्पद्धतिराश्रिता यतश्शास्त्राण्यक्षुण्णं वरीवृतत्यद्यापि। यथाप्रकरणं प्रवचनश्रुतिमूलं आगमो दृश्येत एव - श्रद्धत्स्वादिः। तन्मूलानि प्रथन्ते च शास्त्राणि, तत्तत्स्वरूपानुकूलानि व्याख्यादीनि च शासति। नैको विधिर्वा प्रविधिस्सर्वस्य, न वा एक एवैकस्येति नियमः, न तथा तादृक्साधीयांश्च। प्रकृतिर्भिन्ना, तत्परकृतिश्च भिन्नैव स्यात्। तद्धि निदानं पञ्चतायामधिकरणस्य, षडङ्गतायां व्याख्यायास्तदादेशच। अतो नास्तीत्यनुक्त्वोपलब्धौ यत्नो विधानीय एव। विरलान्येव तानीत्यकृतायासस्य वचो, न परं दृष्टाक्षरस्य वा बहुश्रुतस्य।

धीगुणास्तु मानवसामान्या इति तादृक्चिन्तनमपि सार्वभौमिकं बहुधा प्रावर्तत। तत्फलञ्च यथा- जागतिकं तत्त्वं जीवितसम्बन्धान् आश्रित्य विद्यते, न पुनर्ज्ञानञ्ज्ञानायैव, नान्तरा धर्मं नैतिकतेति बभाण साक्रटिस्-वर्यः। प्लाटो-वर्य इन्द्रियजम्, आन्तरं, निरालम्बप्रकाशमिति त्रेधोक्त्वा तदनु तदुपलब्धिप्रकारान्निर्दिदेश। अरिस्टाटिल्वर्यस्तु किमधीनं शिक्षणमिति विचार्य प्रभुतैव तत्र नियामकं निश्चित्य तन्मूलान्प्रकारान्विचचार। कोमिनियस्वर्यस्य कृतिः, दि ग्रेट् डैडाक्टिक् अश्रुतिमूलापि श्रुतमेव विविनक्ति स्फुटतरमिति न पुनर्वक्तव्यम्। किमुत वचनीयं लाक्के-वर्यस्य तबुलरसविषये किं वा तदनु प्रवर्तितबोधनप्रकारविषये। जीन् जाक्स् रूसो-वर्यस्य

प्रातिभे नान्यत्किञ्चनापेक्ष्यते प्रमाणं तत्कृतिं एमिलिमन्तरा। अन्स्चाउङ्-सिद्धान्तस्त्वेक एव बंहिष्ठं ब्रवीति पेस्तालाजी-वर्यस्य मनोविद्यामूलशिक्षणविषये। जोहन् फ्रीड्रिक् हेर्बर्ट् तु प्रसिद्ध एव शिक्षणपदानां विषये। ग्रहण-प्रतिक्रिय इत्युक्त्वा, स्पष्टता-साहचर्य-प्रयोगरूपेण ग्रहणं विभज्य चत्वार्याह। तदीयाश्च स्पष्टतां सन्नाह-प्रस्तुतिभ्यां विश्लिष्य पञ्चधा प्राहुः। महती चेयं परम्परा। नान्तं गच्छेत्प्रयासबाहुल्यात्सततप्रयासाच्च। न विस्मरणीयमेतत्सर्वं तत्तद्देशे तदनुकूल-विषयपक्षधरमिति। परं विस्मृतमत्रास्माभिरिति स्वभावः। अन्धविषयं बधिरविषये, काणविषयं खञ्जविषये च प्रयुञ्ज्महे हन्त! गतानुगतिकता न सर्वत्र न वा सर्वविषया।

शास्त्रशिक्षणं विषयप्रधानं, संस्कृतशिक्षणं भाषाप्रधानम्। तदिदन्निदानमनुकरणस्य, न तत्सर्वदा दुष्यति। तथा च परिपुष्टमिदं शास्त्रं संस्कृतशिक्षणं बहुभिर्ग्रन्थैः। बोकील्-आप्टे-रघुनाथादीनां ग्रन्था अत्र क्षेत्रेऽग्रगण्या राजन्ते। सरणिरियं समृद्धाऽभवदग्रिमप्रयासैः। तत्रायं क्रमे सर्वोपादेयो ग्रन्थो राराष्टि प्रकृतः। प्राङ्मुद्रितस्सर्वैराद्रियत, विशिष्य नवच्छात्राणामानुकूल्याय एष आसीदित्यत्रास्य लोकप्रियतैव प्रमाणम्। सम्प्रति ग्रन्थस्यास्य विशिष्टं संस्करणं परिष्कृतं संवृद्धं च व्यधायीति कृतिनौ सुतरां प्रशंसाभाजौ। अत्र संस्कृतशिक्षणस्य सिद्धान्ताः, पद्धतयः, वाचनादिविविधशिक्षणप्रकाराः, पद्यादिशिक्षणोपाया इति परामृष्टा विषयाः, सूक्ष्मशिक्षणाभिक्रमितादिनूत्नविषयाश्च भृशं व्यचारिषतेत्यस्ति वैशिष्ट्यङ्ग्रन्थस्य। नूनमेवैष ग्रन्थस्सर्वैराद्रियेत।

व्याकरणादिशास्त्रेषु कृतश्रमाः, अधिगतयशसः, शान्ताः, पाठनपटिष्ठाः, अस्मादृशानां प्रेरणादाः, **आचार्याः चल्ला लक्ष्मीनारायण शर्माणः** तथा अस्मन्मित्रवर्याः शिक्षाशास्त्रादिषु निपुणाः सफलाध्यापकाः, ग्रन्थलेखने सिद्धहस्ताः, शिक्षामनोविज्ञानादिग्रन्थैः छात्रेषु प्रशिक्षणक्षेत्रे च प्रसिद्धा **डा. फतेहसिंहवर्याः** सम्भूय ग्रन्थरत्नमिदं व्यरचयन्। ते च साधुवादार्हाः, संस्कृतशिक्षाजगच्च नितरामुपकृतमिति नातिशयोक्तिः। उत्तरोत्तरमेते एतादृशग्रन्थान् विलिख्य उपकृषीरन्निति अशेषविघ्नशमनमनीकेश्वरं प्रार्थयामहे।

सर्वधारि-मेष-शुक्ल-श्रीरामनवमी
(14-04-2008)

इत्थं विदां वचनकरः,
रामानुजदेवनाथः

प्रो. पि. एन्. शास्त्री
अध्यक्षः, शिक्षाशास्त्रविभागः
राष्ट्रिय-संस्कृत-संस्थानम्
(भारतसर्वकारस्य मानव-संसाधन-
विकास-मन्त्रालयस्य तत्त्वावधाने)

भोपालपरिसरः
ई-७/६२ अरेरा कालनि
बांक सोसाइटि,
मध्यप्रदेशः ४६२ ०१६
द्-०७५५-२४२१८७७
ज- ०९८३४८२९६८

शुभाशंसा

शिष्टा क्रिया कस्यचिदात्मसंस्था
सङ्क्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव॥

शिक्षा-जीवनयोरस्ति कश्चन अभेदसम्बन्धः। शिक्षणं विना मानवजीवनं निरर्थकं प्रतिभाति। शिक्षा यथा शास्त्रं तथा विशिष्टा कला चेति मन्वते शिक्षाविदः। प्रतिक्षणं मानवं परिष्कुर्वती शिक्षणकला शिक्षयितुः कौशलमवलम्बते। तादृशं कौशलं प्रशिक्षणेन पूर्णतां याति। तदर्थं स्वानुभवसम्पन्नाः ग्रन्थाः भृशमावश्यकाः वर्तन्ते।

''संस्कृतशिक्षणम्-नवीनप्रविधयश्च'' इत्याख्यं पुस्तकं संस्कृतशिक्षकाणां कृते महदुपकारकं भवतीत्यत्र नास्ति संशयः। अत्र ग्रन्थे चतुर्विंशतौ-अध्यायेषु विषयाः यथोचितं निरूपिताः सन्ति। संस्कृतशिक्षणस्य प्रधानविषयाः, प्रविधयश्च सोदाहरणं प्रदर्शिताः। यथा- संस्कृतभाषायाः ऐतिहासिकी पृष्ठभूमिः, संस्कृतस्य महत्त्वम्, पाठ्यक्रमे संस्कृतस्य स्थानम्, संस्कृतशिक्षणस्य उद्देश्यानि, सामान्यसिद्धान्ताः, संस्कृतशिक्षणपद्धतयः, उच्चारणशिक्षणम्, वाचनशिक्षणम्, लेखनशिक्षणम्, गद्यशिक्षणम्, काव्यशिक्षणम्, व्याकरणशिक्षणम्, नाटकशिक्षणम्, रचनाशिक्षणम्, कथाशिक्षणम्, अनुवादशिक्षणम्, दृश्यश्रव्यसाधनानि, पाठ्यपुस्तकम्, मूल्याङ्कनम्, पाठयोजना, सूक्ष्मशिक्षणम्, शिक्षणकौशलानि, अभिक्रमितानुदेशनम्, भाषाप्रयोगशाला।

संस्कृतशिक्षणस्य प्रधानबिन्दून् अधिगन्तुं सोऽयं ग्रन्थः पर्याप्तो वर्तते। 'संस्कृतशिक्षणम्' इति नाम्ना दशवर्षेभ्यः पूर्वं प्रकाशितग्रन्थापेक्षया पर्याप्तविषयाः समाहिताः सन्ति। 'रचनाशिक्षणं, कथाशिक्षणम् अनुवादशिक्षणम्' इति त्रयः विषयाः अत्र समाहिताः। एवं सूक्ष्मशिक्षणं,शिक्षणकौशलानि, अभिक्रमितानुदेशनं, भाषाप्रयोगशाला चेति चत्वारः नवीनविषयाः समाविष्टाः। स्वरचितपूर्वग्रन्थापेक्षया उपबृंहितोऽयं ग्रन्थः, संस्कृताध्येतृणां, शिक्षकाणाञ्च कृते भृशमुपकाराय कल्पते। स्वानुभवाधारेण अन्यूनानतिरिक्तरूपेण समुपस्थापिताः सुचर्चिताः विषयाः ग्रन्थकर्त्रीः कौशलं द्योतयति। इतः परमपि निरन्तरं संस्कृतशिक्षोपकारकाः ग्रन्थाः मन्मित्रसकाशात् प्रकाश्यन्ताम् इत्याशास्ते।

सहृदयसुहृद्वशः

प. ना. शास्त्री

आमुखम्

प्रथमसंस्करणस्य आमुखम्-

भारते संस्कृतशिक्षणे अस्मिन् शतके अनेकानि परिवर्तनान्यभवन्। संस्कृतशिक्षणं सरलं रोचकञ्च विधातुं, सामान्यजनेषु संस्कृतं प्रचारयितुं संस्कृतपण्डितैः शिक्षाविद्भिः महान् प्रयासो विहितः। केचन संस्कृशिक्षकप्रशिक्षणविचक्षणाः स्वकीयान् विचारान् आङ्गलभाषायां, हिन्दीभाषायाञ्च ग्रन्थरूपेण प्राकाशयन्। परन्तु संस्कृते तादृशग्रन्थः एकोऽपि अद्यावधि न प्रकाशितः। अयमावयोः प्रथमप्रयासोऽस्यां दिशि।

प्रकाशितेषु ग्रन्थेषु प्रस्तुतानां विचाराणां सम्यगवकलनेन, शिक्षणे, प्रशिक्षणे च लब्धेन दीर्घकालिकानुभवेन च यथामति विषयाणां प्रतिपादनमत्र विहितम्। ग्रन्थोऽयं संस्कृतशिक्षकप्रशिक्षणं लभमानानां छात्राध्यापकानाम् उपयोगी भवेदिति धिया सरलया, प्रायः विसन्ध्या, नातिदीर्घसमासया संस्कृतभाषया व्यरच्यत।

संस्कृतविश्वविद्यालयेषु, विश्वविद्यालयेषु, विद्यापीठेषु, प्रशिक्षणकलालयेषु च संस्कृताध्यापकप्रशिक्षणं प्रचलति। विभिन्नेषु स्तरेषु संस्कृताध्यापनस्य उपयोगिनां समेषां विषयाणां सङ्ग्रहणेन पुस्तकमिदं संस्कृताध्यापकानां नितरामुपयोगि स्यादिति विश्वसिवः। एवं संस्कृतप्रसारनिरतानां विविधसंस्थानां प्रचारकार्यकर्तृभ्यश्च सहायकं स्यात्।

येषां पूर्वाचार्याणां ग्रन्थाः अस्य पुस्तकस्य रचनायां साह्यमाचरितवन्तः तेभ्यः सर्वेभ्यः सादरं कार्तज्ञ्यं निवेदयावः। अज्ञानात्, भ्रमात्, प्रमादाद्वा भाषायां, विचारप्रतिपादने वा ये दोषाः सम्भूताः तान् सूचयितुं सविनयं विज्ञान् प्रार्थयावः। ग्रन्थविस्तरभिया विषयाणां संक्षेपतः प्रतिपादनं कृतम्। पुनर्मुद्रणे विस्तृतरूपेण प्रतिपादनाय, नूतनविषयाणां योजनाय च प्रयतिष्यावहे।

अस्य ग्रन्थस्य निर्माणे, प्रकाशने च अनवरतं साह्यं कृतवद्भ्यः श्रीमद्भ्यः अशोकन् पुरनाट्टुकरा महोदयेभ्यः सस्नेहं निस्सीमं कार्तज्ञ्यं प्रकटयावः। मुखचित्रकारः श्रीमान् गिरीशन् महोदयः सादरमभिनन्द्यते। ग्रन्थममुं मुद्रापयित्वा, प्रकाशितवत्यै 'भारतमुद्रा प्रिण्टर्स् अण्ड् पब्लिषर्स्' संस्थायै कार्तज्ञ्यं निवेदयावः।

द्वितीयसंस्करणस्य आमुखम्-

1996 तमे वर्षे प्रकाशितं 'संस्कृतशिक्षणम्' शिक्षाशास्त्रिच्छात्राणां, शिक्षातत्त्वज्ञानां, संस्कृताध्यापकानाञ्च आदरपात्रं समजायत। एतेषामेव प्रोत्साहनेन अस्य ग्रन्थस्य द्वितीयं संस्करणं संशोधितं, परिवर्धितञ्च 'संस्कृतशिक्षणम् नवीनप्रविधयश्च' इति नाम्ना प्रकाश्यते। अत्र संयोजिताः नूतनाः विषयाः शिक्षाचार्यच्छात्रान्, शोधच्छात्रांश्च उपकरिष्यन्ति।

शुभाशंसया प्रोत्साहनं कृतवद्भ्यः सुहृद्वरेभ्यः प्रो. पि.एन्. शास्त्रिमहोदयेभ्यः, 'भद्रं शृणुयाम' इति भद्राशंसनेन उपकृतवद्भ्यः, प्रो. रामानुजदेवनाथन् महाभागेभ्यश्च कार्तज्ञ्यं निवेदयावः।

अस्य पुस्तकस्य रचनायामुपकृतवतां ग्रन्थानां लेखकेभ्यः सादरं कृतज्ञतां विज्ञापयावः।

ग्रन्थस्यास्य लेखने, टङ्कने, संयोजने, प्रकाशने च सहकृतवद्भ्यः सर्वेभ्यः, हार्दं कार्तज्ञ्यं विज्ञाप्य विरमावः।

बुधजनविधेयौ

प्रो. च.ल.ना. शर्मा

डॉ. फतेहसिंहः

अनुक्रमणिका

□□□

प्रथमोऽध्यायः

संस्कृतभाषायाः ऐतिहासिकी पृष्ठभूमिः

चिन्तनस्य, विचारविनिमयस्य च प्रबलमाध्यमरूपेण, मानवविकासस्य प्रमुखसाधनत्वेन मानवसमाजस्य निर्माणस्य, विकासस्य च निदानत्वेन च भाषायाः योगदानं विज्ञैः सम्मन्यते। मानवसभ्यतायाः, संस्कृतेश्च विकासे भाषायाः स्थानं महत्त्वपूर्णं वर्तते। अत एव भाषाया इतिहासः, मानवसभ्यताया इतिहास इति कथनं युक्तियुक्तं प्रतिभाति। कस्यापि जनस्य बौद्धिकः, मानसिकः, सामाजिकः, राजनैतिकः, सांस्कृतिकश्च विकासः तस्य भाषायाः, साहित्यस्य च समृद्धिमाश्रयति, यां सः साधनत्वेन उपयुङ्क्ते। भाषायाः शिक्षा व्यक्तित्वस्य विकासे सहायिका भवति। सा व्यक्तेः कृते दैनिकजीवने व्यावहारिककुशलतां कल्पयति। अपेक्षितं ज्ञानं ददाति कलात्मकानुभूतेः, रचनात्मकाभिव्यक्तेश्च अवसरान् कल्पयति। मानवव्यक्तित्वस्य गतिशीलता बहुशः भाषाप्रयोगे निर्भरा भवति। तथा चैतत् स्पष्टं भवति यत् शिक्षायां भाषायाः विशेषमहत्त्वमस्ति। यदि शिक्षा जीवनाय सन्नाहः, तर्हि भाषा अस्य उद्देश्यस्य पूर्तये प्रबलं साधनं भवति।

भाषायाः विभिन्नानि रूपाणि भवन्ति। यथा मातृभाषा, प्रादेशिकभाषा, राष्ट्रियभाषा, सांस्कृतिकभाषा, अन्ताराष्ट्रियभाषा इत्यादीनि। तत्र मातृभाषा सर्वाधिकप्रभावशालिनी, प्रबलतमा च, यस्याः प्रभावः व्यक्तेः मूलप्रकृतौ पालनपोषणयोश्च प्रगाढो भवति। मातृभाषायाः परं प्रादेशिकभाषायाः स्थानं भवति। ततश्च राष्ट्रियभाषायाः महत्त्वपूर्णं स्थानं भवति। देशस्य सामाजिक, वाणिज्य, प्राशासनिक राजनैतिककार्याणां, सञ्चारव्यवस्थायाश्च सम्पादनाय, देशीयतायाः, एकतायाः, अखण्डतायाश्च संरक्षणाय राष्ट्रियभाषा सम्पूर्णे देशे महत्त्वमर्हति। राष्ट्रियभाषायाः भिन्ना सर्वस्यापि देशस्य काचिदन्या भाषा भवति, यस्यां प्राचीनसंस्कृतेः भण्डारः सुरक्षितो भवति। शिक्षायामेतादृश्याः सांस्कृतिकभाषायाः उपादेयता सीमिता भवति। परन्तु अस्याः पठनं, पाठनञ्च देशस्य सांस्कृतिकप्रगतये

अत्यावश्यकं भवति। भाषाणामस्यां सूचिकायामन्तिमं स्थानम् अन्ताराष्ट्रियभाषायाः भवति। देशस्य राजनैतिक, वाणिज्य, शैक्षिक, वैज्ञानिकप्रगतये अन्ताराष्ट्रियभाषाया अध्ययनमावश्यकं भवति।

लोके प्राचीनतमा भाषा भवति संस्कृतम्। भारतीयानां विश्वासानुसारं सृष्टिकर्तुः ब्रह्मणः मुखात् वेदमयी संस्कृतवाणी निस्ससार।

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।

आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥

ऋग्वेदः न केवलं संस्कृते, किन्तु विश्वे प्राचीनतमा रचना भवति। मेक्समुल्लरस्य मतानुसारम् ऋग्वेदस्य केचन मन्त्राः क्रि. पू. 4000 वत्सरेभ्यः पूर्वं रचिताः। लोकमान्य-बालगङ्गाधरतिलकस्य मते ऋग्वेदस्य केचन भागाः क्रि.पू. 6000 वर्षेभ्यः पूर्वं रचिताः। तथा केचन पाश्चात्याः, भारतीयाश्च विद्वांसः ऋग्वेदस्य रचनाकालः क्रि.पू. 2500 इति मन्यन्ते। यद्यप्यत्र मतभेदाः सन्ति, तथापि ऋग्वेदः विश्वस्य प्राचीनतमो ग्रन्थ इत्यत्र मतभेदो नास्ति।

संस्कृतसाहित्येतिहासे वैदिकसंस्कृतसाहित्यं लौकिकसंस्कृतसाहित्यम् इति भागद्वयमुपलभ्यते। वैदिकसंस्कृतस्य स्वरूपं वेदेषु, तस्मिन् काले रचितेषु अन्येषु ग्रन्थेषु च उपलभ्यते। लौकिकसंस्कृतं प्रायः पाणिनीयव्याकरणनियमानुसारं भवति। लौकिकसंस्कृते काव्यानि, पुराणानि, धर्मशास्त्रम्, अलङ्कारशास्त्रं, कोशाः, गणितं, ज्योतिषम् इत्यादयोऽनेके विषयाः उपलभ्यन्ते। काव्यान्यपि महाकाव्यं - खण्डकाव्यं, श्रव्यकाव्यं- दृश्यकाव्यं, गद्यकाव्यं - पद्यकाव्यं - चम्पूकाव्यं, नीतिकाव्यं गीतिकाव्यम् इत्यादीनि बहुविधानि उपलभ्यन्ते।

प्राचीनकाले संस्कृतं न केवलं साहित्यिकभाषा, किन्तु साधारणजनानां व्यावहारिकी भाषाप्यासीत्। अनन्तरकाले उत्पन्नाः स्थानीयभाषाः संस्कृतभाषया, साहित्येन च अत्यन्तं प्रभाविताः अभवन्। पाणिन्यादयो महर्षयः सूत्रसाहित्यस्य प्रणयनमकुर्वन्। धर्मस्य संरक्षणेन, प्रोत्साहनेन च संस्कृतं देवभाषापदमलभत। प्राचीनशिलालेखेषु संस्कृतस्य उपलभ्यमानत्वात् अस्याः प्राचीनत्वं, राजकीयत्वं, व्यावहारिकत्वञ्च प्रमाणितं भवति।


भारोपीयभाषापरिवारे संस्कृतम्

विश्वस्य भाषापरिवारेषु भारोपीयभाषापरिवारः विशेषमहत्त्वमर्हति। अयं भाषापरिवारः अतीव प्राचीनः। प्राचीनतमाः रचनाः अत्र सन्ति। संस्कृतमस्य भाषापरिवारस्य प्रधाना भाषा भवति। यूरोपस्य ग्रीक्, लेटिन् भाषे, मध्य - एशियायाः अवेस्ता, प्राचीनफारसीभाषे अस्यैव परिवारस्य प्रमुखाः भाषाः सन्ति। संस्कृतशब्दाः ग्रीक्, अवेस्ता, फारसी इत्यादिभाषासु समानार्थकाः शब्दाश्च रूपसादृश्यं भजन्ते। यथा—

	संस्कृतम्	ग्रीक्	अवेस्ता	फारसी	आंग्लभाषा
1.	पितृ	पेटर (Pater)	पितर	पिदर	फादर
2.	मातृ	मेटर (Meter)	मातर	मादर	मदर
3.	भ्रातृ	फ्राटर (Frater)	—	बिरादर	ब्रदर

एतासां भाषाणामनेके शब्दाः सरूपा भवन्ति, येषां परिशीलनेन निश्चयेन वक्तुं शक्यते यदेतासां भाषाणां स्रोतस्समानमिति।

भारोपीयभाषापरिवारे संस्कृतस्य स्थितिरेवं प्रदर्श्यते।



शतं वर्गस्य, केण्टुं वर्गस्य च भाषाणां भाषिणो जनाः एकस्यैव परिवारस्यासन्। स्थानमिदं भारतयूरोपयोः मध्यवर्ती भाग इति कथ्यते। अत्रस्थाः जनाः यदा दूरप्रदेशान् गत्वा न्यवसन्, तदा तेषां भाषा वर्गद्वये व्यभजत। यूनानी–लाटिनी–भाषाः केण्टुं वर्गे, भारत–इरानी भाषाः शतंवर्गे च प्रमुखा अभवन्। वैदिकसंस्कृतं भारत–इरानी–भाषायाः भारतीयं रूपं भवति।

संस्कृतभाषायाः त्रयः कालाः

संस्कृतभाषाया इतिहासः अतीव दीर्घः। एषा विश्वस्य आदिभाषा। अस्याः भाषायाः साहित्यं प्रायः क्रि.पू. 6000 वर्षीयं वेदरूपेण उपलभ्यते। अद्याप्येषा भाषा प्रबला विराजते। अस्याः इतिहासः त्रिषु.कालेषु विभज्यते।

1. प्राचीनकालः—

कालोऽयं क्रिस्तोः पूर्वं सप्तमशताब्दपर्यन्त इति मन्यते। अयमेव वैदिककालः। अतिदीर्घकालोऽयम्। अस्मिन् काले आर्याः उत्तरभारते अवसन्। अस्मिन् काले संस्कृतं जनभाषा आसीत्। अस्मिन् काले एव ऋग्वेदः, सामवेदः, यजुर्वेदः, अथर्ववेदश्च आविरभूवन्। ततः परं दर्शनं, ज्योतिषं, रेखागणितं, व्याकरणं, छन्दः, अलङ्कारः इत्यादिविषयेषु ग्रन्थाः रचिताः। अस्मिन्नेव समये यास्केन निरुक्तं रचितम्। अस्मिन् काले संस्कृतेन साकं प्राकृतभाषा जनभाषा अभवत्। परन्तु साहित्यिकभाषा संस्कृतमेवासीत्। अस्मिन्नेव काले पाणिनि–कात्यायन–पतञ्जलिमहर्षिभिः संस्कृतभाषायाः अत्युत्तमं व्याकरणं प्रणिन्ये।

2. मध्यकालः—

क्रिस्तोः पूर्वं सप्तमशतकमारभ्य क्रिस्तोः परं दशमशतकपर्यन्तोऽयं कालः संस्कृतभाषायाः मध्यकाल इति व्यवह्रियते। अस्य कालस्य प्रमुखविशेषता तावत् साधारणजनभाषायाम् आमूलपरिवर्तनं, विकासश्च अभवत्। अस्मिन् काले जनभाषा प्राकृतमभूत्। प्रादेशिकभेदानां कारणेन प्राकृतस्य अनेकानि रूपाण्यभवन्। तत्र मागधी, अर्धमागधी, शौरसेनी, महाराष्ट्री, पैशाची इत्यादीनि प्रमुखान्यासन्। एतासां प्राकृतभाषाणां विकृतेः कारणात् अपभ्रंशा उदभूवन्। अस्मिन् काले संस्कृतम् उच्चवर्गस्य व्यावहारिकी भाषा साहित्यिकभाषा चासीत्।

3. अर्वाचीनकालः—


ततः परम् अपभ्रंशभाषा अपि विकासमाप्नुवन्। तत्र भाषागतपरिवर्तनानन्तरं

काश्मीरी, सिन्धी, पञ्जाबी, महाराष्ट्री, गुजराती, उडिया, बंग्ला, असमिया इत्यादिभाषाः जन्म अलभन्त। एतासु भाषासु संस्कृतशबदाः, प्रचुरं प्रयुज्यन्ते। एवमर्वाचीनभारतीय-भाषाणां समृद्धेः श्रेयः संस्कृतस्यैव भवति।

अद्यतनकाले यद्यपि संस्कृतं जनभषा नास्ति, तथापि पण्डितानां विचाराणाम् आदानप्रदानस्य माध्यममस्ति। संस्कृते पत्रपत्रिकाणां संख्यापि द्विशताधिकाः वर्तते। विभिन्नानां शास्त्रग्रन्थानां, काव्यानाञ्च रचना प्रवर्तते। प्राथमिकस्तरादारभ्य विश्वविद्यालयस्तरपर्यन्तं संस्कृतस्य अध्ययनं प्रचलति। संस्कृते अनुसन्धानकार्यमपि प्रवर्तते।

संस्कृतभाषा-अन्यभारतीयभाषाश्च

उपर्युक्तविवरणस्य आधारेण संस्कृतभाषायाः प्राकृतभाषाः, प्राकृतभाषाभ्यः अपभ्रंशाश्च अजायन्त। ततः परम् अपभ्रंशभाषाभ्यः आधुनिकभाषाश्च प्रादुरभूवन्। एवमेतासां भाषाणामुद्गमः निम्नप्रकारेण प्रदर्शयितुं शक्यते—



गुजराती राजस्थानी पञ्जाबी पश्चिमी हिन्दी बंगला बिहारी उडिया असमिया

खड़ी बोली ब्रज भाषा

एवमेतासां भारतीयभाषाणां जननी संस्कृतं भवति। संस्कृतस्य शब्दाः एतासु भाषासु प्रचुरं तत्समरूपेण प्रयुज्यन्ते।

दक्षिणभारतस्य द्रविडवर्गीयाः, मुण्डावर्गीयाश्च भाषाः आर्यभाषापरिवारात् भिन्नपरिवारीयाः। तथापि एतासु भाषासु संस्कृतशब्दावली प्रभूतमुपयुज्यते। एतासां भाषाणां साहित्यमपि संस्कृतसाहित्येन नितरां प्रभावितमस्ति।

अतः सर्वा अपि भारतीयभाषाः संस्कृतभाषया घनिष्ठं सम्बन्धं भजन्ते। एवं संस्कृताज्जाताः, संस्कृतेन सम्पुष्टाश्च भारतीयभाषाः शब्दभण्डारेण, साहित्येन च समृद्धाः सन्ति।

द्वितीयोऽध्यायः

संस्कृतस्य महत्त्वम्

भारतीयदर्शनस्य, धर्मस्य, संस्कृतेश्च भाषारूपेण संस्कृतस्य महत्त्वमनिर्वचनीयमस्ति। बौद्धिक-भावात्मक आध्यात्मिक-कलात्मक-निष्पत्तेः स्रोतः निरन्तरधारा संस्कृतभाषा सामान्यजनजीवनस्य अन्तर्वाहिनी वर्तते। विश्वस्य प्राचीनतमा भाषा, भारतस्य अमूल्यनिधिश्च भवति। आर्यभाषाणां जननी, आर्येतरभाषाणां पोषिणी च भवति। अस्याः महत्त्वमेवं विशदीकर्तुं शक्यते।

1. ऐतिहासिकं महत्त्वम्—

संस्कृतभाषायाः साहित्ये प्राचीनेतिहासः सन्निहितो वर्तते। वेदेभ्यः प्राचीनार्यजातीनां सभ्यता, संस्कृतिः, धर्मः, राजनीतिः, इतिहासश्च ज्ञायते। पुराणेषु, उपनिषत्सु, रामायणे, महाभारते, महाकाव्येषु, बौद्धानां त्रिपिटकसाहित्ये, जैनानामार्षसाहित्ये च भारतस्य प्राचीनेतिहासः विद्यते। कौटिल्यस्य अर्थशास्त्रे, मनुस्मृतौ, याज्ञवल्क्यस्मृतौ च तत्कालीनसमाजस्य इतिहास उपलभ्यते। अन्यस्रोतसामाधारेण लिखित इतिहासः काल्पनिकः स्यान्नाम, परन्तु संस्कृतसाहित्ये विद्यमानानां तथ्यानामाधारेण लिखित इतिहासः कल्पनामिश्रितो न भवति।

कल्हणस्य राजतरङ्गिणी, बाणस्य हर्षचरितम्, बिल्हणस्य विक्रमाङ्कदेवचरितम् इत्यादिभ्यः इतिहासग्रन्थेभ्यः प्राचीनभारतस्य सामाजिकं, राजनैतिकञ्च जीवनं ज्ञायते।

2. सांस्कृतिकं महत्त्वम्—

भारतीयसंस्कृतेः स्रोतः संस्कृतभाषा भवति। अस्माकं सभ्यता संस्कृतिश्च वेदेभ्यः, स्मृतिभ्यः, पुराणेभ्यश्च निःसृता भवति। संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतिः अनूचाना प्रवर्तते। नामकरणम्, उपनयनं, पाणिग्रहणमित्यादि-संस्काराः संस्कृतभाषायामेव क्रियन्ते। देवपूजा, हवनं, यज्ञः इत्यादयस्सर्वे

संस्कृतभाषामाध्यमेनैव क्रियन्ते। उच्चदार्शनिकविचाराः, आध्यात्मिकज्ञानं, नैतिकता च संस्कृते समाविष्टाः सन्ति।

संस्कृतायोगस्य प्रतिवेदने लिखितं यत् ''भारतीयसभ्यता वैदिककाले जनिं लब्ध्वा प्रायः चतुस्सहस्रवर्षाणि यावत् संस्कृतद्वारैव स्वाभिव्यक्तिं करोति'' इति। एषा संस्कृतिः नैतिकतायाः प्राधान्यं, मानवीयव्यक्तित्वस्य एकाग्रता, सर्वशक्तिमति परमेश्वरे विश्वासः इत्यादिमौलिकसार्वभौमसिद्धान्तेषु आधारिता भवति।

वर्तमानकालस्य आधारः भूतकाले भवति। भूतकालस्य परम्पराः अस्मभ्यम् अग्रेसर्तुं प्रेरणां ददति। परम्पराणां विस्मरणेन समाजस्य संस्कृतिः विनश्यति। मूलं विना वृक्षस्य पत्राणि सरसानि न भवन्ति। तथैव अस्माकं संस्कृतिं सरसां विधातुं संस्कृतस्या लम्बनम् आवश्यकम्। अस्माकं संस्कृतिः, सभ्यता च संस्कृतग्रन्थेषु विद्यते। अतः सांस्कृतिकदृष्ट्या संस्कृतस्य महत्त्वमनिर्वचनीयं भवति।

3. भाषाविषयकं महत्त्वम्—

संस्कृतं भारोपीयभाषापरिवारस्य प्रधाना भाषा भवति। यूनानी, ईरानी इत्यादिदेशीयभाषाणां संस्कृतेन साकं सम्बन्धो वर्तते। भारतीयाः आर्यभाषाः न केवलं संस्कृतादुत्पन्नाः, किन्तु संस्कृतशब्दैः, साहित्येन च समृद्धाः सन्ति। दक्षिणभारतस्य द्राविडभाषाः संस्कृतेन प्रभाविताः सन्ति। संस्कृतायोगस्य प्रतिवेदने लिखितं यत् ''आधुनिकार्यभाषाः संस्कृतादुत्पन्नाः, द्राविडभाषास्तावत् आदिमकालादेव साहित्यिकप्रयोगे संस्कृतेन पोषिताः सन्ति।'' इति।

(The Modern Aryan Languages were all born in the lap of Sanskrit, and as for the Dravidian Languages, ever since their literary use; they have been nurtured by Sanskrit)

भाषाशास्त्रस्य उत्पत्तिरपि पाश्चात्यविदुषां संस्कृताध्ययनात्परमेव जाता। संस्कृतव्याकरणनियमाः तत्र सहायकाः अभवन्। अतः भाषाशास्त्रस्य अध्ययनायापि संस्कृतस्य महत्त्वं परिगणनीयं वर्तते।

4. राष्ट्रियं महत्त्वम्—

भारतस्य एकता, अखण्डता च संस्कृते निहिता वर्तते। भारते सत्स्वपि अनेकेषु बाह्यभेदेषु जनानां संस्कृतिः समाना वर्तते। कदाचित् जनाः साम्प्रदायिकता,

प्रान्तीयता, भाषा इत्यादि-विषयेषु कलहं कुर्वन्ति। ईर्ष्या, द्वेषः, घृणा इत्यादिदुर्भावनाः उत्पद्यन्ते। एतादृशपरिष्ठितौ संस्कृतभाषायाः राष्ट्रियं महत्वं सहायकं भवति। संस्कृतम् आर्यभाषाणां जननी, द्राविडभाषाणां पोषिणी च वर्तते। संस्कृतं विघटनकारितत्त्वानां विस्मारणेन एकरूपतायाः स्मरणं कारयति। संस्कृतभाषायां विषक्षालनस्य क्षमता वर्तते। संस्कृतं स्वमाध्यमेन विभिन्नभाषाभाषिणः एकशृङ्खलायां बध्नाति। जनानां भेदभावान् विस्मार्य राष्ट्रहितस्य प्राधान्यं कल्पयति। भारतवर्षस्य भौगोलिकं चित्रं संस्कृतसाहित्ये वर्णितं जनानां मन ≍ फलकात् प्रान्तीयभेदं मार्जयति। यथा वायुपुराणे उक्तम्—

"उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः"॥ इति।

एवं संस्कृतस्य राष्ट्रियं महत्त्वम् अविस्मरणीयमस्ति।

5. अन्ताराष्ट्रियं महत्त्वम्—

"उदारचरितानान्तु वसुधैव कुटुम्बकम्" इत्येतमादर्शं भारतीयाः प्राचीनकालादेव प्रादर्शयन्।

"समानमस्तु वो मनो यथा वः सुसहासति।"

"देवस्य पश्य कार्यं न ममार न जीर्यति।"

"केवलाघो भवति केवलादी"

"एकं सद् विप्रा बहुधा वदन्ति।"

"सत्यमेव जयते नानृतम्"

इत्येतादृशाः उदात्ताः विचाराः सन्देशाश्च संस्कृतभाषायामुपलभ्यमानाः अस्मान् अन्ताराष्ट्रियजीवनाय प्रेरयन्ति।

"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥"

इत्येतादृशी भावना न केवलं भारतीयानां कृते सीमिता वर्तते, किन्तु भारतीयाः सकलस्य विश्वस्य सुखं, स्वास्थ्यञ्च इच्छन्ति। एषा प्रार्थना सौहार्दं, भ्रातृभावं, सहनशीलताञ्च शिक्षयति। जवाहरलाल नेहरू महोदयः विशदयति यत् भारतस्य प्राचीनसंस्कृतिः अस्मान् सहनशीलतां, प्रेम, प्रातिवेशिकैः सह मैत्रीञ्च शिक्षयति।

वर्तमानभारतस्य विदेशनीतौ एते एव नियमाः पञ्चशीलरूपं धरन्ति। अन्ताराष्ट्रियक्षेत्रे अस्माकम् उदात्ताः प्राचीनादर्शाः कार्यान्विताः भवेयुः। एते उत्कृष्टविचाराः अस्मान् अन्ताराष्ट्रियसहयोगाय उत्साहितान् कुर्वन्ति।

शतम् वर्गस्य, केण्टुम् वर्गस्य च भाषाणाम् भाषितारः जनाः मूलतः आर्यजातीयाः एव आसन्। एतद्वर्गीयाणां भाषाणां तुलनात्मकाध्ययनेन एतत् सिद्ध्यति। संस्कृतभाषा एतासु भाषासु प्रधानतमा भवति। अतः अस्याः भाषायाः माध्यमेन विदेशीयैः साकं सम्बन्धः सुगमः भवति। एवं संस्कृतस्य अन्ताराष्ट्रियं महत्त्वं व्यक्तं भवति।

6. साहित्यिकं महत्त्वम्—

संस्कृतसाहित्यं अतीव विस्तृतं भवति। वैदिकसंस्कृते काव्यरचनैव प्रधाना आसीत्। किन्तु लौकिकसंस्कृते गद्यं, पद्यं, नाटकम् इत्यादिविभिन्नप्रकाराः, ध्वन्यलङ्कार-गुणरीत्यादिविषयैः सहिताः दर्शनगणितज्योतिषेतिहास-राजनीत्यादिविषयाः रचिताः अभवन्।

भारतीयभाषासु साहित्ये च न केवलं संस्कृतभाषायाः शब्दजालमेव, अपि तु संस्कृतसाहित्यस्य विचारधाराः, ध्वन्तयलंङ्कारादयश्च अन्तर्भवन्ति। संस्कृतसाहित्यस्य उत्कृष्टरचनाः विश्वविख्याताः सन्ति। कालिदासस्य अभिज्ञानशाकुन्तलं, रघुवंशः, कुमारसम्भवः, मेघदूतं, भवभूतेः उत्तररामचरितं, भारवेः किरातार्जुनीयम्, माघस्य शिशुपालवधं, श्रीहर्षस्य नैषधं, बाणस्य कादम्बरी इत्यादिग्रन्थाः संस्कृतसाहित्यस्य अमूल्यरत्नानि भवन्ति। अनेके संस्कृतग्रन्थाः भारतीयभाषासु, विदेशीयभाषासु च अनूदिताः सन्ति। एवं संस्कृतसाहित्यं विश्वसाहित्ये मूर्धन्यं स्थानं भजते। तथा च संस्कृतसाहित्यम् आधुनिकसाहित्यस्य प्रेरणास्रोतः भवति।

7. कलात्मकं महत्त्वम्—

प्राचीनभारते विज्ञानेन साकं कलानामपि उन्नतिः आसीत्। मूर्तिकलायाम्, चित्रकलायाञ्च भारतं विश्वविख्यातम् आसीत्। सिन्धुघाट्याः अवशेषेषु एतासां कलानाम् उन्नतेः प्रमाणानि विद्यन्ते। एतद्‌तिरिक्ताः नाट्यकला, अभिनय- सामग्री, वेशभूषा, संगीतं, नृत्यम् इत्यादयः चतुष्षष्टिः कलाः संस्कृतग्रन्थेषु वर्णिताः उपलभ्यन्ते। अतः कलादृष्ट्या संस्कृतस्य महत्त्वम् अङ्गीकर्त्तव्यं भवति।

8. वैज्ञानिकं महत्त्वम्—

प्राचीनैः ऋषिभिः, मुनिभिः, पण्डितैश्च मानवजीवनं सुखमयं विधातुं, स्वानुभवेन, तपश्शक्त्या च सम्पादितं बहुविधं विज्ञानं संस्कृतभाषया रचितमस्ति। मानवानां स्वास्थ्यस्य संरक्षणाय, आयुषः वर्द्धनाय, व्याधीनां निवारणाय च आयुर्वेदः नितरामुपकारको वर्तते। गृहनिर्माणाय वास्तुशास्त्रं, यज्ञयागादीनां, विवाहीदीनां शुभकार्याणाम् अनुष्ठानाय, मानवस्य भूत-भविष्यंद्वर्तमानानां ज्ञानाय च ज्योतिश्शास्त्रम्, उत्तमव्यक्तित्वस्य निर्माणाय संस्काराणां प्रतिपादकं धर्मशास्त्रम्, अर्थव्यवस्थायाः संरक्षणेन प्रजानां हितस्य परिरक्षणाय अर्थशास्त्रम्, ऐहिकभोगानां प्रतिपादकं कामशास्त्रम् इत्यादीनि अनेकशास्त्राणि संस्कृतेन रचितानि समुपलभ्यन्ते।

बहूनि वैज्ञानिकतत्त्वानि भारतीयैः विद्वद्भिः इदम्प्रथमतया प्रतिपादितानि लोके अपरिचितान्येव सन्ति। गणितशास्त्रे शून्यं, दशमाङ्क-पद्धतिः, 'पै' इत्यस्य मूल्यं, पैथोगरस् सिद्धान्तः वर्गमूलं, घनमूलम् इत्यादयः बहवः सिद्धान्ताः प्राचीनभारतीयैः प्रतिपादिता अपि पाश्चात्त्यानामेव प्रतिभाप्रसूता इति मन्यन्ते।

आधुनिकैरधीयमानानि बहूनि शास्त्राणि नामान्तरेण संस्कृते दृश्यन्ते। यथा-विमानशास्त्रं, वनस्पतिशास्त्रं, रसायनशास्त्रं, धातुशास्त्रं, शल्यचिकित्सा, वृक्षायुर्वेदः, सामुद्रिकशास्त्रं, शकुनशास्त्रं, भूतचिकित्सा, योगशास्त्रम् इत्यादीनि सन्ति।

प्राचीनैः भारतीयैः कुशाग्रबुद्धिभिः सूक्ष्मचिन्तनेन सुष्ठु प्रतिपादितमेतद् विज्ञानं सार्वकालिकं, सार्वभौमिकं, सार्वजनीनञ्च अस्ति। संस्कृते सुरक्षितस्य एतस्य विज्ञानस्य अध्ययनं विना संस्कृतस्य वैज्ञानिकं महत्त्वं ज्ञातुं न शक्यते।

संस्कृतस्य वैज्ञानिकं महत्त्वं प्रचारयितुम् आन्ध्रप्रदेशे तिरुपतिनगरे विद्यमाने राष्ट्रियसंस्कृतविद्यापीठे 'संस्कृतं विज्ञानञ्च' इति कश्चन विभागः प्रवर्तते। स च संस्कृतविज्ञानग्रन्थेषु उपलभ्यमानान् अनेकान् अपूर्वविषयान् ग्रन्थरूपेण प्रकाशयति। भारते, विदेशेषु च प्रदर्शिनीः (Sanskrit and Science Exhibition) आयोजयति।

9. आध्यात्मिकं महत्त्वम्—

संस्कृतसाहित्ये प्रसिद्धानि षट् आस्तिकदर्शनानि सन्ति। सांख्ययोग-न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसा इत्येतानि प्राचीनभारतीयानां तत्वदर्शनानि विद्यन्ते। तथैव चार्वाक-जैन-बौद्धदर्शनानि नास्तिकानि सन्ति। उत्तरमीमांसैव वेदान्तशास्त्रं भवति। उपनिषदः, ब्रह्मसूत्रम, श्रीमद्भगवद्गीता इति त्रयः ग्रन्थाः

प्रस्थानत्रयमिति उच्यते। वेदान्तशास्त्रस्य विभिन्नाः सिद्धान्ताः प्रमुखैः आचार्यैः प्रतिपादिताः अद्वैतं, द्वैतं, विशिष्टाद्वैतं, द्वैताद्वैतं, शुद्धाद्वैतमिति व्यवहृताः वर्तन्ते।

मानवजीवनस्य परमार्थं बोधयितुं एते दार्शनिकग्रन्थाः प्रयतन्ते। आत्मतत्त्वस्य ज्ञानेन मनुष्यः जीवनस्य आत्यन्तिकं लक्ष्यं प्राप्तुं शक्नोति। अध्यात्मज्ञानेन मानवः अलौकिकं सुखं, शाश्वतीं शान्तिञ्च अधिगच्छति।

मनुष्यः स्वप्रकृत्यनुसारं कर्ममार्गं, भक्तिमार्गं, ज्ञानमार्गं वा आश्रित्य जननमरणजराव्याधिरूपसंसारबन्धनात् मुक्तो भवति।

सर्वभूत समभावना, साहोदर्यं, स्नेहः, दया, शान्तिः इत्यादीनाम् उदात्तभावानाम् आत्मसात्करणेन मानवः आध्यात्मिकीं प्रगतिं साधयति।

मानवमूल्यानां रक्षणाय, नैतिकविकासाय, जगद्धितसाधनाय च आध्यात्मिकं ज्ञानं सम्प्रति नितराम् अपेक्ष्यते। वेदाः, पुराणानि, काव्यानि च एतानि तत्त्वानि बोधयन्ति। मानवेषु ईर्ष्या, द्वेषः, असूया, शत्रुता, अहङ्कारः, दुरभिमानः, असहिष्णुता, अस्पृश्यता इत्यादीन् दुर्गुणान् निवार्य, प्रेम, परोपकारः, क्षमा, ब्रह्मचर्यम्, अस्तेयम्, अपरिग्रहः, धैर्यं, न्यायप्रियता, शौचम्, इन्द्रियनिग्रहः इत्यादीन् उत्तमगुणान् उत्पादयितुम् अध्यात्मविद्या समर्था भवति। अत एव 'अध्यात्मविद्या विद्यानाम्' इति श्रीमद्भगवद्गीतायामुक्तम्।

> "मातृवत् परदारेषु परद्रव्येषु लोष्टवत्।
> आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः॥"

इति अध्यात्मतत्त्वस्य सारः अस्मिन् श्लोके प्रतिपादितः।

विश्वसंक्षेमं, विश्वसौभ्रातृत्वं, विश्वशान्तिञ्च सम्पादयितुम् अध्यात्मज्ञानं सर्वोत्तमं भवति। संस्कृतशिक्षणस्य एतदुद्देश्यं सार्वजनीनं, सार्वभौमिकं, सार्वकालिकञ्च भवति इति निर्विवादम्।

एतेन विवेचनेन स्पष्टं भवति यत् भारतीयसंस्कृतिः संस्कृतसाहित्ये सुरक्षिता अस्ति इति। संस्कृतभाषाद्वारा भारतस्य वास्तविकं स्वरूपं ज्ञातुं शक्यते। संस्कृतं भारतस्य अजस्रज्ञानधारा भवति। संस्कृतस्य प्राचीनवैभवस्य स्मरणमात्रेण प्रयोजनं नास्ति, वर्तमाने तस्यै उचितं स्थानं दातव्यम्। प्राचीनकाले इव पुनरपि भारतं लोके सर्वेषु क्षेत्रेषु, सर्वेषु राष्ट्रेषु अग्रस्थानं प्राप्नुयात्। तदर्थं पुनः संस्कृतस्य उद्धाराय आवश्यकः प्रयत्नः कर्त्तव्यः॥

तृतीयोऽध्यायः

पाठ्यक्रमे संस्कृतस्य स्थानम्

संस्कृतभाषायाः ऐतिहासिकपृष्ठभूमेः, महत्त्वस्य च विचारणात्परं वर्तमानशिक्षा प्रणाल्यां संस्कृतस्य स्थानं कीदृशं स्यात्? शैक्षिकपाठ्यक्रमे किं महत्त्वं देयम्? इति विषये विभिन्नान् पक्षान् विचारयामः।

प्रथमपक्षः—

केचन आधुनिकविद्वांसः मन्यन्ते यत् संस्कृतस्य अध्ययनम्, अध्यापनञ्च समाजस्य हानिकारकं, देशस्य कृते अनावश्यकञ्चेति। संस्कृतं केवलं ब्राह्मणानां भाषा, पूजासु, कर्मकाण्डेषु च प्रयुक्ता भवति। आधुनिकविज्ञानयुगे संस्कृताध्ययनस्य किमपि प्रयोजनं नास्ति। अतः सामान्यरूपेण संस्कृतस्य अध्ययनं व्यर्थमेव।

द्वितीयपक्षः—

अन्ये केचित् विद्वांसः संस्कृतम् अनावश्यकं न मन्यन्ते, किन्तु आधुनिकविषयाणाम् अध्ययनस्य अधिकं महत्त्वं कल्पयन्ति। एते संस्कृताध्ययनं प्रति तटस्थाः, उदासीनाः वा भवन्ति। एते तु पाठ्यक्रमे संस्कृतं वैकल्पिकविषयरूपेण पाठयितुमिच्छन्ति। एतेषां मते संस्कृतं काचित् कठिना भाषा। पाठ्यक्रमे संस्कृतस्य योजने छात्राणां क्लेशः अधिकः भवति। पाठ्यक्रमश्च विस्तृतो भवति। अतः संस्कृतम् अनिवार्यं न कर्तव्यम्। ये छात्राः संस्कृतं पठितुमिच्छन्ति तेषां कृते ऐच्छिकविषयरूपेण पाठनीयम्।

तृतीयपक्षः—

अपरे केचित् विद्वांसः पाठ्यक्रमे संस्कृतम् अनिवार्यविषयः भवेदिति समर्थयन्ति। संस्कृतं सर्वासां भारतीयानाम् आर्यभाषाणां जननी भवति। संस्कृतस्य अध्ययनं भारतीयभाषाणाम् अध्ययने सहायकं भवति। छात्राः भारतीयसंस्कृतिं

संस्कृताध्ययनेन ज्ञातुं प्रभवन्ति। छात्रेषु राष्ट्रस्य एकतायाः, अखण्डतायाश्च भावनायाः विकासाय संस्कृतं सहायकं भवति। अतः संस्कृताध्ययनम् अनिवार्यं स्यात्।

उपर्युक्तपक्षाणां विश्लेषणम्—

अत्र प्रथमपक्षः भारतीयविचारधारायाः प्रतिकूलः वर्तते। आधुनिकयुगे संस्कृतशिक्षणं व्यर्थमिति चिन्तनम् अनुचितं भवति। तेषामयं विचारो भवति, ये संस्कृतस्य गौरवं महत्त्वञ्च न जानन्ति। ते संस्कृतभाषायाः मधुरतां, साहित्यस्य सरसताञ्च न जानन्ति। भारतीयसंस्कृतेः श्रेष्ठतायाः अनभिज्ञाः एते विद्वांसः पाश्चात्यसभ्यतायाः प्रभावेण आकृष्टाः आङ्ग्लभाषामेव व्यवहारयोग्यां मन्यन्ते। एतेषां चिन्तनरीतिरपि पाश्चात्या भवति। अतः एते आङ्ग्लभाषायाः अध्ययनमनिवार्यं, संस्कृतस्य अध्ययनम् अनावश्यकमिति च कथयन्ति। भारतीयसंस्कृतेः, सभ्यतायाश्च माध्यमस्य संस्कृतस्य पाठ्यक्रमात् निष्कासनं भारतीयसंस्कृतेः कुठारघातः भवति।

द्वितीयपक्षे संस्कृतस्य अध्ययनं प्रति औदासीन्यं दृश्यते। एते पाठ्यक्रमे संस्कृतस्य वैकल्पिकं स्थानं दातुमिच्छन्ति।

तृतीयपक्षोऽप्यसङ्गतः, यतः वर्तमानपरिस्थितिषु समस्तभारते संस्कृतस्य अध्ययनम् अनिवार्यं कर्तुं न शक्यते। बालकः शिक्षाग्रहणं मातृभाषया प्रारभते। राष्ट्रभाषारूपेण हिन्दीभाषापि पठनीया। आङ्गलभाषाप्यनुपेक्षणीया वर्तते। यदि संस्कृतमपि अनिवार्यं क्रियेत तर्हि बालकैः चतसृणां भाषाणामध्ययनस्य क्लेशः सोढव्यः स्यात्। बालकैः भाषातिरिक्ताः विज्ञानविषया अपि अध्येतव्यास्सन्ति किल।

संस्कृतशिक्षणविषये अभीष्टः पक्षः—

सन्दर्भेऽस्मिन् संस्कृतस्य विषये प्रसिद्धैः कैश्चित् विद्वद्भिः प्रकटितानां विचाराणां स्मरणमुचितं स्यात्।

"यः संस्कृतं न जानाति, सः संस्कृतः (Cultured) न भवति, यतः प्राचीनकालादेव अस्माकं जीवनपद्धतिः, परम्परा च संस्कृते एव प्रकटिता वर्तते। यदि वर्तमानयुगेऽपि वयमुन्नतिं वाञ्छामः तर्हि संस्कृतमेव जीवनाधारत्वेन पुनः स्वीकर्तव्यं भवेत्। संस्कृतं विना अस्माकं सर्वे प्रयत्नाः निष्फलाः भवेयुः।"

श्री अनन्तशयनम् अय्यङ्गार्।

भू.पू. राज्यपालः, बिहार्।

"संस्कृतं भारतस्य परम्परायाः, संस्कृतेः, सभ्यतायाश्च प्रतीको भवति, न

तु केवलं काचिद्भाषा। अतः भारते सर्वेषु विद्यालयेषु, कलालयेषु च संस्कृताध्ययनस्य विस्तारः अत्यावश्यकः भवति।"

Sanskrit is the symbol of India's heritage, culture and civilization. It is not just a language. It is this essential that the promotion of Sanskrit learning should be extended to all schools and colleges in the country. **श्री. वी.वी. गिरिमहोदयस्य भाषणात्**

बङ्गलूर नगरम्-27-5-1996

1972 तमे वर्षे मार्च् मासे, 26 तमे दिनाङ्के दिल्लीनगरे अन्ताराष्ट्रियसंस्कृतसम्मेलनम् उद्घाटयन् भारतस्य राष्ट्रपतिः श्री वी.वी. गिरिमहोदयः अवदत् यत् संस्कृतभाषा अतीतवर्तमानयोः, पूर्वपश्चिमयोश्च मध्ये सजीवबन्धनं भवति। एनं परम्परागतं संस्कृतेः निधिम् उचितं सम्मान्य, अनन्तरसन्ततिषु प्रापयितुं समदिशत्।

(President V.V. Giri called upon Sanskrit scholars of the world to identify Sanskrit as a living connection link between the past and the present as well as between the east and the west .... Let us give due recognition to this wonderful cultural heritage and pass it on to posterity, if possible with added embellishment.)

संस्कृतविश्वपरिषदः षष्ठाधिवेशनस्य अवसरे शारदापीठस्य श्रीशङ्कराचार्यैः प्रेषितः सन्देशः यथा—

"संस्कृतभाषामन्तरा कापि भाषा न केवलं असमृद्धा भवति अपि तु जीवितुमेव न शक्नुयात्, तथा संस्कृतभाषां विना न कोऽपि भारतीयो यथार्थभारतीयो भवितुमर्हति। संस्कृतभाषा भारतीयानां जीवनभाषा विद्यते।"

तस्मिन्नेवावसरे कामकोटिपीठस्य श्रीशङ्कराचार्याः अमुं विचारं प्राकटयन्—

"अस्माकं संस्कृतेः मूलभूता भाषा संस्कृतभाषा। एतत्कृतोपकारभावे एवान्याः भाषाः लोके विराजन्ते। संस्कृतभाषायां प्रकाशमानानामार्षशास्त्राणां कालिदासमहाकविसाहित्यानां चाद्यतनजीवलोकहितार्थमधीतिबोधाचरणप्रचारणैः पालनमेवास्माकं भारतदेशस्यौन्नत्यकारणम्।"

"संस्कृतम् अनेकभारतीयभाषाणां जननी भवति। संस्कृतं भारतीयानां मनसि तादृशीं मुद्राम् अकल्पयत्, यथा अस्माकं चेतनं मस्तिष्कमपि न जानाति।"

भू.पू. राष्ट्रपतिः डॉ. स. राधाकृष्णन्।

"अस्याः (संस्कृतभाषायाः) किञ्चित् ज्ञानं विना स (भारतीयः) स्वपरम्परायाः मूल्यं ज्ञातुं न प्रभवति, न च तस्याः प्रेरणां ग्रहीतुं शक्नोति, न च सः भारतस्य सार्थकं प्रतिनिधित्वं कर्तुं प्रभवति।"

श्री के.एम्. मुन्शी

भू.पू. राज्यपालः, उत्तरप्रदेशः।

"यन्त्रविद्यायाः (Technology) आध्यात्मिकशिक्षायाश्च मध्ये खातस्य योजनमपेक्षितम्। तन्मनोरथसिद्धये संस्कृतमेकस्य सुन्दरस्य सेतोः कार्यं कर्तुमर्हति।"

डॉ. राजेन्द्रप्रसादः।

"अस्माकं समस्तसंस्कृतिः, साहित्यं, जीवनञ्च तावत्पर्यन्तमपूर्णं भवति, यावत्पर्यन्तमस्माकं विद्वांसः, समीक्षकाः, नेतारः, शिक्षाशास्त्रिणश्च संस्कृतस्य अनभिज्ञा भवन्ति।"

भारतसर्वकारः संस्कृताध्ययनस्य विषये विचारयितुं संस्कृतायोगं समघटयत्। अयमायोगः विद्यालयेषु, महाविद्यालयेषु च संस्कृतशिक्षणस्य व्यवस्थां कर्तुं सर्वकारं निरदिशत्। आयोगः इदमपि प्रास्तौषीत् यत् विषयाणां वर्गीकरणं तथा स्यात् यथा संस्कृतमधिजिगीषुः कोऽपि छात्रः संस्कृताध्ययनात् वञ्चितो न स्यात्।

(संस्कृतायोगः — अध्यायः 3 – अनुच्छेदः 49

संस्कृतायोगः — अध्यायः 5 – अनुच्छेदः 15, 32

अत्रत्यानामंशानामाधारेण)

उपर्युक्तैः विचारैः संस्कृताध्ययनमावश्यकमिति निश्चीयते। अधुना पाठ्यक्रमे संस्कृतशिक्षणस्य स्थानम् अनिवार्यं स्यादुत वैकल्पिकमिति प्रश्नः अवशिष्यते। संस्कृतायोगस्य प्रतिवेदनेन त्रिभाषासूत्रे संस्कृतमन्तर्भाव्य अनिवार्यरूपेण पाठयितुं भारतसर्वकाराय परामर्शोऽदायि। मातृभाषया अथवा हिन्दीभाषया साकं तृतीयस्थाने संस्कृतमनिवार्यं स्यादिति परामर्श आसीत्। केषुचिद्राज्येषु अधुनापि एतादृक् त्रिभाषासूत्रमाश्रित्य तिस्रः भाषाः पाठ्यन्ते।

अधुना भारते संस्कृतिशिक्षणं प्रधानतः द्वेधा प्रचलति—

1. संस्कृतपाठशालासु, संस्कृतमहाविद्यालयेषु च पारम्परिकरूपेण,
2. सामान्यविद्यालयेषु, सामान्यमहाविद्यालयेषु च आधुनिकरूपेण च।

संस्कृतपाठशालासु, संस्कृतमहाविद्यालयेषु च संस्कृतमेकमात्रविषयरूपेण पाठ्यते। कुत्रचित् शिक्षणमाध्यममपि संस्कृतं स्यात्। एतासु संस्थासु संस्कृतशिक्षणं प्राथमिकस्तरादेव आरभ्यते पाठ्यक्रमश्च प्रथमा, मध्यमा, शास्त्री, आचार्य अथवा प्राज्ञ, विशारद, शास्त्री, आचार्य इत्यादिकक्ष्यासु विभज्यते।

सामान्यविद्यालयेषु प्रदेशानुसारं संस्कृतं पञ्चमकक्ष्यायाः, षष्ठकक्ष्याया वा आरभ्यते। अत्रायं वैकल्पिकविषयो भवति। संस्कृताध्येतृणां संख्या न्यूना भवति। सामान्यमहाविद्यालयेष्वपि संस्कृतं वैकल्पिकविषयत्वेन पाठ्यते।

संस्कृतपाठशालासु, संस्कृतमहाविद्यालयेषु चाधीयानाश्छात्राः आधुनिकविषयेषु अपरिचिताः। अतः संस्कृतपाठशालानां, महाविद्यालयानाञ्च पाठ्यक्रमस्य आधुनिकीकरणमावश्यकम्। संस्कृतसंस्थासु संस्कृतस्य प्राधान्यं संरक्ष्य, मातृभाषा, समाजशास्त्रं, गणितं, विज्ञानमित्यादिविषयाः पाठनीयाः। एतेन छात्राः संस्कृतस्य विस्तृतज्ञानेन साकं, अन्यसामान्यविषयाणां परिचयमपि प्राप्नुयुः। छात्राणां चिन्तनपरिधिः विस्तृतो भवति। उद्योगावसराश्च अधिकाः भवन्ति। संस्कृताध्यापनात् भिन्नेषु सामान्यक्षेत्रेष्वपि सेवां कर्तुं समर्थाः भवन्ति।

सामान्यविद्यालयेषु संस्कृतशिक्षणं माध्यमिकस्तरादारभ्यते। तच्च द्विधा भवति—

1. अनिवार्यरूपेण,
2. वैकल्पिकरूपेण च।

यत्र अनिवार्यरूपेण संस्कृतशिक्षणं भवति, तत्रापि पाठ्यक्रमे सहित्यस्य अपेक्षया भाषायाः प्राधान्यं भवेत्। तेन च छात्राणां मातृभाषाज्ञानं, शब्दभण्डारश्च वर्धेत। छात्राः भारतीयसंस्कृत्या परिचिता भवेयुः संस्कृतसाहित्ये चासक्ताः भवेयुः। अनिवार्यसंस्कृतस्य एकं प्रश्नपत्रं पृथक् स्यात्। यत्र छात्राणामुत्तीर्णता अनिवार्या भवेत्। तथा च छात्राः, अध्यापकाश्च संस्कृतस्य पठने, पाठने च जागरूकाः भवन्ति।

यत्र विद्यालयेषु संस्कृतमनिवार्यं न भवति, तत्र वैकल्पिकरूपेण शिक्षणस्य व्यवस्था कर्तव्या। ये छात्राः संस्कृते आसक्ताः भवन्ति ते वैकल्पिकविषयत्वेन संस्कृतभाषां, साहित्यञ्च पठित्वा उन्नतस्तरे शास्त्राणि पठितुं प्रभवन्ति। विषयाणां वर्गीकरणमेवं स्यात्, यथा विज्ञानस्य छात्रा अपि संस्कृतं पिपठिषवः पठितुं शक्नुयुः। एते छात्राः संस्कृतस्य साहित्यं, व्याकरणं, रचनां, भाषणञ्च जानीयुः, तथा स्नातकस्तरे, स्नातकोत्तरस्तरे च संस्कृतस्य विस्तृताध्ययनं कर्तुं प्रभवेयुः।

संस्कृतपाठ्यक्रमनिर्माणस्य साधारणनियमाः—

पाठ्यक्रमे संस्कृतस्य स्थानं विचार्य, अधुना संस्कृतपाठ्यक्रमरचनायाः नियमानामाधाराः विचार्यन्ते।

भारतस्य विभिन्नेषु राज्येषु संस्कृतस्य पाठ्यक्रमः भिन्नो भवति। अतः कक्ष्यानुसारं पाठ्यक्रमस्य निर्णयोऽसङ्गतः स्यात्। प्रत्येकं राज्येषु प्रादेशिकशिक्षाविभागेन पाठ्यक्रमः निर्धार्यते। संस्कृताध्यापकः पाठ्यक्रमस्य समीकरणे शिक्षाविभागाय स्वकीयान् प्रस्तावान् सूचयितुमर्हति। अतः संस्कृताध्यापकः पाठ्यक्रमनिर्माणस्य साधारणनियमान् जानीयात्। संस्कृतस्य प्राचीनपाठ्यक्रमे छात्राणामावश्यकताः, वैयक्तिकविभेदाश्च न परिगणिता आसन्। सर्वैरपि छात्रैः एक एव पाठ्यक्रमः समानरूपेण अध्येतव्य आसीत्। आधुनिकपाठ्यक्रमे मनोवैज्ञानिकसिद्धान्तानां महत्त्वमङ्गीक्रियते। संस्कृतपाठ्यक्रमरचनायां निम्नोक्ताः नियमाः श्रद्धातव्याः भवन्ति।

1. पाठ्यक्रमनिर्माणाय छात्राणां मानसिकस्तरः, पृष्ठभूमिः, सम्पूर्णज्ञानञ्च अपेक्षितमस्ति।
2. पाठ्यक्रमः छात्राणामवस्थानुकूलं, रुच्यनुसारञ्च भवेत्।
3. पाठ्यक्रमः सर्वथा पूर्णः स्यात्। मौखिकं, लिखितञ्च कार्यं, गद्यं, पद्यं, नाटकं, व्याकरणं, निबन्धः, अनुवादः, अभ्यासः, इत्यादयः सर्वेऽपि भवेयुः।
4. पाठ्यक्रमः आवश्यकतानुसारं, परिष्ठित्यनुसारञ्च परिवर्तनयोग्यः स्यात्।
5. पाठ्यक्रमनिर्माणे छात्राणां व्यक्तिगतविभिन्नताः, आवश्यकताश्च श्रद्धेयाः भवन्ति।
6. पाठ्यक्रमः विस्तृतः स्यात्। अध्यापकः सर्वान् विषयान् विस्तरेण पाठयेत्, न तु संक्षेपेण।
7. पाठ्यक्रमस्य वर्गीकरणं तथा शृंङ्खलारूपेण स्यात् यथा कक्ष्यायाः पाठ्यक्रमः पूर्वोत्तरकक्ष्याभ्यां सम्बद्धः स्यात्।

❖❖❖

चतुर्थोऽध्यायः

संस्कृतशिक्षणस्य उद्देश्यानि

विद्यालयेषु, महाविद्यालयेषु च विषयाणामध्यापनं निश्चितानामुद्देश्यानामाधारेण भवति। भाषाशिक्षणस्योद्देश्यानि अन्यविषयाणां शिक्षणस्य उद्देश्येभ्यो भिन्नानि भवन्ति, यतः भाषाशिक्षणं विषय-दृष्टया, माध्यमदृष्टया च द्विधा भवति। संस्कृतशिक्षणस्य उद्देश्यानि मातृभाषाशिक्षणस्य उद्देश्येभ्यः भिन्नानि भवन्ति, यतः मातृभाषाशिक्षणं प्रथमकक्ष्यातः आरभ्यते, संस्कृतशिक्षणन्तु पञ्चमीकक्ष्यातः, षष्ठीतो वा भवति। किञ्च बालकाः अध्ययनारम्भात् पूर्वमपि मातृभाषायां मौखिकं व्यवहारं कर्तुं समर्थाः भवन्ति। बालकानां मातृभाषायां भावाभिव्यक्तेः, विचारग्रहणस्य च या योग्यता भवति तादृशी योग्यता संस्कृते न भवति।

संस्कृतशिक्षणस्य उद्देश्यानि आङ्गलभाषाशिक्षणस्य उद्देश्येभ्योऽपि भिन्नानि भवन्ति। भारते सम्पर्कभाषारूपेण, अन्तराष्ट्रियभाषारूपेण च आङ्गलभाषाशिक्षणं प्रचलत्येव। यद्यपि भारते संस्कृताध्ययनस्य परिधिः न्यूनो वर्तते तथापि संस्कृताध्ययनस्य महत्त्वम् आङ्गलभाषाध्ययनस्य महत्त्वादधिकं भवति। आङ्गलभाषा काचित् विदेशीयभाषा भवति। संस्कृतन्तु भारतीयसंस्कृतेराधारः, माध्यमञ्च। भारतीयसंस्कृतेः, सभ्यतायाश्च औन्नत्यस्य कारणं संस्कृतमेव भवति। अतः आङ्गलभाषाशिक्षणापेक्षया संस्कृतशिक्षणस्य उद्देश्यानि महत्त्वपूर्णानि भवन्ति।

संस्कृतशिक्षणस्य सामान्योद्देश्यानि

संस्कृतं सर्वासामार्यभाषाणां जननी, द्राविडभाषाणां पोषिणी च। अतः संस्कृतशिक्षणस्योद्देश्यानि अन्यभारतीयभाषाणां शिक्षणस्य उद्देश्येभ्यः विशिष्टानि भवन्ति। यथा—

संस्कृतशिक्षणस्य सर्वप्रथममुद्देश्यमेतत् यत् छात्राः संस्कृतमाध्यमेन अभिव्यक्तान् विचारान् ग्रहीतुं समर्थाः स्युः।

1. ग्रहणम्—

1. मौखिकरूपेण संस्कृते अभिव्यक्तान् विचारान् श्रुत्वा भावं ग्रहीतुं छात्राः शक्ताः भवेयुः।
2. संस्कृते लिखितान् विचारान् पठित्वा अर्थं ज्ञातुं छात्राः समर्थाः भवेयुः।

छात्राः यां कामपि भाषामधीयेरन् तस्याः भाषायाः मौखिकं, लिखितञ्च स्वरूपं जानीयुः। अतः संस्कृतस्य छात्रा अपि संस्कृते मौखिकरूपेण, लिखितरूपेण च अभिव्यक्तान् विचारान् ज्ञातुं प्रभवेयुः।

2. अभिव्यक्तिः—

भावाभिव्यक्तिः द्विधा भवति मौखिकरूपेण, लिखितरूपेण च। अतः संस्कृतच्छात्राः—

1. सरलं शुद्धञ्च संस्कृतं वक्तुं समर्थाः स्युः।
2. सरले शुद्धे च संस्कृते स्वीयान् विचारान् लिखितुं प्रभवेयुः।

3. सांस्कृतिकमुद्देश्यम्—

संस्कृतभाषायाः रक्षणेनैव भारतीयसंस्कृतिः सुरक्षिता भवति। अस्याः माध्यमेनैव भारतीयसंस्कृतिः अस्माकं सुलभा वर्तते। अतः संस्कृताध्ययने सांस्कृतिकमुद्देश्यमनुपेक्षणीयमस्ति। तथा च संस्कृतशिक्षणे प्राचीनसंस्कृतग्रन्थानां माध्यमेन अथवा तेभ्यः ग्रन्थेभ्यः उद्धृतानामंशानां माध्यमेन प्राचीनभारतीयसंस्कृतेः परिचयः सम्पादनीयः।

4. कलात्मकमुद्देश्यम्—

छात्राः संस्कृतकाव्यानां, नाटकानाञ्च अध्ययनेन साहित्यस्य सौन्दर्यानुभूतिं प्राप्नुयुः। मनोहराणां लोकोक्तीनां, सुभाषितानाञ्च परिचयं सम्पादयेयुः। ताललयानुसारं मधुरस्वरेण संस्कृतकवितां पठितुं समर्थाः स्युः।

5. रचनात्मकमुद्देश्यम्—

अस्मिन्नुद्देश्ये निम्नलिखिताः अंशा अन्तर्भवन्ति।

1. संस्कृतात् मातृभाषया, मातृभाषातः संस्कृतेन च अनुवादं कर्तुं क्षमता।
2. सरलसंस्कृतेन निबन्धलेखनस्य योग्यता।

3. शब्दानां लोकोक्तीनाञ्च संस्कृतवाक्येषु प्रयोक्तुं क्षमता।
4. अधीतविषयाणां सारांशं संस्कृतेन लिखितुं क्षमता।
5. संस्कृतेन कथाकवितादीनां लेखनस्य क्षमता।

6. रसानुभूतेः, मनोरञ्जनस्य च उद्देश्यम्—

स्वाध्यायः अध्ययनस्य चरमरूपं भवति। स्वाध्यायः, मनोविनोदस्य, आनन्दानुभवस्य च स्रोतो वर्तते। छात्राः संस्कृतभाषायामधिकारं सम्पाद्य संस्कृतसाहित्यस्य स्वाध्यायेन रसानुभूतिं प्राप्नुवन्ति। समृद्धं सरलं संस्कृतसाहित्यं छात्रान् रसानुभूतये आकर्षति।

स्तरानुसारं संस्कृतशिक्षणस्य उद्देश्यानि—

आधुनिककाले संस्कृतशिक्षणं द्विधा प्रचलति—

1. पाठशालापद्धत्यनुसारम्,
2. विद्यालयकलालयपद्धत्यनुसारञ्च।

अनयोः द्वयोरपि पद्धत्योः संस्कृतशिक्षणस्य स्वरूपं भिन्नं भवति। एतयोः पद्धत्योः विभिन्नेषु स्तरेषु संस्कृतशिक्षणस्य उद्देश्यान्यपि भिन्नानि भवन्ति। तथा च उपरि निर्दिष्टानि सर्वाणि उद्देश्यानि एकस्मिन् स्तरे सम्पूर्णतया साधयितुं न शक्यन्ते।

पाठशालापद्धत्यनुसारं संस्कृतशिक्षणस्योद्देश्यानि—

पाठशालापद्धतिः, विद्यालयकलालयपद्धतेः भिन्ना भवति। पाठशालापद्धतौ संस्कृतशिक्षणस्य स्तरः उन्नतो भवति। शिक्षणमाध्यमं प्रायः संस्कृतमेव भवति। अस्यां पद्धत्यां स्तरानुगुणमेतानि उद्देश्यानि भवन्ति।

प्रारम्भिकस्तरः (प्रथमा)

1. सरलसंस्कृतं ज्ञातुं क्षमता।
2. सरलसंस्कृतेन भाषणस्य क्षमता।
3. संस्कृतात् मातृभाषया, मातृभाषायाः संस्कृतेन च अनुवादं कर्तुं क्षमता।
4. सरलश्लोकानामनुवादस्य, व्याख्यानस्य च क्षमता।
5. अलङ्काराणां, वृत्तानाञ्च सामान्यज्ञानम्।

6. शब्दरूपाणां, धातुरूपाणां, सन्धिसमासकारककृत्तद्धितादीनां व्याकरणज्ञानम्।

माध्यमिकस्तरः (पूर्वमध्यमा-उत्तरमध्यमा)

1. मातृभाषातः संस्कृतेन, संस्कृतात् मातृभाषया च अनुवादस्य पूर्णक्षमता।
2. गद्यभागानामर्थावगमस्य क्षमता।
3. पद्यकाव्यानामर्थावगमस्य क्षमता।
4. संस्कृतभाषायां भाषणस्य, लेखनस्य च क्षमता।
5. व्याकरणप्रक्रियायाः ज्ञानम्।
6. अलङ्काराणां, वृत्तानाञ्च ज्ञानम्।
7. संस्कृतेन पत्राणां, निबन्धानाञ्च लेखनस्य क्षमता।
8. पद्यानां रचनायाः क्षमता।

उच्चस्तरः (शास्त्री, आचार्यः)

1. संस्कृतेन गद्यपद्यरचनायां क्षमता।
2. संस्कृतेन विस्तृतव्याख्यानस्य क्षमता।
3. मौखिकरूपेण लिखितरूपेण च विचाराभिव्यक्तेः पूर्णक्षमता।
4. संस्कृतग्रन्थानां विमर्शने, समीक्षणे, टीकाटिप्पणीकरणे च पूर्णक्षमता।
5. संस्कृतेन दीर्घानुच्छेदानां सारांशलेखनस्य क्षमता।
6. शास्त्रार्थकरणे क्षमता।
7. संस्कृतभाषायां पूर्णपाण्डित्यम्।
8. अनुसन्धानकार्ये क्षमता।

विद्यालयकलालयपद्धत्यनुसारं संस्कृतशिक्षणस्य उद्देश्यानि—

विभिन्नप्रदेशेषु विद्यालयेषु संस्कृतशिक्षणस्य प्रारम्भः पञ्चमकक्ष्यायाः, षष्ठकक्ष्यायाः वा भवति। अतोऽत्र प्रारम्भिकस्तरस्य अभिप्रायः यदा संस्कृतशिक्षणस्य प्रारम्भः स्यात् स एव। तथा च प्रारम्भिकस्तरे 5, 6, 7 कक्ष्याः भवितुमर्हन्ति।

माध्यमिकस्तरे—8, 9, 10 कक्ष्याः पूर्वमाध्यमिकस्तरे, 11, 12 कक्ष्ये उच्चमाध्यमिकस्तरे च भवन्ति।

उच्चस्तरे बि.ए.; एम्.ए., पि.एच.डी., इत्यादिकक्ष्यासु संस्कृतसाहित्यस्य शास्त्राणाञ्च अध्ययनम्, अनुसन्धानकार्यञ्च प्रचलति। अस्यां पद्धतौ त्रिषु स्तरेषु निम्नलिखितानि उद्देश्यानि भवन्ति।

प्रारम्भिकस्तरः (5, 6, 7 कक्ष्याः)

1. सरलानां गद्यांशानां, पद्यानाञ्च शुद्धं, स्पष्टं च वाचयितुं क्षमता।
2. सरलसंस्कृतवाक्यानां मातृभाषया अनुवादं कर्तुं क्षमता।
3. मातृभाषातः सरलवाक्यानां सरलसंस्कृतेन अनुवादस्य क्षमता।
4. उक्तानां, लिखितानाञ्च सरलसंस्कृतवाक्यानाम् अर्थग्रहणस्य क्षमता।
5. सरलैः लघुभिः संस्कृतवाक्यैः भाषणस्य क्षमता।
6. श्रुत्वा, दृष्ट्वा च संस्कृतवाक्यानां लेखनस्य क्षमता।
7. सरलश्लोकानां कण्ठस्थीकरणम्।

माध्यमिकस्तरः (8, 9, 10 कक्ष्याः, उच्चमाध्यमिकस्तरश्च)

1. संस्कृतगद्यभागानां शुद्धं, स्पष्टञ्च वाचयितुं क्षमता।
2. संस्कृतश्लोकानां सस्वरं वाचयितुं क्षमता।
3. संस्कृतगद्यानां, पद्यानाञ्च अर्थग्रहणस्य क्षमता।
4. संस्कृतवाक्यानां, श्लोकानाञ्च मातृभाषया अनुवादस्य क्षमता।
5. मातृभाषायाः वाक्यानामनुच्छेदानाञ्च संस्कृतेन अनुवादस्य क्षमता।
6. सामान्यविषयेषु सरलसंस्कृतेन निबन्धरचनायाः क्षमता।

उच्चस्तरः (बी.ए., एम्.ए.)

1. प्रौढकाव्यानां, गद्यकाव्यानाञ्च अर्थावगमक्षमता।
2. सर्वविधकाव्यानां शुद्धं स्पष्टञ्च वाचयितुं क्षमता।
3. श्लोकानां शुद्धोच्चारणेन ताललयस्वरैः वाचयितुं क्षमता।
4. मातृभाषातः अन्यपरिचितभाषाभ्यश्च संस्कृतेन सुस्पष्टम् अनुवादस्य क्षमता।
5. संस्कृतेन पद्यानां रचनायां क्षमता।

6. संस्कृतेन मौखिकरूपेण भावाभिव्यक्तेः क्षमता।
7. संस्कृतग्रन्थानां समीक्षणस्य क्षमता।
8. संस्कृतेन पत्राणां लेखनस्य क्षमता।
9. संस्कृतभाषायां, साहित्ये, शास्त्रेषु च अनुसन्धानस्य क्षमता।

उपर्युक्तविवरणेन ज्ञायते यत् संस्कृतभाषाशिक्षणस्य उद्देश्यानि विभिन्नस्तरेषु भिन्नानि भवन्ति। परन्तु सर्वाण्युद्देश्यानि मूलरूपेण भाषाकौशलैः, साहित्यानन्देन च सम्बद्धानि सन्ति। कस्या अपि भाषाया अध्यापनस्य चत्वार्युद्देश्यानि भवन्ति।

यथा— 1. श्रवणकौशलम्,
2. भाषणकौशलम्,
3. वाचनकौशलम्
4. लेखनकौशलम्।

विचारग्रहणं, विचाराभिव्यक्तिरित्येतत् द्वयं कस्या अपि भाषायाः शिक्षणस्य प्रधानमुद्देश्यं भवति मूलतः।

भाषितस्य श्रवणेन, लिखितस्य वाचनेन विचारग्रहणं सिध्यति। तथा भाषणेन, लेखनेन च विचाराभिव्यक्तिः क्रियते। एवमेतेषां चतुर्णामुद्देश्यानां साधनाय विभिन्नाः क्रियाः भवन्ति विभिन्नेषु स्तरेषु। तथा च स्तरानुगुणमुद्देश्यानां विवेचनमत्र विचारितम्॥

❖❖❖

पञ्चमोऽध्यायः

संस्कृतशिक्षणस्य सामान्यसिद्धान्ताः

वर्तमानकाले मनोविज्ञानस्य व्याप्तिः प्रतिदिनं वरीवर्धते। मनोविज्ञानस्य क्षेत्रे भाषाशिक्षणस्यापि अनुसन्धानं प्रचलति। एतेन अनुसन्धानेन प्राप्ताः केचन निष्कर्षाः अत्युत्तमाः संस्कृतशिक्षणेऽपि प्रयोक्तुं शक्यन्ते। कस्यापि कार्यस्य निर्वहणात्पूर्वम् उद्देश्यानां निर्धारणं यावदावश्यकं, तस्य कार्यस्य निर्वहणेन सम्बद्धायाः प्रक्रियायाः सिद्धान्तानां ज्ञानमपि तावदेव आवश्यकम्। सिद्धान्तज्ञानेन प्रक्रियानिर्वहणं सुगमं, रोचकञ्च भवति। भाषाशिक्षणमपि काचित् प्रक्रिया भवति। अस्याः प्रक्रियाया अपि केचित् सिद्धान्ताः सन्ति। अतः भाषाशिक्षणस्य प्रारम्भात्पूर्वं तेषां सामान्यसिद्धान्तानां ज्ञानमत्यावश्यकं भवति।

भाषा भावाभिव्यक्तेः सर्वोत्तमं साधनं भवति। भाषा अनुकरणेन, अभ्यासेन च शिक्ष्यते। भाषायाः एताः विशेषताः संस्कृतभाषायामपि तथैव घटिताः भवन्ति यथा अन्यभाषासु। संस्कृतभाषायामधिकारं प्राप्तुं सहायकाः केचन सामान्यसिद्धान्ताः अत्र विचार्यन्ते।

1. स्वाभाविकतायाः सिद्धान्तः

भाषा काचित् जन्मजाता प्रवृत्तिर्भवति – अर्थात् भाषाध्ययनप्रवृत्तिः स्वाभाविकी भवति। शिशुः भाषां शिक्षितुम् उत्सुको भवति। यदि शैशवे एव संस्कृतशिक्षणस्य प्रयासः क्रियते तर्हि बालः विना प्रयासं संस्कृतमधीते। अस्मिन् वयसि बालकः कामपि भाषां शीघ्रमध्येतुं प्रभवति। संस्कृतभाषामध्यापयितुं विद्यालये तादृशं वातावरणं कल्पनीयं, येन छात्राः अनायासं संस्कृतं प्रति आकृष्टाः भवेयुः।

भाषाध्ययनस्य स्वाभाविकी प्रवृत्तिः संस्कृतशिक्षणेऽपि उपयुक्ता स्यात्। तदर्थं कक्ष्यायां, बहिश्च तादृशं वातावरणम् उत्पादनीयं, यत्र बालकाः संस्कृतं भाषितुं स्वभावतः प्रेरिताः स्युः। संस्कृताध्यापकाः सरलसंस्कृते स्वविचारान् अभिव्यञ्जयितुं

छात्रान् उत्साहितान् कुर्युः। संस्कृतश्लोकान्, सूक्तीश्च कण्ठस्थीकर्तुं छात्राः प्रेरिताः स्युः। कुड्येषु लिखिताः सूक्तयः, वर्णचित्राणि च छात्रान् संस्कृताध्ययनाय प्रेरयन्ति।

2. अभ्यासस्य सिद्धान्तः

भाषा काचित् कला भवति। अन्यकलास्विव भाषाध्ययनेऽपि अभ्यासस्यावश्यकता भवति। संस्कृतभाषा मातृभाषा न भवतीति हेतोः तत्र अभ्यासस्य महती आवश्यकता वर्तते। अभ्यासः मौखिकः, लिखितश्चेति द्विविधो भवति। तत्र निम्नलिखिताः विषयाः श्रद्धेयाः।

1. कठिनानां वर्णानामुच्चारणस्य, वाचनस्य च अभ्यासः। यथा— ऋ, ष, क्ष, ज्ञ इत्यादिवर्णाः।
2. पाठस्थशब्दानां, कठिनवाक्यानाञ्च उच्चारणस्य अभ्यासः।
3. व्याकरणसम्बद्धानां दोषाणां निवारणम्।
4. अक्षरविन्यासगतानाम् अशुद्धीनां निवारणम्।
5. सुभाषितानाम्, आभाणकानाञ्च सुष्ठु कथनस्य अभ्यासः।
6. पद्यानां, गद्यखण्डानाञ्च शुद्धोच्चारणेन वाचनस्याभ्यासः।
7. संस्कृतेन विचाराभिव्यक्तये भाषणस्याभ्यासः।

3. रुचेः सिद्धान्तः

विद्यालयस्य वातावरणं छात्राणां रुचिपूर्णं स्यात्। यदि छात्राः विद्यालये अधिकाधिकं कालं यापयन्ति तदैव तेषां भाषाध्ययनस्य अधिकः अवसरः भवति। यावत्पर्यन्तं छात्राणां संस्कृते अनुरागो न भवति तावत्पर्यन्तं संस्कृताध्ययनं सुष्ठु न प्रचलति। यतः संस्कृतं व्यावहारिकी भाषा न भवति, अतः तस्याः अध्ययनं विद्यालये एव सम्भवति। तथा च विद्यालये संस्कृताध्ययनं रुचिपूर्णं स्यात्। यदि संस्कृताध्ययनं रुचिकरं न भवति तदा छात्राः संस्कृताध्ययनं परित्यजन्ति।

अन्यविषयेष्विव संस्कृतशिक्षणेऽपि दृश्यश्रव्योपकरणान्युपयोक्तव्यानि। रेखाचित्राणां, मुद्रितचित्राणाञ्च उपयोगः कर्तव्यः। श्यामफलकस्योपयोगं यथोचितम् अधिकाधिकञ्च कुर्यात्। संस्कृतपाठ्यपुस्तकानि रोचकानि आकर्षकाणि च भवेयुः। संस्कृतश्लोकानां गानं रुचिरं स्यात्। क्रीडाविधेः प्रयोगः कर्तव्यः। संस्कृतगद्यस्य, पद्यस्य च व्याख्यानं सरलभाषया भवेत्। किञ्च संस्कृताध्यापकस्य संस्कृतशिक्षणे

अभिरुचिरत्यन्तावश्यकी। अध्यापकः छात्रैस्साकं स्नेहेन, सहानुभूत्या च व्यवहारं कुर्यात्। एवं संस्कृताध्यापनं रुचिकरं स्यात्।

4. सक्रियतायाः सिद्धान्तः

सक्रियतायाः सिद्धान्तः शिक्षणप्रक्रियायां सहायको भवति। निष्क्रियश्छात्रः शिक्षाग्रहणे मन्दगतिः भवति। सक्रियता मानसिकविकासे तीव्रगतिमादधाति। भाषाशिक्षणेऽपि छात्राणां सक्रियत्वसम्पादनम् अत्यन्तावश्यकं भवति।

संस्कृताध्यापकः सर्वदा स्वयमेव सर्वं न वदेत्। छात्राणामपि वक्तुमवसरं दद्यात्। सरलसंस्कृतेन स्वविचारान् वक्तुं छात्रान् प्रेरयेत्। पाठ्यविषये विविधान् प्रश्नान् प्रष्टुम् अवसरं कल्पयेत्। संस्कृतशिक्षणसम्बद्धासु पाठ्यसहगामिक्रियासु भागं स्वीकर्तुं, पुस्तकालयात् सरलसंस्कृतपुस्तकान्यादाय पठितुञ्च छात्रान् उत्साहयेत्।

5. मौखिककार्यस्य सिद्धान्तः

भाषाध्ययनस्य कार्यं श्रवणेन्द्रियेण, जिह्वया च आरभ्यते। शिशुः प्रारम्भे श्रवणस्य, भाषणस्य च अभ्यासं करोति। ततः परमेव वाचनं, लेखनञ्च स्यात्।

बालकः भाषायाः मौखिकं कार्यं प्रथमतः जानीयात्। अतः प्रारम्भावस्थायाम् एतादृशं मौखिकं कार्यं स्यात्, यत् बालकः व्यावहारिकशब्दावलिं, लोकोक्तीश्च शिक्षेत। छात्रः निष्क्रियः श्रोता न स्यात्, किन्तु मौखिकाभिव्यक्तिमपि कुर्यात्। एवञ्च छात्राः सक्रियाः भवन्ति। उच्चारणे शुद्धता भवति। व्याकरणस्य, अनुवादस्य च नियमाः अवगताः भवन्ति। रोचकविधिना भाषाज्ञानं प्राप्यते। लिखितकार्यं पूर्वाभ्यस्तमौखिककार्यस्य आधारेण स्याात्।

6. अनुपातस्य, क्रमस्य च सिद्धान्तः

भाषाशिक्षणस्य अनेकानि उद्देश्याानि सन्ति। केचित् विद्वांसः संस्कृतेन अभिव्यक्तिक्षमतां सर्वोत्तमम् उद्देश्यं मन्यन्ते, अपरे तु भावग्रहणक्षमताम्। सर्वाणि उद्देश्यानि, सर्वाणि व्यवहारपरिवर्तनानि युगपत् साधयितुं न शक्यन्ते। अतः कश्चन क्रमः आश्रयणीयः। आवश्यकतानुसारं प्राथमिकता निर्णेया। यदुद्देश्यं प्रथमं साधनीयं तत्र बलं प्रयोज्यम्।

संस्कृतभाषा व्यावहारिकी भाषा नास्ति। अतः अस्याः शिक्षणे अभिव्यक्त्यपेक्षया ग्रहणोद्देश्यस्य प्राथम्यं, प्राधान्यञ्च स्यात्। ततः परं तदपेक्षया

न्यूनं प्राधान्यं स्यादभिव्यक्तेः। तथैव संस्कृतशिक्षणे प्रथमं मौखिककार्यं, ततः लिखितकार्यञ्च भवेत्।

7. बहुमुखी सिद्धान्तः

अस्य सिद्धान्तस्य अभिप्रायस्तु एकस्य उद्देश्यस्य प्राप्त्यर्थं तत्सम्बन्धिषु सर्वेषु विषयेषु श्रद्धातव्यम्। अर्थात् प्रयासः बहुमुखः स्यात्। तस्य उद्देश्यस्य पूर्णतया प्राप्तिः स्यात्। उदाहरणार्थं यदि यण्सन्धिरध्येतव्यः तर्हि तदुद्देश्यपूरणाय निम्नोक्ताः विषयाः श्रद्धेयाः।

1. सरलानां विचारणीयानाम् उदाहरणानां प्रस्तुतिः। यण्सन्धेः सामान्यनियमस्य व्याख्यानम्।
2. उदाहरणानां, प्रत्युदाहरणानाञ्च प्रस्तुतीकरणेन सामान्यनियमस्य प्रमाणीकरणम्।
3. छात्राणां पाठ्यपुस्तके विद्यमानानामुदाहरणानां परिशीलनम्।
4. संस्कृतात् मातृभाषया अनुवादकार्ये यण्सन्धेः नियमस्य अनुसरणम्।

अस्मिन् विषये मौखिककार्येण साकं लिखितकार्यमपि सम्पादनीयम्।

8. स्वतन्त्रतायाः वैयक्तिकविभिन्नतायाश्च सिद्धान्तः

भाषायामधिकारं प्राप्तुं कक्षायाः, विद्यालयस्य, परिवारस्य च वातावरणं समीचीनं स्यात्। स्वतन्त्रवातावरणे छात्राणां जिज्ञासा तीव्रा भवति, तथा छात्राः आत्मप्रकाशनाय उन्मुखाः भवन्ति। वार्तालापः, चर्चा, पत्रव्यवहारः, वाद–विवादः इत्यादिमाध्यमैः बालकाः आत्मप्रकाशनं कुर्वन्ति। इत्थं भाषायामधिकारं प्राप्नुवन्ति। स्वतन्त्रवातावरणे एव ते किञ्चित् संस्कृतं भाषितुमारभन्ते।

स्वतन्त्रवातावरणे बालानां वैयक्तिकविभिन्नता श्रद्धातुं शक्यते। मनोविज्ञानानुसारं योग्यता, रुचिः, प्रवृत्तिः, अभिवृत्तिः, शारीरिकक्षमता, संवेगाः इत्यादीनामाधारेण बालकेषु विभिन्नता भवति। अध्यापकः कक्ष्यायां सर्वान् बालकान् विचिन्त्य बोधनं करोति। किन्तु भाषा एकं कौशलं भवति। अत्राधिकारप्राप्तिः वैयक्तिकक्षमतायाः आधारेणैव सम्भवति। भाषायोग्यता सर्वेषु समाना न भवति। अतः अध्यापकः वैयक्तिकभिन्नतायाः सिद्धान्तस्याधारेण शिक्षयेत्।

शिक्षणसूत्राणि
(Maxims of Teaching)

विभिन्नविषयाणामध्यापने उपयुक्तानि मनोवैज्ञानिकानि कानिचित् शिक्षणसूत्राणि सन्ति। अन्यविषयेष्विव संस्कृतशिक्षणेऽपि एतानि सूत्राणि प्रयोक्तुं शक्यन्ते।

छात्राणामवगमनरीतिं मनोविज्ञानसिद्धान्तानामाधारेण विश्लिष्य क्लिष्टानपि विषयान् सरलतया बोधयितुम् उपयुक्तानि कानिचित् शिक्षणसूत्राणि शिक्षातत्त्वज्ञैः निरूपितानि। संस्कृतशिक्षणे तेषामुपयोगः शिक्षणाधिगमप्रक्रियां फलवत्तरां करोति। अतः तेषां विवरणमत्र संक्षेपेण क्रियते।

1. ज्ञातादज्ञातं प्रति (From known to Unknown)—

छात्राणां पूर्वज्ञानस्य, पूर्वानुभवस्य चाधारेण नवीनपाठस्य, विषयस्य वा अध्यापनमत्रान्तर्भवति। प्रतिदिनं नवार्जितं ज्ञानम् अन्यस्मिन् दिने नवीनपाठस्य कृते पूर्वज्ञानं भवति। छात्राः अनेकव्यक्तीनां, स्थानानाञ्च नामानि जानन्ति। परन्तु छात्राः एतन्न जानन्ति यत् व्याकरणे नाम्नां संज्ञा इति व्यवहारो भवति। तथैव संज्ञानां स्थाने प्रयुज्यमानाः शब्दाः सर्वनामानि भवन्तीति ते न जानन्ति। एवं व्याकरणपाठे छात्राणां पूर्वानुभवस्याधारेण नूतनविषयाणामध्यापनं सुकरं भवति।

छात्राणां पूर्वज्ञानं, पूर्वानुभवाश्च नूतनज्ञानप्राप्तौ भूमिकायन्ते। पूर्वज्ञानेन सम्बन्धं विना नूतनज्ञानस्य मस्तिष्के प्रवेशो न भवति। अतः साहचर्यनियमान् आश्रित्य (समानतानियमः, विरोधनियमः, समीपतानियमः) नूतन ज्ञानस्य पूर्वज्ञानेन सह सम्बन्धः कल्पनीयः। इतिहासपाठेषु प्राचीनकालिकघटनाः वर्ण्यन्ते। वर्तमानकाले छात्रैः ज्ञाताः याः घटनाः सन्ति तासामाधारेण इतिहासस्य विषयाः बोधनीयाः। कवयः लोकप्रसिद्धं सादृश्यमादाय उपमालङ्कारप्रयोगेण अज्ञातान् विषयान् वर्णयन्ति। एवमध्यापकः प्रस्तावनासोपाने छात्राणां पूर्वज्ञानेन साकम् अध्येतव्यस्य नूतनविषयस्य सम्बन्धं स्थापयति। तेन अज्ञातः नूतनविषयः बुद्धिग्राह्यः भवति।

2. सरलात् कठिनं प्रति (From Simple to Complex)—

इदं सूत्रं पूर्वोक्तसूत्रेण साकं सादृश्यं भजते। ज्ञातविषयः सरलो भवति, अज्ञातश्च कठिनः। अध्यापकः सरलविषयं प्रथमं पाठयेत्, ततः परं कठिनम्। संस्कृतशिक्षणे सरलानि, लघूनि वाक्यानि प्रथमं पाठयेत्, तदनन्तरं कठिनानि,

दीर्घाणि वाक्यानि। उपमालङ्कारं पाठयित्वा रूपकालङ्कारं पाठयेत्। अनुष्टुभोऽनन्तरम् उपजातिं, मन्दाक्रान्ताञ्च बोधयेत्।

प्रथमं सरलविषयं प्रस्तूय अध्यापकः क्रमशः जटिलविषयान् बोधयेत्। यथा गणितस्य बोधने प्रथमं वस्तूनां गणनेन अङ्कानां बोधनं क्रियते। ततः क्रमशः अङ्कानां सङ्कलनं, व्यवकलनं, गुणनं, विभजनम् इत्यादयः जटिलप्रक्रियाः बोध्यन्ते।

3. स्थूलात् सूक्ष्मं प्रति (From Concrete to Abstract)—

किमपि कार्यं प्रथमं स्थूलवस्तुभिः प्रारब्धव्यं, ततः सूक्ष्मं प्रति प्रस्थातव्यम्। व्याकरणस्य सूक्ष्मनियमानामध्यापनाय प्रथमं व्यावहारिकाणि, पाठ्यपुस्तकीयानि वा उदाहरणानि प्रस्तोतव्यानि। संस्कृतशिक्षणे स्थूलानि वस्तूनि प्रदर्श्य, तेषां नाम, स्वरूपं, स्वभावश्च क्रमशः वर्णनीयम्। कन्दुकं प्रदर्श्य 'अयं कन्दुकः' इति वक्तव्यम्। तथैव पठामि, लिखामि, चलामि इत्यादिक्रियाः अभिनयेन प्रदर्शयितुं शक्यन्ते। वर्णनात्मकनिबन्धानां बोधनात्परं भावात्मकनिबन्धाः बोधनीयाः। यतः वर्णनात्मकनिबन्धाः स्थूलवस्तुभिः सम्बद्धाः भवन्ति, भावात्मकनिबन्धाश्च सूक्ष्मभावैः।

स्थूलानि वस्तूनि इन्द्रियगोचराणि भवन्ति। अतः तेषां ज्ञानं सुलभं स्यात्। परन्तु सङ्केताः, सङ्कल्पाः, भावाः, सिद्धान्ताः, दार्शनिकविषयाः, अमूर्तपदार्थाश्च मनोमात्रगम्याः विशेषेण बोधनीयाः भवन्ति। छात्राः—'कदलीफलं नेत्रेन्द्रियेण दृश्यते' इति वदन्ति। तदा अध्यापकः बोधयति—'नेत्रेन्द्रियेण कदलीफलस्य वर्णः, आकाराश्च गृह्येते। त्वगिन्द्रियेण तस्य मृदुत्वं, श्लक्ष्णता, सान्द्रता च ज्ञायन्ते। घ्राणेन्द्रियेण तस्य गन्धः ज्ञायते। रसनेन्द्रियेण तस्य रुचिः ज्ञायते। एवं विभिन्नैरिन्द्रियैः गृहीतान् गुणान् सङ्कलय्य मनः 'कदली' इति पदार्थं सङ्कल्पयति। अतः द्रव्यस्य ज्ञानं मनसा भवति, न तु नेत्रेन्द्रियेण' इति। इत्थं स्थूलज्ञानस्याधारेण सूक्ष्मभावानां बोधनं भवति।

4. पूर्णादंशं प्रति (From Whole to Parts)—

बालः प्रथमं समग्रं वस्तु पश्यति, ततः परमेव तस्य दृष्टिः अवयवेषु गच्छति। अयमस्य स्वभावः। अतः मनोवैज्ञानिकदृष्ट्या विवेचनीयस्य विषयस्य, वस्तुनो वा समग्रं रूपं प्रथममुपस्थापनीयं, ततः परं तस्य सूक्ष्मांशानां विवेचनं कर्तव्यम्।

मनोविज्ञानानुसारं दृष्टस्य पदार्थस्य पूर्णाकृतिमेव मनः गृह्णाति। अतः

अध्यापकः छात्राणां पुरस्तात् बोधनीयस्य विषयस्य पूर्णाकृतिमुपस्थाप्य ततः विशेषांशानां विवरणं कुर्यात्। यथा वृक्षशास्त्रे कस्यापि वृक्षस्य पूर्णाकृतिं प्रदर्श्य क्रमशः तस्य मूलं, शाखाः, पत्राणि, पुष्पाणि, फलानि, पत्राणामाकृतिविशेषः, वृक्षस्य परिवारनिर्णयः इत्येतादृशान् विषयान् बोधयेदध्यापकः। एवं पूर्णादारभ्य अंशानां बोधनं अधिगमप्रक्रियां सरलीकरोति।

5. अनुभवात् तर्कं प्रति (From Empirical to Rational)—

छात्रैरनुभूताः विषयाः शिक्षणस्य आधाराः स्युः। अनुभूतविषयाणामाधारेण लब्धं ज्ञानं स्पष्टं, स्थिरञ्च भवति। उद्यानविषयकः पाठः उद्यानसम्बद्धानां छात्राणां पूर्वानुभवानामाधारेण पाठयितव्यः। तथा च 'होलिकोत्सव' इति पाठः होलीसम्बद्धानां पूर्वानुभवानामाधारेण पाठनीयः।

अनुभवेन लब्धं ज्ञानं, तर्कसङ्गतमपि भवति चेत् छात्राणां चिन्तशक्तेः विकासः भवति। यथा—प्रकाशे चक्षुरिन्द्रियेण वस्तूनि गृह्यन्ते इत्यनुभवसिद्धम्। सूर्यस्य, दीपस्य वा प्रकाशः पदार्थेषु पतितः परावर्त्य यदा चक्षुरिन्द्रियं प्राप्नोति तदा तेषां पदार्थानां ज्ञानं भवति। पदार्थस्य चक्षुरिन्द्रियस्य च मध्ये यदि प्रकाशस्य कोऽपि अवरोधो भवति चेत् स पदार्थों न दृश्यते। इत्थं पदार्थप्रत्यक्षे प्रकाशः कारणमिति अनुभवसिद्धं ज्ञानं युक्ति-युक्तं बोधनीयमध्यापकेन।

कदाचित् अनुभवसिद्धं ज्ञानं तर्कविरुद्धं भवति चेत् तर्कसङ्गतमेव ग्राह्यं भवति। यथा—सूर्यः भूमिं परितः भ्रमतीति अनुभवसिद्धमपि ज्ञानं न ग्राह्यं, भूमिः सूर्यं परितः भ्रमतीति सहेतुकं निरुपितत्वात्। एवं छात्राणां पूर्वानुभवानामाधारेण युक्तियुक्तस्य यथार्थज्ञानस्य बोधनं शिक्षकस्य कर्तव्यं भवति।

6. विशेषात् सामान्यं प्रति (From Particular to General)—

अत्र प्रथममुदाहरणानि प्रस्तूयन्ते, ततः परं सामान्यनियमः बोध्यते। व्याकरणशिक्षणे अस्य सूत्रस्य विशेषोपयोगो वर्तते। लक्ष्याणां परिशीलनेन लक्षणस्य निर्माणं छात्राणां सुबोधं, रुचिकरञ्च भवति।

केषाञ्चित् विशिष्टोदाहरणानां बोधनेन अध्यापकः सामान्यनियमं बोधयति। लक्ष्याणां, दृष्टान्तानाञ्च विवेचनेन लक्षणस्य, सिद्धान्तस्य वा परिकल्पनं छात्राणां चिन्तनक्रमम् अनुसरति। यथा—उपरि प्रक्षिप्तः कन्दुकः भूमौ पतति, उपरि प्रक्षिप्तः

शिलाखण्डः भूमौ पतति, उपरि प्रक्षिप्तं फलं भूमौ पतति। एतेषां दृष्टान्तानामाधारेण सामान्यनियमः बोध्यते—'उपरि प्रक्षिप्तं किमपि वस्तु भूमौ पतति' इति।

'उदाहरणेभ्यो नियमं प्रति' (From examples to rule) इति शिक्षणसूत्रम्, आगमनविधिश्च (Inductive Method) अत्रैव अन्तर्भवन्ति।

7. विश्लेषणात् संश्लेषणं प्रति (From Analysis to Synthesis)—

सूत्रमिदं 'पूर्णादंशं प्रति' इत्यस्य विपरीतं भवति। अत्र प्रथमं विषयस्य विभिन्नाः अंशाः पृथक् पृथक् पाठ्यन्ते, ततः तेषामंशानां संश्लेषणेन समग्रं स्वरूपं बोध्यते। वाक्यरचनाः, सन्धयः, समासाः, प्रकृतिप्रत्ययज्ञानमित्यादिविषयाणां बोधने अस्य सूत्रस्य उपयोगो निर्विवादः।

प्रथमं विश्लिष्टानंशान् पृथक् पृथक् बोधयित्वा ततः तेषां संश्लेषणेन पूर्णस्य ज्ञानमुत्पादयेत्। यथा वाक्ये पदानां, पदे प्रकृतिप्रत्यययोश्च विश्लेषणेन पृथक्–पृथक् तेषामर्थं प्रतिपाद्य, ततः तेषामर्थानां समन्वयेन शाब्दबोधं प्रतिपादयेदध्यापकः। एवञ्चेत् छात्राः अवगमने क्लेशं नानुभवेयुः।

8. अनिश्चितात् निश्चितं प्रति (From Indefinite to Definite)—

प्रारम्भे बालानां विभिन्नवस्तूनां ज्ञानम् अनिश्चितम्, अस्पष्टञ्च भवति। तत् निश्चितं, स्पष्टञ्च कर्तुमेतत्सूत्रमनुसरणीयम्। छात्राः रामशब्दस्य, फलशब्दस्य च रुपाणि सर्वासु विभक्तिषु समानानीति चिन्तयन्ति। अध्यापकः तत्र भेदं स्पष्टीकुर्यात्। एवं संस्कृतशिक्षणस्य अन्यविषयेष्वपि छात्राणामनिश्चिते ज्ञाने निश्चितत्वं सम्पादयेत्।

शास्त्राणामध्यापनसमये निर्वचनैः, नियमैः, सिद्धान्तैश्च तेषां विचाराणां स्पष्टप्रतिपत्तिः सम्पादनीया। यथा—कान्ति किरणाः जलेऽपि प्रयान्तीति छात्राः जानन्ति। किरणाः यदा जले प्रयान्ति तदा वक्रीभवतन्तीति प्रयोगस्य प्रदर्शनेन अध्यापकः छात्रेषु निश्चितं ज्ञानमुत्पादयेत्। एवमनिश्चितात् ज्ञानात् निश्चितं ज्ञानं प्राप्नुवन्ति छात्राः। अध्यापकः एतत् शिक्षणसूत्रं विषयानुसारं प्रयोजयेत्।

9. सामान्यात् विशेषं प्रति (From General to Particular)—

पूर्वसूत्रस्य विपरीतं भवतीदं शिक्षणसूत्रम्। यदि सामान्यनियमः सिद्धान्तो वा सरलः, सुग्राह्यश्च भवति तदा नियमस्य बोधनान्तरम् उदाहरणानि प्रस्तूयन्ते। यथा—'जले निक्षिप्तं किमपि भारवत् वस्तु अधस्तलं गच्छति' इति सामान्यनियमं प्रस्तूय, विशेषरूपेण शिलाखण्डः, अय ≍ खण्डः, अङ्गुलीयकं वा जले निक्षिप्यते

चेत् अधस्तलं गच्छतीति बोध्यते। लक्षणं प्रथमं व्याख्याय अनन्तरं लक्ष्याणि प्रदर्श्यन्ते। लक्ष्येषु लक्षणस्य समन्वयः क्रियते। एवञ्च 'नियमात् उदाहरणं प्रति' (From rule to example) इति शिक्षणसूत्रमत्रैव अन्तर्भवति। 'मनुष्यः मरणशीलः, सुकरातः कश्चन मनुष्यः, अतः सः मरणशीलः' इति निगमन विधिरपि (Deductive Method) इदमेव सूत्रमनुसरति।

10. मनोवैज्ञानिकात् तार्किकं प्रति (From Psychological to Logical)—

मनोविज्ञानस्य सिद्धान्तानाामाधारेण बालकस्य योग्यताम्, आसक्तिम्, आवश्यकताञ्च आश्रित्य पाठ्यविषयस्य चयनं, निर्माणं वा कर्तव्यम्। पाठ्यविषयस्य बोधनाय उपयुज्यमानाः विधयः, प्रविधयः, उपकरणानि च तर्कसङ्गतानि स्युः। 'अभिक्रमितानुदेशनम्' (Programmed Insturction) अस्य प्रमुखमुदाहरणं भवति।

संस्कृताध्यापकाः यदा एतान् सिद्धान्तान् संस्कृताध्यापने अनुसरन्ति तदानीमेवैतेषां सार्थक्यं सम्पद्यते।

✤✤✤

षष्ठोऽध्यायः

संस्कृतशिक्षणपद्धतयः

भारते वैदिककालादारभ्य संस्कृतशिक्षणस्य काचित् पद्धतिः प्रचलिता वरीवर्ति। आङ्गलेयानां शासनकाले पाश्चात्यशिक्षणप्रणाली भारतेऽपि प्रवर्तिता अभवत्। ततः परं मनोविज्ञानस्य प्रभावेण शिक्षणे बहुविधं परिवर्तनं जातम्। शिक्षणप्रक्रियायां वैयक्तिकभेदाः, रुचिः, ग्रहणशक्तिः इत्यादीनां स्थानमकल्प्यत। तथा च शिक्षणं छात्रकेन्द्रितं विधातुं नूतनानां पद्धतीनाम्, उपकरणानाञ्च प्रयोगेण प्रयत्नाः अक्रियन्त। फलतः संस्कृते आधुनिकशिक्षणपद्धतीनां समावेशोऽभवत्।

संस्कृतशिक्षणस्य प्राचीननवीनपद्धतीनामत्र संक्षेपेण विवरणं क्रियते।

1. पाठशालापद्धतिः (Traditional Method)

प्राचीनभारतस्य शिक्षणपद्धतिरियं संस्कृतशिक्षणस्य प्राचीनतमा पद्धतिर्भवति। गुरुकुलेषु, आश्रमेषु, मठेषु, विद्यापीठेषु, पाठशालासु च आश्रिता पद्धतिरियम् अद्यापि भारते कासुचित् संस्थासु अनुवर्तते। परम्परागतरूपेण आश्रीयमाणत्वादियं पारम्परिकपद्धतिरित्यप्युच्यते। गुरुकुलपद्धतिरित्यपि अस्या एव नामान्तरं वर्तते। पाठशालापद्धतौ संस्कृतशिक्षणे व्याकरणस्य प्राधान्यात् केचिदिमां पद्धतिं व्याकरणपद्धतिरिति नाम्ना व्यवहरन्ति। पण्डितानां निर्माणाय पण्डितैरादृतत्वात् पण्डितपद्धतिरिति चैषा कथ्यते।

अस्यां पद्धतौ संस्कृतशिक्षणस्य प्रारम्भे शब्दरूपाणां, समासचक्रस्य, अमरकोशस्य च कण्ठस्थीकरणमावश्यकं भवति। ततः काव्यानामध्ययनसमये शब्दसाधुत्वप्रतिपादनाय, अर्थनिर्धारणाय च व्याकरणसूत्राणां बोधनं क्रियते। तदनन्तरं वेदानां, वेदाङ्गानां, शास्त्राणाञ्च कूलङ्कषमध्ययनं क्रियते। अत्र शिक्षणं सर्वं मौखिकमासीत्। कण्ठस्थीकरणस्य, स्मरणस्य च महत्त्वमधिकं भवति।

पाठशालापद्धतेः गुणाः

1. अस्यां पद्धतौ गुरुशिष्यसम्बन्धः दृढः, स्नेहपूर्णश्च भवति।
2. छात्राणां व्यक्तित्वस्य, सच्चारित्र्यस्य च निर्माणे पद्धतिरियं समर्था भवति।
3. परम्परागतस्य सर्वस्यापि ज्ञानस्य संरक्षणं, विस्तरणं, प्रचारणञ्च प्रधानं लक्ष्यं भवति।
4. भारतीयसंस्कृतेः संरक्षणे समर्था पद्धतिरियम्।
5. अनया पद्धत्या अधीताः छात्राः संस्कृतभाषायाः शुद्धं, विस्तृतं स्वरूपं जानन्ति।
6. विपुलानां, जटिलानाञ्च शास्त्राणां गम्भीराध्ययने इयमेव पद्धतिरत्यन्तमुपयुक्तेति अनुभवेन ज्ञायते।
7. अनया पद्धत्या अधीतानां छात्राणां शास्त्रपाण्डित्यं पूर्णं, परिनिष्ठितञ्च भवति।

पाठशालापद्धतेः दोषाः

1. पद्धतिरियं मनोविज्ञानसिद्धान्तानां प्रतिकूला वर्तते। बालकानां मानसिकक्षमताः, रुचिभेदाश्च उपेक्षिताः भवन्ति। विषयकेन्द्रितं शिक्षणमासीत्।
2. इयं पद्धतिः नीरसा, निष्क्रिया च भवति। शुष्कव्याकरणस्य प्राधान्यात् छात्राः क्लेशमनुभवन्ति।
3. शिक्षणस्य मौखिकत्वात् भाषायाः विभिन्नानि कौशलानि न परिगण्यन्ते।
4. कण्ठस्थीकरणस्य, स्मरणस्य च प्राधान्यात् बालकानां व्यक्तित्वविकासः अवरुद्धो भवति। कल्पनाशक्तेः, चिन्तनशक्तेश्च ह्रासो भवति।
5. बौद्धिकविकासस्य प्राधान्यात् शारीरिकविकासः, मानसिकविकासः, सामाजिकविकासश्च कुण्ठितो भवति।
6. प्राचीनरीत्या प्राचीनविषयाणामध्ययनेन छात्राः आधुनिकविज्ञानात्,

व्यावहारिकज्ञानाच्च वञ्चिताः भवन्ति। फलतः जीविकोपार्जने असमर्थाः भवन्ति।

7. एकस्यैव विषयस्य दीर्घकालं, भूरिपरिश्रमेण अध्ययनेन छात्राणां ज्ञानं तस्मिन्नेव क्षेत्रे सीमितं सङ्कुचितञ्च भवति।

निष्कर्षः

पाठशालापद्धतिः इदानीमपि मठेषु, आश्रमेषु पाठशालासु च प्रचलिता वर्तते। मनोविज्ञानसिद्धन्तानाम् अनुसरणाभावेऽपि अस्याः पद्धतेः महत्त्वमस्ति। अनुभवेन ज्ञायते यदनया पद्धत्या उत्कृष्टाः पण्डिताः, उत्तमाः विद्वांसः, कवयश्च निर्मिताः अभवन्। अस्याः पद्धतेः आवश्यकतानुसारं परिवर्तनेन छात्राणां हितं सम्पादयितुं शक्यते।

1. अत्यन्तापेक्षितं व्याकरणं भाषाद्वारा, साहित्यद्वारा च बोधनीयम्।
2. शिक्षणं मनोविज्ञानानुसारं भवेत्।
3. कण्ठस्थीकरणस्य परिहारेण वैज्ञानिकपद्धतिः आश्रयणीया।
4. आधुनिकविषयाणां समावेशः स्यात्।
5. सामाजिकविकासाय पाठ्यान्तरक्रियाः भवेयुः।
6. दृश्यश्रव्योपकरणानां साहाय्येन शिक्षणं रुचिकरं प्रयोजनकरञ्च विधातव्यम्।

एवं संशोधने कृतेऽपि इयं पद्धतिः विद्यालयेषु, महाविद्यालयेषु च आश्रयणयोग्या न भवति, यतः तत्र संस्कृतात् भिन्नाः अनेके विषयाः अध्येतव्याः भवन्ति। तथापि आश्रमेषु, पाठशालासु च भारतीयसंस्कृतेः, साहित्यस्य च संरक्षणाय इयं पद्धतिः नितरामुपयुक्ता भवति।

2. भण्डार्कर्पद्धतिः (Bhandarkar Method)

पाश्चात्यदेशेषु ग्रीक्, लाटिन् इत्यादिप्राचीनभाषाणामध्ययनाय काचित् पद्धतिः विकसितासीत्। भारते आङ्ग्लेयानां शासनकाले विद्यालयेषु, महाविद्यालयेषु च पाश्चात्यरीत्या विषयाणामध्ययनं प्रारभ्यत। तदा महाविद्यालयेषु संस्कृताध्ययनस्य अवसरः अकल्प्यत। पाश्चात्यविद्वांसः संस्कृतसाहित्यं, व्याकरणञ्च अधीत्य पाश्चात्यरीत्या विश्लेषणं कृत्वा अनेकान् ग्रन्थानरचयन्। डॉ. रामकृष्णगोपालभण्डार्करः पाश्चात्यप्रणलीमाश्रित्य संस्कृतभाषाध्ययनाय काञ्चिन्नवीनां पद्धतिमाविश्चकार। तस्यैव

नाम्ना पद्धतिरियं भण्डार्कर्पद्धतिरिति प्रसिद्धिमलभत। व्याकरणस्य, अनुवादस्य च प्राधान्यादेषा पद्धतिः व्याकरणानुवादपद्धतिरित्यपि व्यवह्रियते। महाविद्यालयेषु संस्कृताध्यापनाय पद्धतिरसौ उपकारिकाभवत्।

भण्डार्कर् महोदयेन पुस्तकद्वयं विरचितं 1 मार्गोपदेशिका, 2 संस्कृतमन्दिरान्तःप्रवेशिका इति च। आङ्गलभाषामाध्यमेन रचितमिदं ग्रन्थद्वयं सरलतया संस्कृतभाषां, व्याकरणञ्च अध्येतुं छात्राणामुपकारकमभूत्।

प्रथमपुस्तके 31 पाठाः, द्वितीयपुस्तके 26 पाठाश्च सन्ति। प्रत्येकं पाठेषु चत्वारः भागास्सन्ति।

(क) व्याकरणपाठः—संस्कृतव्याकरणस्य सोदाहरणव्याख्या, अभ्यासश्च।

(ख) संस्कृतादाङ्गलभाषया अनुवादस्य अभ्यासः।

(ग) आङ्गलभाषायाः संस्कृतेनानुवादस्य अभ्यासः।

(घ) शब्दकोषः—अनुवादाभ्यासाय सहायकानां शब्दानां निर्देशः।

प्रौढाः छात्राः एतान् पाठान् पठित्वा स्वयमेव संस्कृतमध्येतुं प्रभवन्ति।

भण्डार्कर्पद्धतेः गुणाः

1. अस्यां पद्धतौ कण्ठस्थीकरणस्य अपेक्षया छात्राणां विचारशक्तेः जागरणं क्रियते।
2. अनावश्यकानां व्याकरणनियमानां परित्यागेन, अपेक्षितानां सरलरीत्या प्रस्तावेन संस्कृताध्ययने छात्राणां सौकर्यं भवति।
3. विषयाणां वर्गीकरणेन क्रमिकः विन्यासः अध्ययनकाठिन्यं निवारयति।
4. व्याकरणकार्याणाम्, अनुवादस्य च अभ्यासेन भाषा स्वाधीना भवति।
5. अस्यां पद्धत्यां 'ज्ञातादज्ञातं प्रति', 'सरलात् कठिनं प्रति' 'अभ्यासद्वारा अधिगमः' इत्यादिमनोवैज्ञानिकसिद्धान्ताः उपयुक्ताः सन्ति।
6. आङ्गलभाषाभिज्ञाः छात्राः अल्पेन कालेन, स्वाध्यायेन च संस्कृतस्य सामान्यज्ञानं प्राप्तुं प्रभवन्ति।

भण्डार्कर्पद्धतेः दोषाः

1. इयं पद्धतिः विद्यालयेषु बालकानां संस्कृतभाषाध्यापनाय नोपयुज्यते, यतोऽत्र व्याकरणस्य अनुवादस्य च महत्त्वमस्ति, न तु भाषायाः।

2. भाषायाः विभिन्नानि कौशलानि अत्र उपेक्षितानि। यथा—उच्चारणं, भाषणं, वाचनं, लेखनमित्यादीनि।

3. व्याकरणम्, अनुवादश्च बालकानां कृते अरोचकः, नीरसश्च विषयो भवति।

4. गद्यं, पद्यं, नाटकं, निबन्धः इत्यादयः साहित्यप्रकारा अत्र न सन्ति। तथा च भाषायाः वास्तविकं स्वरूपं न ज्ञायते।

5. शब्दसौन्दर्यस्य,अर्थचमत्कारस्य, रसानन्दस्य वा अत्र स्थानं नास्ति।

निष्कर्षः

एतां पद्धतिमाश्रित्य भारते अनेके पण्डिताः प्रादेशिकभाषास्वपि संस्कृताध्ययनाय ग्रन्थानरचयन्। एते ग्रन्थाः विकसितमतीनां, बुद्धिमतां प्रौढानां छात्राणामुपकारकाः भवन्ति। महाविद्यालयेषु काव्यादिभिस्साकमेतेषां ग्रन्थानामध्ययनं छात्राणां संस्कृतज्ञानं विस्तारयति। परन्तु विद्यालयेषु बालकानां प्रारम्भिकस्तरे संस्कृतभाषाध्यापनाय नेयं पद्धतिरत्यन्तमुपयुज्यते। तथापि माध्यमिकस्तरे व्याकरणस्य, अनुवादस्य च अभ्यासः तेषां संस्कृतभाषाज्ञाने परिनिष्ठितत्वं सम्पादयति।

3. पाठ्यपुस्तकपद्धतिः (Text book Method)

अधुना भारते विद्यालयेषु, महाविद्यालयेषु च भाषाणां, वैज्ञानिकविषयाणाञ्च अध्यापनाय पाठ्यपुस्तकपद्धतिः प्रचलिता, लोकप्रिया च वर्तते। शिक्षाशास्त्रिणां, मनोवैज्ञानिकानां, विदुषाञ्च निरन्तरपरिश्रमेण निष्पन्नेयं पद्धतिः बालकानां विषयाध्ययने नितरामुपकारिणी भवति। छात्राणां वयः, मानसिकक्षमताः, वैयक्तिकभेदाः, सामाजिकावश्यकताः, जीवनपरिष्ठितयश्च अत्र परिगण्यन्ते।

भाषायाः वाचनकौशलस्य विकासेन छात्राः अध्ययनस्य प्रयोजनमनुभवन्ति। पाठ्यपुस्तकानामध्ययनेन लब्धं ज्ञानं भाविजीवने विस्तृताध्ययनाय उपकरोति। यदि केनापि कारणेन बालकः अध्ययनमसमाप्य विद्यालयं परित्यजति, तथापि सः अधीतस्य प्रयोजनं लब्धुं शक्नोति। एतदेव अस्याः पद्धतेः प्रत्यर्पणमूल्यम् (Surrender Value) इति डॉ. वेस्ट महोदयेन वर्ण्यते। भाषणात्, लेखनात् च वाचनस्य सरलत्वादियं पद्धतिः सुलभा, लाभप्रदा च। संस्कृतशिक्षणाय निर्मितेषु पाठ्यपुस्तकेषु वर्णमालायाः आरभ्य पदानि, वाक्यानि, अनुच्छेदाश्च भवन्ति। गद्यं,

पद्यं, नाटकं, निबन्धः इत्यादयः सरलभाषया रच्यन्ते। बालकानां रोचकाः विषयाः क्रमेण सरलात् कठिनं प्रति विभिन्नेषु पाठेषु विन्यस्यन्ते। अत्र कठिनशब्दानामर्थाः विशेषांशानां विवरणं, मूल्याङ्कनप्रश्नाः, व्याकरणस्य, अनुवादस्य चाभ्यासाः, अध्यापकानां कृते सूचनाश्च अन्तर्भवन्ति। एवं पाठ्यपुस्तकमिदं स्तरानुगुणं, समयानुसारम् अपेक्षितपरिमाणेन संस्कृतमध्यापयितुमुपयुज्यते।

अस्यां पद्धतौ अध्यापकः संस्कृतपाठस्य आदर्शवाचनं कृत्वा, छात्रैः अनुवाचनं कारयति। शब्दार्थं, वाक्यार्थञ्च मातृभाषायां बोधयति। प्रसङ्गानुसारं व्याकरणविषयान् ज्ञापयति। अत्र सर्वं शिक्षणं पाठ्यपुस्तककेन्द्रितं भवति। परीक्षापि पाठ्यपुस्तकस्याधारेणैव भवति।

पाठ्यपुस्तकपद्धतेः गुणाः

1. अनया पद्धत्या छात्राणामुच्चारणसौष्ठवं वाचनकौशलञ्च सम्पाद्यते।
2. शीघ्रवाचनस्य, अर्थग्रहणस्य च अभ्यासो भवति।
3. विस्तृताध्ययनाय प्रेरणा भवति।
4. विषयसामग्र्याः पाठ्यपुस्तकरूपेण सुलभत्वात् अध्यापकानां, छात्राणाञ्च सौकर्यं भवति।
5. अल्पेन समयेन अधिकसंख्याकाः छात्राः अध्यापयितुं शक्यन्ते।
6. पाठ्यपुस्तकद्वारा अध्यापनेन संस्कृतशिक्षणप्रक्रियायां नियमितता, समरूपता च सिद्ध्यति।
7. केनापि कारणेन कक्ष्यायामनुपस्थितोऽपि छात्रः गृहे पाठान् स्वयमध्येतुं प्रभवति।

पाठ्यपुस्तकपद्धतेः दोषाः

1. भाषणं भाषायाः जीवत्स्वरूपं भवति। अत्र वाचनस्यैव प्राधान्यात् बालकैः संस्कृतस्य यथार्थं स्वरूपं न ज्ञायते।
2. वाचनात्पूर्वं मौखिककार्यद्वारा बालकाः भाषां सरलतया अध्येतुं प्रभवन्ति। अनेके शब्दाः, व्याकरणनियमाश्च भाषणद्वारा गृह्यन्ते। अत्र भाषणस्यावसरो नास्ति।

3. भाषाशिक्षणे श्रवणकौशलस्य प्राधान्यमस्ति। अत्र भाषितभाषायाः श्रवणस्यावकाशो नास्ति।
4. अनुवादविधिना अध्यापनेन छात्राणां विषयज्ञानन्तु सम्भवति, परन्तु भाषायामधिकारो न सिध्यति।
5. पाठ्यपुस्तके विषयस्य सीमितत्वात् बुद्धिमतां छात्राणां व्यापकाध्ययनस्य अवसरो नास्ति।
6. अनुवादविधौ छात्राणां सक्रियत्वाभावात् तेषां विचारशक्तेर्विकासो न भवति। ते यथाश्रुतग्राहिणो भवन्ति।
7. लिखितपरीक्षाद्वारा भाषाज्ञानस्य मूल्याङ्कनेन छात्राः विषयान् कण्ठस्थीकृत्य लेखितुं प्रेरिताः भवन्ति।
8. छात्राः परीक्षासु मातृभाषायां प्रश्नानामुत्तराणि लिखन्ति। तथा च संस्कृतभाषाज्ञानादपि विषयज्ञानस्य प्राधान्यं भवति। एवञ्च छात्राः संस्कृतेन किमपि वक्तुं, लेखितुं, वा असमर्थाः भवन्ति।

निष्कर्षः

संस्कृतशिक्षणे पाठ्यपुस्तकपद्धत्याः महत्त्वं निराकर्तुं न शक्यते। अत्र ये दोषाः दृश्यन्ते, तेषां निवारणं संस्कृताध्यापकेन कर्तुं शक्यते। यदि संस्कृताध्यापकः कक्ष्यायाः सामान्यव्यवहारं संस्कृतभाषया सम्पादयति, छात्रानपि संस्कृतं भाषितुं प्रेरयति, तदा मौखिककार्यद्वारा श्रवणकौशलं, भाषणकौशलञ्च उत्पादयितुं प्रभवति। ततः परं पाठ्यपुस्तकस्याधारेण वाचनकौशलं, लेखनकौशलञ्च सम्पादयेत्। एवमाधुनिकमूल्याङ्कनविधीनामाश्रयणेन, परीक्षाविधानस्य परिवर्तनेन च अन्ये दोषाः निवारयितुं शक्यन्ते। भाषणस्य कृते, वाचनस्य कृते च परीक्षायामङ्काः निर्धारिताः भवेयुः। तदानीं पाठ्यपुस्तकविधिः संस्कृतशिक्षणस्य सम्पूर्णविधिर्भवितुमर्हति।

4. प्रत्यक्षपद्धतिः (Direct Method)

या भाषा अध्यापनीया सा तस्याः माध्यमेनैव बोधनीया। एषैव प्रत्यक्षपद्धतिरित्युच्यते। शिशोः मातृभाषायाः अध्ययने एषैव स्वाभाविकी प्रक्रिया भवति। तत्र अन्यस्याः भाषायाः प्रयोगो न भवति। एवमेषा मातृपद्धतिः (Mother's Method) इत्यपि व्यवहारमर्हति। अनया पद्धत्या संस्कृतं संस्कृतमाध्यमेनैव

पाठ्यते। अधुना भारते आङ्ग्लमाध्यमविद्यालयेषु, बालोद्याने (Kindergarten Schools) च आङ्ग्लभाषायाः अध्यापने पद्धतिरियं विस्तृतरूपेण उपयुज्यते।

अस्यां पद्धत्यां पदपदार्थयोः, विचाराभिव्यक्त्योः, अनुभवभाषयोश्च मिथः साक्षात् सम्बन्धः स्थाप्यते। संस्कृतमयवातावरणस्य निर्माणेन, निरन्तरं संस्कृतभाषायाः प्रयोगेण छात्राः अनायासं संस्कृतं शिक्षन्ते। स्थूलवस्तूनां, चित्राणां, प्रतिकृतीनाञ्च प्रदर्शनेन, अभिनयेन च पदानां वाक्यानाञ्च अर्थबोधनं क्रियते। छात्राः संस्कृतस्य श्रवणेन भाषणेन च श्रवणकौशलं भाषणकौशलञ्च प्राप्नुवन्ति। श्रवणेन्द्रियस्य, जिह्वेन्द्रियस्य च प्रशिक्षणेन भाषा स्वायत्ता भवति। अनन्तरं पाठानां व्याख्यानमपि प्रश्नोत्तरद्वारा सरलसंस्कृतेन सम्पाद्यते। एवमियं प्रत्यक्षपद्धतिः संस्कृतभाषाशिक्षणे नितरामुपकारिका भवति।

प्रत्यक्षपद्धतेः गुणाः

1. अस्यां पद्धत्यां छात्राः सक्रियाः, आसक्ताश्च भवन्ति। अल्पेनैव कालेन संस्कृतेन विचाराभिव्यक्तौ समर्थाः भवन्ति।
2. छात्राः संस्कृतभाषायाः व्यावहारिकं स्वरूपं जानन्ति। अनौपचारिकरूपेण व्याकरणज्ञानञ्च सिध्यति।
3. इन्द्रियाणां प्रशिक्षणम्, अभ्यासः इत्यादिमनोवैज्ञानिकसिद्धान्तानां प्रयोगेण पद्धतिरियं मनोवैज्ञानिकी भवति।
4. भाषणकैशलस्य प्रादुर्भावे वाचने, लेखने च सौलभ्यं भवति।

प्रत्यक्षपद्धतेः दोषाः

1. प्रत्यक्षपद्धत्या सर्वमपि बोधनं संस्कृतमाध्यमेन कर्तुं समर्थाः अध्यापकाः दुर्लभाः सन्ति।
2. आधुनिकविद्यालयेषु संस्कृतमयवातावरणस्य सम्पादनं दुःशकं भवति।
3. अत्र संस्कृताध्यापनं मन्दगत्या भवति। अध्यापकस्य परिश्रमः अधिकः भवति।
4. बुद्धिमन्तः छात्राः उपकृता भवन्ति, न तु मन्दाः।
5. दृश्यश्रव्यसाधनानामभावे अध्यापनं नीरसं, निष्क्रियञ्च भवति।
6. मातृभाषया अनुवादस्य सर्वथा परित्यागेन छात्राणां पूर्वज्ञानस्य उपयोगो न भवति।

7. गद्यपद्यादिसाहित्यप्रकरणानां प्रत्यक्षपद्धत्या बोधनं दुष्करं भवति।
8. मनः, वायुः, आकाशः, स्मरति, चिन्तयति, अनुभवति इत्यादिपदानामर्थाः प्रत्यक्षं बोधयितुं न शक्यन्ते।
9. भाषणस्यैव प्राधान्यात् अन्यकौशलनामुपेक्षा स्यात्।
10. विस्तृतव्याकरणशास्त्रस्य अनेके नियमाः स्पष्टीकर्तुं न शक्यन्ते।

निष्कर्षः

प्रारम्भिकस्तरे भाषाशिक्षणे पद्धतिरियं प्रयोजनकरीति शिक्षाशास्त्रिणामनुभवो वर्तते। यत्र पाठशालासु, विद्यापीठेषु च संस्कृतेन व्यवहारः क्रियते, संस्कृतकार्यक्रमाः भवन्ति तत्र संस्कृतमयं वातावरणं भवति। संस्कृते परिनिष्ठिताः अध्यापकाः अनया पद्धत्या छात्राणां श्रवणकौशलं, भाषणकौशलञ्च उत्पादयितुं प्रभवन्ति। अतः प्रारम्भिकस्तरे पद्धतिरियम् आश्रयणयोग्या वर्तते।

5. सम्भाषणपद्धतिः (Conversation Method)

इयं पद्धतिः संवादपद्धतिः वार्तालापपद्धतिरित्यपि व्यवह्रियते। पद्धतिरियं प्रत्यक्षपद्धतेः विकसितं स्वरूपं भवति। कमपि विषयमध्यापयितुं तत्रावश्यकं पदजालं पूर्वं बोधयित्वा ततः परं सम्भाषणमारभ्यते। प्रश्नोत्तररूपेण, व्याख्यानरूपेण च विचारविनिमयः सम्भवति। मौखिककार्यद्वारा भाषणकौशलमुत्पाद्यते।

प्रत्यक्षपद्धताविव अत्रापि गुणदोषाः सम्भवन्ति। माध्यमिकस्तरे संस्कृतशिक्षणे पद्धतिरियमुपयुक्ता स्यात्।

6. संरचनापद्धतिः (Structural Method)

विशिष्टानां वाक्यानां रचनायाः शिक्षणेन, अभ्यासेन च संस्कृतभाषायाः स्वरूपं स्पष्टीभवति। विभक्तीनां प्रयोगस्य, कारकनियमानाञ्च अनौपचारिकरूपेण शिक्षणे पद्धतिरेषा उपयुक्ता भवति। वाक्यस्वरूपस्य वाक्यार्थस्य च ज्ञानेन छात्राणां निबन्धरचनाकौशलं सिध्यति। साहित्यस्य अध्ययने सौकर्यं भवति।

अस्याः पद्धतेः स्पष्टीकरणाय कतिचिदुदाहरणानि प्रदर्श्यन्ते—

अध्यापकः छात्रान् पाठान् पाठयति।

विद्यालयं परितः वृक्षाः सन्ति।

गृहं, विद्यालयञ्च अन्तरा प्राकारः अस्ति।

शिष्यः गुरोः गृहे अध्ययनेन वसति।

बालः मोदकेभ्यः स्पृहयति।

बालाय मोदकानि रोचन्ते।

देवाय नमः। बालकाय स्वस्ति।

सः सर्पात् बिभेति। तं सर्पात् रक्षति।

कृष्णः मातुः स्मरति।

पश्यतां जनानां चोरः वाहनमपाहरत्।

घण्टायां वादितायां बालाः गृहमगच्छन्।

एवं विभिन्नेषु अर्थेषु विशिष्टानां वाक्यानां प्रयोगस्य अभ्यासः संरचनापद्धत्या अध्याप्यते। आंग्लभाषाव्याकरणस्य बोधने पद्धतिरियं व्यापकरूपेण उपयुज्यते।

गुणाः

1. भाषायाः स्वरूपस्य, वाक्यप्रयोगस्य च बोधनं सुलभं भवति।
2. छात्राणां रचनाकौशलं वर्धते।
3. साहित्याध्ययने सौकर्यं भवति।

दोषाः

1. प्रारम्भिकस्तरे बालकानां संस्कृतशिक्षणे पद्धतिरियं नीरसा, अरोचिका, क्लेशकरी च भवति।
2. सर्वेषां वाक्यस्वरूपाणामेवं बोधनं दुष्करं भवति।
3. अत्र भाषायाः अन्यानि कौशलानि उपेक्षितानि भवन्ति।

निष्कर्षः

माध्यमिकस्तरे अनौपचारिकरूपेण व्याकरणमध्यापयितुमियं पद्धतिरुपयुज्यते। व्याकरणस्य, अनुवादस्य, निबन्धरचनायाश्च शिक्षणे एतादृशाः अभ्यासाः सहायकाः भवन्ति। नेयं पूर्णा पद्धतिः।

समन्वयपद्धतिः (Eclectic Method)

इयं पद्धतिः समाहारपद्धतिः, संयुक्तपद्धतिरिति च उच्यते। नेयं काचिन्नवीना पद्धतिः, किन्तु सर्वासां पद्धतीनां समाहारो भवति। सर्वासां पद्धतीनां गुणादानेन,

दोषपरिहारेण च स्तरानुसारं, विषयानुगुणं, परिस्थित्यनुसारञ्च प्रयोग एव समन्वयपद्धतिरिति व्यवह्रियते। संस्कृतशिक्षणे भाषाकौशलानामुत्पादनाय, विभिन्नानामुद्देश्यानां सम्पादनाय, गद्यपद्यादिसाहित्यप्रकाराणां बोधनाय इयं पद्धतिरुपयुज्यते।

1. प्रारम्भिकस्तरे प्रत्यक्षपद्धत्या मौखिककार्यद्वारा शुद्धोच्चारणं, श्रवणकौशलं, भाषणकौशलञ्च सम्पाद्यते।
2. पाठयपुस्तकस्याधारेण वाचनकौशलं, लेखनकौशलञ्च उत्पाद्यते।
3. दृश्यश्रव्यसाधनानामुपयोगेन पाठः रुचिकरो विधीयते।
4. पाठ्यसहगामिक्रियाणाम्, स्पर्धानाञ्च आयोजनेन छात्राणां कौशलानां विकासः क्रियते।
5. पाठ्यपुस्तकपद्धत्या गद्यपद्यादीनां बोधनं क्रियते।
6. सम्भाषणपद्धत्या भाषणशक्तेर्विकासः सम्पाद्यते।
7. संरचनापद्धत्या वाक्यनिर्माणं, निबन्धरचना च शिक्ष्यते।
8. व्याकरणानुवादपद्धत्या अभ्यासेन भाषायाः शुद्धं स्वरूपम्, अर्थग्रहणकौशलञ्च उत्पाद्यते।
9. नूतनमूल्याङ्कनविधीनामुपयोगेन छात्राणां ग्रहणकौशलं, स्मरणकौशलं, भाषाकौशलानि च परीक्ष्यन्ते।

एवं संस्कृतशिक्षणं मनोवैज्ञानिकपद्धत्या समग्रं विधातुं शक्यते।

❖❖❖

सप्तमोऽध्यायः

उच्चारणशिक्षणम्

संस्कृतभाषाशिक्षणे उच्चारणस्य महत्त्वमत्यधिकं विद्यते। अशुद्धोच्चारणात् अनर्थो भवति। स्पष्टार्थस्य ज्ञानं न भवति। उच्चारणदोषादेव वाचने लेखने च दोषाः भवन्ति। अत एवोच्यते—

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।

स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्॥

सकारस्य शकारत्वेनोच्चारणे योऽनर्थस्सम्भवति सोऽत्र प्रदर्शितः। अशुद्धोच्चारणम् अल्पज्ञतायाः, अयोग्यतायाः, असभ्यतायाश्च परिचायकं भवति।

अतः बाल्यावस्थायामेव शुद्धोच्चारणस्य प्रशिक्षणम् आवश्यकं भवति।

अशुद्धोच्चारणस्य कारणानि

1. अज्ञानम्— वर्णानां स्थानप्रयत्नाद्यनुसारम् उच्चारणस्य उचितं स्वरूपं छात्राः न जानन्ति। तथा च केचित् छात्राः श, ष, स इत्येतेषां वर्णानामुच्चारणभेदं न जानन्ति। एवमेव व-ब, ऋ-र, ई-इ, ण-न इत्येतेषां वर्णानामुच्चारणे दोषं कुर्वन्ति।

2. प्रयत्नलाघवम्— उच्चारणे परिश्रममसहमानाः छात्राः अशुद्धोच्चारणं कुर्वन्ति। यथा—प्रसादः-परसादः, परमेश्वरः पर्मेस्वरः, रवीन्द्रः-रविन्दरः, ब्राह्मणः-बरामनः, रघुवंशः-रगुबंसः इत्यादयः।

3. भ्रमः-भ्रमात्, प्रमादाद्वा केषाञ्चित् वर्णानामुच्चारणमन्यथा कुर्वन्ति। यथा—ज्ञानम्-ग्यानम्, यजमानः-जजमानः, उत्पत्तिः-उल्पत्तिः, काकः-कागः, जगदीशः-जगदेशः, वसन्तः-बसन्तः, प्रेमचन्द्रः-प्रेमचन्दः इत्यादयः।

4. प्रादेशिकभाषाप्रभावः— भारतस्य विभिन्नेषु प्रदेशेषु जनानां विभिन्नाः

उच्चारणप्रकारा: संस्कृतस्योच्चारणं दूषयन्ति। यथा दक्षिणभारते—कृष्ण:–क्रुष्ण:, किरुष्ण:, ऋषि:–रुषि:, रमा–रेमा, लक्ष्मी–लेक्ष्मी, धवला–तवला, धनं–दनम्, चटका–चठकं, सम्पत्ति:–सम्बत्ति:, उत्सव:–उल्सव: इत्यादय:।

उत्तरभारते—लक्ष्मण:–लक्मन:, सिंह:–सिंघ:, चन्द्र–चन्दर्, योगी–जोगी, संयोगे–संजोगे, रामायण–रामायन, किरण–किरन, विहार:–बिहार:, स्थान–अस्थान, स्मारक–इस्मारक, अङ्गुली–उङ्गुली, सङ्घटन–सङ्गठन, स्वर–सुर, नमस्कार–नमष्कार।

अन्तिममकारं नोच्चारयन्ति—राम–राम्, जनक–जनक्, नाम–नाम्, चतुरक्षरपदेषु द्वितीयं, चतुर्थञ्चाकारं नोच्चारयन्ति–सुमदाम–सुम्दाम्, दिव्यधाम–दिव्य्धाम्। परमात्मा–पर्मात्मा इत्यादय:। पञ्जाबदेशे—सिंह सिंघ, पुरुष–पुरुख, धूर्त–दूर्त, मेघ–मेग इत्यादय:।

बङ्गालदेशे—अन्तिममकारमोकारत्वेन उच्चारयन्ति। यथा—राम–रामो, जय–जयो, श, ष, स इत्येतेषामुच्चारणभेदो न गण्यते। शिक्षा–शिक्खा, शक्यते–शक्कते इत्यादय:।

उच्चारणशिक्षणविधय:

स्वराणां, व्यञ्जनानाम्, अनुनासिकवर्णानां, संयुक्ताक्षराणाञ्च उच्चारणे सम्भवतां दोषाणां निवारणाय संस्कृताध्यापक: अवश्यं प्रयतेत। बालकानां श्रवणेन्द्रियस्य, जिह्वाया:, स्वरयन्त्रस्य वा दोषश्चेत् विशेषज्ञानां भिषजां साह्यं प्राप्तव्यम्। अध्यापकस्योच्चारणं शुद्धं, स्पष्टम्, अनुकरणयोग्यञ्च भवेत्। टेप्रिकार्डर्, लिंग्वाफोन् इत्यादिनवीनयन्त्राणामुपयोग: दोषपरिहारे सहायक: स्यात्। छात्र: स्वीयमुच्चारणं स्वयं श्रुत्वा दोषं जानीयात्। अत्र शुद्धोच्चारणस्य सम्पादनाय केचन विधय: प्रस्तूयन्ते।

1. **अनुकरणविधि:**—संस्कृताध्यापक: वर्णानां शब्दानाञ्च शुद्धोच्चारणं बोधयेत्। छात्रा: अध्यापकस्योच्चारणमनुकृत्य शुद्धोच्चारणं शिक्षन्ते।
2. **आवृत्तिविधि:**—क्लिष्टानां वर्णानां शब्दानाञ्च पुन: पुनरावर्तनेन उच्चारणाभ्यास: कर्तव्य:।
3. **अवरोधविधि:**—छात्रा: शीघ्रभाषणे, शीघ्रवाचने च वर्णान् अस्पष्टम्,

अशुद्धञ्च उच्चारयन्ति। केषाञ्चित् वर्णानां लोपञ्च कुर्वन्ति। शीघ्रतामवरुध्य मन्दगत्या शुद्धोच्चारणं सम्पादनीयम्।

4. **पूर्णताविधिः**—पदे, वाक्ये च विद्यमानानां सर्वेषां वर्णानां स्पष्टोच्चारणाय पूर्णस्य पदस्य, सम्पूर्णस्य वाक्यस्य च स्पष्टमुच्चारणं ज्ञापनीयम्।

मात्रा, गतिः, विरामः, बलं, स्वराघातः इत्यादीनामुच्चारणतत्वानां परिचयः कर्तव्यः। सन्धिविच्छेदेन, समस्तपदे पृथक्पदानां परिचयेन च उच्चारणं स्पष्टीकर्तव्यम्। दीर्घवाक्येषु अर्थानुसारं विरामेण शुद्धोच्चारणं सम्पादनीयम्।

छात्राणां लज्जां, भयञ्च निवार्य संस्कृताध्यापकः स्नेहेन, सहानुभूत्या च उच्चारणं शिक्षयेत्॥

❖❖❖

अष्टमोऽध्यायः

वाचनशिक्षणम्

भाषायाः पूर्णं ज्ञानं वाचनं, लेखनमिति क्रियाद्वयमवलम्ब्य सिध्यति। तत्रापि वाचनस्य महत्त्वं मूर्धन्यं भवति, यतः वाचनं लिखिताक्षराणां भाषणरूपं भवति। वाचनक्रियायां येषां ध्वनीनाम् उच्चारणं क्रियते, तेषां ध्वनीनाम् अक्षराणि दृश्यमानप्रतीकाः भवन्ति। अतः वाचनकौशलं विना भाषाज्ञानम् अपरिपक्वम्, अपूर्णञ्च भवति। वाचनं नाम, न केवलं लिखितशब्दानां वाक्यानां वा शुद्धोच्चारणं भवति, किन्तु अर्थग्रहणपूर्वकम् उच्चारणं भवति।

संस्कृतशिक्षणम् आधुनिकपाठ्यक्रमे प्रायः पञ्चम्याः, षष्ठ्याः वा कक्ष्यायाः आरभ्यते। तावता कालेन बालकाः मातृभाषायां शुद्धोच्चारणपूर्वकवाचने अभ्यस्ताः भवन्ति। तथापि संस्कृतस्योच्चारणं हिन्दीभाषायाः, अन्यप्रादेशिकभाषाभ्यश्च भिन्नं भवति। संस्कृते अनुनासिकानुस्वारव्यञ्जनादीनाम् सन्ध्यक्षराणाञ्च उच्चारणे श्रद्धा अपेक्षिता।

वाचनशिक्षणस्य विधयः—

1. **वर्णमालाविधिः**—वर्णमालाविधौ प्रथमतः वर्णमालायाः वर्णानां क्रमशः उच्चारणस्य अभ्यासः कार्यते। यदा बालकः अक्षराणि प्रत्यभिजानाति, तदा लघूनां शब्दानां वाचनस्य बोधनं क्रियते। ततः क्रमेण वाक्यानां वाचनस्य अभ्यासो भवति।

2. **दृष्ट्वा कथय**—प्रारम्भिकवाचनपुस्तकेषु अकारादिक्रमेण शब्दाः, तदर्थभूतानि चित्राणि च मुद्रितानि भवन्ति। यथा—अजा, आननम् इत्यादिपदानि तेषां चित्राणामधः लिखितानि भवन्ति। बालकः चित्रं दृष्ट्वा तद्वाचकं शब्दमधोलिखितं वाचयति। एवं क्रमेण अक्षराणि प्रत्यभिजानाति।

3. **ध्वनिसाम्यविधिः**—समानध्वनिमतां शब्दानां युगपत् प्रदर्शनेन

वाचनस्य अभ्यासः कार्यते। यथा—दानम्-पानम्, वन्यः-धन्यः इत्यादयः।

4. **अनुध्वनिविधिः**—अध्यापकः पाठ्यपुस्तके विद्यमानान् शब्दान् स्पष्टमुच्चैः वाचयति। छात्राः तान् शब्दान् पश्यन्तः अनूच्चारणं कुर्वन्ति। अयमेव श्रुतकथनविधिरित्यपि उच्यते।

5. **सामूहिकवाचनविधिः**—अध्यापकः पाठ्यपुस्तके विद्यमानानि वाक्यानि आदर्शरूपेण वाचयति। छात्राः पुस्तकं पश्यन्तः सामूहिकरूपेण अनुवाचनं कुर्वन्ति। पद्यानां पाठने अयं विधिरुपयुक्तो भवति।

6. **भाषाशिक्षणयन्त्रविधिः**—'लिंग्वाफ़ोन्' यन्त्रेण उच्चारितान् शब्दान् श्रुत्वा छात्राः अनूच्चारणं कुर्वन्ति। परन्तु अस्य यन्त्रस्य मूल्याधिक्यात् अस्य विधेः प्रयोगो दुष्करो भवति।

7. **सङ्गतिविधिः**—माण्टसरीविधिरिति अस्यापरं नाम। दृष्टकथन-विधाविव अत्रापि पत्रेषु वस्तूनां चित्राणि, तद्वाचकाः शब्दाश्च मुद्रितानि भवन्ति। माण्टसरीविद्यालयेषु शिशवः चित्राणि दृष्ट्वा तद्वाचकानि पदानि वदन्ति।

उपर्युक्तानां विधीनां समीक्षणेन ज्ञायते यत् प्रधानतः त्रयः विधयस्सन्तीति। ते च—

1. वर्णमालाविधिः
2. शब्दशिक्षणविधिः
3. वाक्यशिक्षणविधिः इति।

1. **वर्णमालाविधिः**—अस्मिन् विधौ वर्णमालायां येन क्रमेण वर्णाः पाठ्यन्ते स्वराः, व्यञ्जनानि च तेषां बोधनानन्तरं संयुक्ताक्षराणां, पदानां, वाक्यानाञ्च शिक्षणं क्रमशः क्रियते।

मनोवैज्ञानिका इमं विधिमवैज्ञानिकं मन्यन्ते। वर्णानामनर्थकत्वात् सार्थकभाषाबोधने वर्णबोधनं निरर्थकं भवति। निरर्थकवर्णानामध्ययने बालकानां रुचिर्न भवति। अतः वर्णमालाविधिः अनुपयुक्त इति प्रतिपादयन्ति। आङ्गलभाषायां वर्णानां लिपेश्च साम्यं नास्ति। 'C' इति वर्णः कुत्रचित् क इति, कुत्रचित् स इति

च उच्चार्यते। यथा—cut (कट्), centre (सेण्टर्)। एवमेव 'U' इति वर्णः क्वचिदकारत्वेन, क्वचिदुकारत्वेन च उच्चार्यते। यथा But (बट्), Put (पुट्) इति।

संस्कृतवर्णमाला वैज्ञानिकी भवति। अत्र स्वराः, व्यञ्जनानि च यथा लिख्यन्ते, तथैव पठ्यन्ते। एतेषां क्रमोऽपि मुखे कण्ठादिस्थानानां यः क्रमो विद्यते तदनुसारी भवति। अतः वर्णमालाशिक्षणेन स्वरयन्त्रस्य नियमितं प्रशिक्षणं भवति। वर्णानां स्पष्टं स्वरूपं मौखिकं, लिखितञ्च छात्रैः ज्ञातुं शक्यते।

अतोऽत्र वर्णाः निरर्थकाः न प्रतीयन्ते। तथापि प्रारम्भदशायां सार्थकपदानां वाचनस्य शिक्षणमेव युक्तं प्रतिभाति।

2. **शब्दशिक्षणविधिः**—वर्णानां स्थाने सार्थकशब्दानां शिक्षणं क्रियते। यतः शिशुः प्रथमं शब्दानेव उच्चारयति। अतः विदुषां सम्मतोऽयं विधिः। दृष्टकथनविधिः, साम्यविधिः, अनुध्वनिविधिः, सङ्गतिविधिः इत्येते शब्दशिक्षणविधय एव भवन्ति।

3. **वाक्यशिक्षणविधिः**—अयं विधिः सर्वोत्तमः मनोवैज्ञानिकश्च भवति। भाषायां वाक्यमेव अर्थबोधिका अन्वितिर्भवति। शब्दाः, वर्णाश्च तद्घटकाः भवन्ति। बालकः यदा शब्दमुच्चारयति तदापि स शब्दः वाक्यस्य प्रतिनिधिर्भवति। यथा—'पुष्पम्' इत्युक्ते पुष्पमस्तीति प्रतीयते। गच्छतीति उक्ते सति सः गच्छति इति। वैयाकरणा अपि अखण्डवाक्यस्फोटमेव अर्थबोधकं मन्वते। अतश्चायं विधिः बालकनामासक्तिकरो भवति। लघूनां सरलानां वाक्यानाञ्च वाचनस्य बोधनं प्रथमं कृत्वा ततः परं पदानां, वर्णानाञ्च विश्लेषणं क्रमशः बोधनीयं भवति।

वाचनस्य प्रकाराः—

1. सस्वरवाचनम्
2. मौनवाचनम्

1. सस्वरवाचनम्

वाचनं सर्वथा अर्थज्ञानपूर्वकं स्यात्। अर्थबोधं विना वाचनं शब्दोच्चारणमात्रं भवति। प्रारम्भिकस्तरे शुद्धवाचनस्य महत्त्वमधिकं भवति। मौखिकभावाभिव्यक्तेः

साधनत्वेन वाचनस्य मूल्यं भवति। सभायां भाषणस्य अभ्यासः सस्वरवाचनद्वारा प्राप्तुं शक्यते।

सस्वरवाचनस्य उद्देश्यानि—

1. छात्राः शुद्धोच्चारणपूर्वकं वाचनस्य अभ्यासं कुर्युः।
2. ध्वनीनां तत्प्रतीकानामक्षराणाञ्च ज्ञानं प्राप्नुयुः।
3. अर्थाभिव्यक्त्यनुसारं शब्दसमूहं, वाक्यांशांश्च प्रत्यभिजानीयुः।
4. वाचनस्य गतौ नियन्त्रणं प्राप्नुयुः।
5. विरामादिचिह्नानुसारं वाचनं कुर्युः।
6. लेखकस्य भावानुसारं आरोहावरोहक्रमेण भावाभिव्यक्तिं कुर्युः।

अध्यापकः उपर्युक्तान् विषयान् मनसि निधाय छात्राणां मार्गदर्शनाय आदर्शवाचनं द्वित्रवारं प्रस्तुतीकरोति। छात्राश्च अनुवाचनं कुर्वन्ति।

वाचनमेका कला भवति। वाचनं शुद्धं, स्पष्टं, आकर्षकं, प्रभावोत्पादकञ्च स्यात्। भावद्योतकं वाचनमुत्कृष्टं भवति। दोषनिर्मुक्तं वाचनं श्रेष्ठं स्यात्। महर्षिणा याज्ञवल्क्येन वाचनस्य दोषाः साकल्येन प्रतिपादिताः। यथा—

शङ्कितं भीतमुद्घुष्टम् अव्यक्तमनुनासिकम्।
काकस्वरं मूर्ध्निगतं तथा स्थानविवर्जितम्॥
विस्वरं विरसञ्चैव विश्लिष्टं विषमाहतम्।
व्याकुलं तालुहीनञ्च पाठदोषाश्चतुर्दश॥ इति।

यथा तेनैवान्यत्र—

गीती शीघ्री शिरःकम्पी यथालिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥ इति॥

एवं याज्ञवल्क्येन वाचनगुणा अपि प्रकीर्तिताः। यथा—

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थञ्च षडेते पाठका गुणाः॥ इति।

2. मौनवाचनम्, द्रुतवाचनञ्च

सस्वरवाचने स्वरयन्त्रस्य (मुखस्य) उपयोगात् परिश्रमः अधिकः भवति।

दीर्घकालं, शीघ्रं वा वाचयितुं न शक्यते। सस्वरवाचनम् अन्यान् श्रावयितुम् उपयुज्यते। यदि सर्वदा उच्चैः वाचनं क्रियते कक्ष्यायां, गृहे वा तर्हि तदन्येषां बाधकं भवति। अतः मौनवाचनस्य अभ्यासः छात्राणामत्यन्तमावश्यकः। तेन च निष्प्रयासं, दीर्घकालं विस्तृतवाचनं कर्तुं शक्यते। किञ्च अल्पेन कालेन बहु अध्येतुं शक्यते। एतैः कारणैः आधुनिककाले भाषाशिक्षणे मौनवाचनस्यापि शिक्षणं दीयते। तेन च द्रुतवाचनमपि सिध्यति।

मौनवाचनस्य उद्देश्यानि—

1. वाचनगतेः वर्धनम्।
2. पठितांशानाम् अर्थग्रहणक्षमतायाः उत्पादनम्।
3. अर्थग्रहणगतौ द्रुतत्वसम्पादनम्।
4. प्रधानतथ्यानां चयनेन केन्द्रीयतथ्यस्य स्मरणे योग्यतायाः विकासः।

मौनवाचने श्रद्धेयाः विषयाः—

मौनवाचनं काचिदव्यक्ता क्रिया भवति। सस्वरवाचने सम्भवन्तः दोषाः अध्यापकेन निवारयितुं शक्यन्ते। परन्तु मौनवाचने तथा कर्तुं न शक्यते। अतः निम्नोक्ताः विषयाः अध्यापकेन श्रद्धेयाः भवन्ति।

1. सस्वरवाचनस्य समुचिताभ्यासानन्तरमेव छात्राः मौनवाचनाय प्रेरणीयाः। प्रारम्भिकदशायां अध्यापितपाठ्यभागस्य मौनवाचनाय अर्थग्रहणाय च छात्राः आदेष्टव्याः। ततः परं सरलभाषया रचितानि पुस्तकानि मौनवाचनाय निर्देष्टव्यानि।

2. अध्यापकः पाठ्यविषयस्य प्रधानांशान् प्रश्नरूपेण श्यामपट्टे विलिख्य छात्रान् बोधयित्वा निर्देशं दद्यात्। छात्राः पाठ्यविषयं मौनेन पठित्वा तेषां प्रश्नानामुत्तरम् अनन्तरं कथयेयुः। एतेन छात्राणां मौनवाचनस्य अभ्यासः, सारग्रहणं, सूक्ष्मदर्शिता च वर्धेत।

3. द्रुतवाचनस्य अभ्यासार्थं निश्चिते समये निश्चितं विषयभागं वाचयितुम्, अर्थं ज्ञातुञ्च छात्रान् प्रेरयेत्।

छात्राणां मौनवाचनाय पाठ्यपुस्तकाद् भिन्नानि सरलभाषया रचितानि कथापुस्तकानि निर्दिष्टानि भवेयुः। छात्राणां स्तरानुसारं शब्दानां प्रयोगः, भावानां प्रतिपादनञ्च स्यात्। एतेषां पठनेन बालकानां शब्दभण्डारः, विषयज्ञानं, वाचनगतिश्च

वर्धेत। सर्वेषां छात्राणां वाचनक्षमता समाना न भवति। अतः अधिकसंख्याकानां छात्राणाम् अधिकतमलाभाय मौनवाचनस्य, द्रुतवाचनस्य च उपयोगः स्यात्।

छात्राणां शब्दज्ञानस्य वर्धनाय कोशानामुपयोगोऽपि बोधनीयः। विस्तृतवाचनपुस्तकानां वाचनसमये येषां शब्दानामर्थो न ज्ञायते ते शब्दाः एकस्मिन् लेखनपुस्तके लेखनीयाः। अनन्तरं कोशं दृष्टवा तेषामर्थो लेखनीयः। एवं छात्राः स्वाध्यायेऽपि रताः स्युः।

नवमोऽध्यायः

लेखनशिक्षणम्

भाषायाः रूपद्वयमस्ति मौखिकं, लिखितञ्चेति। वर्णात्मकशब्दैः भावानामभिव्यक्तिः मौखिकं रूपं भवति। एतेषां वर्णानां रेखात्मकसङ्केतैः लिखिरूपेण निबन्धनं भाषायाः लिखितं रूपं भवति। मौखिकं रूपं तात्कालिकं भवति, लिखितन्तु स्थायि भवति। मौखिकन्तु प्रत्यक्षं विद्यमानान् जनानेव बोधयति। लिखितन्तु देशान्तरे, कालान्तरे च विद्यमानानपि जनान् बोधयति। अतः स्पष्टं सुन्दरञ्च अक्षराणां लेखनं भाषाध्ययनस्य प्रमुखमङ्गं भवति।

लेखनशिक्षणस्य विषये शिक्षाकोविदानां मतभेदो दृश्यते। प्रसिद्धः शिक्षादार्शनिकः फ्रोबेल्महोदयः एवमभिप्रैति। बालकाः प्रथमं वाचने शिक्षिताः भवेयुः। यदा बालकाः अक्षराणां प्रत्यभिज्ञाने समर्थाः भवन्ति, तदा लेखनशिक्षणमारब्धव्यमिति। मरिया- माण्टसरीमहोदयायाः आशयः एतद्विपरीत एव वर्तते। प्रथमं बालकेभ्यः लेखनशिक्षा दातव्या। तेन शारीरिकक्रियायां मांसपेशीनां नियन्त्रणं सिध्यति। ततः परं बालकाः पूर्वपरिचितानां लिखिताक्षराणां वाचने रुचिमादधति। एवं बालकाः पाठ्यविषयान् सरलतया वाचने समर्थाः भवन्ति।

अन्ये केचित् तृतीयं मतमुपस्थापयन्ति। वाचनस्य लेखनस्य च शिक्षणं युगपदेव स्यादिति। अत्रैतदेव मतं युक्तं प्रतीयते यतः दर्शनं, श्रवणं, वाचनं, लेखनमिति विभिन्नाः व्यापाराः परस्परम् उपस्कारकाः भवन्ति। सूक्ष्मेक्षिकया वीक्षणेन देवनागरीलिपिशिक्षणे वाचनलेखनयोः युगपत् शिक्षणं लाभदायकं भवति। यतः देवनागर्याम् उच्चार्यमाणानां वर्णानां सङ्केताः निश्चिताः सन्ति। तथा च वाचने लेखने च वर्णानां समानरूपता वर्तते। आङ्गलभाषायान्तु तद्विपरीतं भवति।

सुन्दरलेखनस्य महत्त्वम्—

लेखनमेका कला भवति। अन्यकलास्विव अत्रापि नैपुण्यसम्पादनाय श्रद्धा, परिश्रमश्च आवश्यको भवति। सुन्दरमाकर्षकं लेखनं प्रभावशालि भवति। तेन बालके

सौन्दर्यप्रियतायाः, प्रवृत्तिरुत्पद्यते। जीवने सुन्दरस्य, सुवाच्यस्य लेखनस्य आवश्यकता पदे पदे अनुभूयते। कार्यालयेषु लिपिकानां नियुक्तौ, अभ्यर्थिनां सुन्दरलेखनं विशेषयोग्यतारूपेण मन्यते। केभ्यश्चिद्वर्षेभ्यः पूर्वं परीक्षासु छात्राणां लेखनस्य स्वच्छतायै सुन्दरतायै च केचिदङ्काः निर्धारिता आसन्।

लेखनशिक्षणस्य उद्देश्यानि—

1. छात्राणां लेखनशक्तेः वर्धनम्।
2. लेखनस्य गतौ वेगस्य वर्धनम्।
3. संस्कृतध्वनीनां प्रत्यभिज्ञानेन वर्णभेदज्ञानम्।
4. संस्कृतभाषायाः शुद्धं, स्पष्टं, सुन्दरञ्च लेखनस्य अभ्यासः।
5. एकाग्रतायाः, स्मरणशक्तेश्च विकासः।
6. विरामादिचिह्नानां प्रयोगज्ञानम्।
7. शुद्धोच्चारणस्य सम्पादने सहायताप्रदानम्।

सुन्दरलेखनस्य उपायाः—

लेखनसौन्दर्यस्य सम्पादनाय निम्नोक्ताः विषयाः श्रद्धेयाः भवन्ति।

1. उपवेशनस्य, लेखनीग्रहणस्य च रीतिः—

बालकानां स्थिरं, सुखञ्च उपवेशनस्य अभ्यासः स्यात्। तथैव लेखनीग्रहणेऽपि अङ्गुलीनां प्रशिक्षणमावश्यकम्। तदा लेखनं सुन्दरं भविष्यति। अन्यथा अक्षराणामाकृतौ सौष्ठवं न सिध्यति। अक्षराणां लेखनम् उच्चावचं, तिर्यक्, अवाङ्मुखं वा भविष्यति। शरीरे विकृतिः, पृष्ठबाधा च स्यात्। अतः लेखनशिक्षणे अध्यापकेन एतदवश्यं श्रद्धेयम्। किञ्च लेखनफलकं, पुस्तिका वा नेत्राभ्याम् एकपाददूरे स्यात्।

2. लेखनसामग्री—

पूर्वकाले लेखनस्य अभ्यासः बालकानां लेखनफलके अध्यापकेन लिखितानां बृहदाकाराणां सुन्दराक्षराणामुपरि वर्तन्याः आवर्तनेन भवति स्म। इदानीं सा पद्धतिरुपेक्षिता दृश्यते। अधुना तु अभ्यासपुस्तिका, पेन्सिललेखनी च प्रयुज्यते। तादृशी लेखनसामग्री उत्तमस्तरीया स्यात्।

3. अक्षराणां रचना—

लेखनशिक्षणे अक्षराणामाकृतिविषये प्रारम्भे .एव श्रद्धातव्यम्। सर्वाणि अक्षराणि समानाकाराणि, ऋजूनि च भवेयुः। अक्षराणां लेखनं स्पष्टं, सुन्दरं, शिरोरेखायुक्तञ्च स्यात्।

4. अध्यापकस्यादर्शः—

अध्यापकस्य लेखनं छात्राणां कृते आदर्शो भवति। अध्यापकः समये-समये कक्ष्यायां सुन्दरैः बृहदक्षरैः पदानि वाक्यानि च श्यामफलके लिखित्वा आदर्शलेखनं प्रस्तुतीकुर्यात्। तथा छात्राणां लेखनं वैयक्तिकरूपेण परीक्ष्य सुन्दरलेखनाय प्रोत्साहनं कुर्यात्। संस्कृते विशिष्य-हलन्तानां, संयुक्ताक्षराणाम्, अनुस्वारविसर्गयोश्च लेखने श्रद्धां प्रदर्शयेत्।

5. आकर्षकमुदाहरणम्—

चार्ट्पत्रेषु कलात्मकरीत्या लिखितानि आदर्शवाक्यानि, सुभाषितानि च कक्ष्यायाः भित्तिषु स्थापनीयानि, यत्र छात्राणां दृष्टिः निरन्तरं पतेत्। तेन आकृष्टाः छात्राः सुन्दरलेखनमभ्यस्येयुः।

6. अभ्यासः—

लेखनमेका कला भवति। अभ्यासेनैव कलायां कौशलं सिध्यति। प्राचीनरीत्या सिकतासु, लेखनफलके वा अल्पेन व्ययेन अभ्यासः कर्तुं शक्यते। वैज्ञानिकरीत्या निर्मिताः अभ्यासपुस्तिकाः सहायिकाः भवन्ति।

7. सुलेखप्रतियोगिता—

सुनियोजिताः प्रतियोगिताः बालकानां प्रेरिकाः भवन्ति। कक्ष्यायां बालकाः प्रतियोगिताभावेन पूर्णं कौशलमाप्तुं सावधानेन लेखनकार्यं कुर्वन्ति।

लेखनशिक्षणविधयः

लेखनशिक्षणे निम्नोक्ताः विधयः क्रमेण आश्रयितुं शक्यन्ते।

1. माण्टसरीविधिः—

माण्टसरीमहोदया लेखनशिक्षणे नेत्रयोः, कर्णयोः, हस्तस्य च प्रशिक्षणे बलमादधाति। प्रथमं काष्ठे फलके वा निर्मितेषु वृहदक्षरेषु बालकैः अङ्गुल्याः सञ्चालनस्य अभ्यासः कर्तव्यः। ततः परं तेष्वेवाक्षरेषु पेन्सिललेखन्याः आवर्तनं कर्तव्यम्। एवं बालकाः अक्षराणां स्वरूपेण परिचिताः सन्तः लेखनं शिक्षन्ते।

2. रूपरेखानुकरणविधिः—

अध्यापकः फलके, पुस्तिकायां वा अक्षराणां रूपानुसारं बिन्दून् स्थापयति। बालकाः पेन्सिललेखन्या एतान् बिन्दून् योजयन्तः लेखनं शिक्षन्ते। एवं पदानि, वाक्यानि च लिख्यन्ते। अधुना एतादृश्यः मुद्रिताः लेखनपुस्तिकाः आपणे उपलभ्यन्ते।

3. स्वतन्त्रानुकरणविधिः—

अध्यापकः फलके, पुस्तिकायां वा अक्षराणि लिखति। बालकाः तानि अक्षराणि दृष्ट्वा तेषामधः तथैव लिखन्ति। नायं मनोवैज्ञानिको विधिः। तथापि उच्चप्राथमिकस्तरे अयं विधिरुपयुज्यते।

4. जेकाटॉट् विधिः—

शिक्षकः बालकैः ज्ञातचरान् शब्दान् श्यामफलके लिखित्वा वाचयति। बालकान् स्वपुस्तिकायां लेखितुमादिशति। बालकैः लिखितान् शब्दान् संशोधयति। ततः परं पूर्वलिखितमदृष्ट्वा स्वयं तान् शब्दान् स्मृत्वा लिखितुं प्रेरयति। एवं शब्दानां वाक्यानाञ्च लेखनं शिक्ष्यते।

सुलेखस्य अभ्यासाय निम्नोक्ताः त्रयः विधयः प्रधानतया उपयुज्यन्ते।

1. अनुलेखः, 2. प्रतिलेखः, 3. श्रुतलेखश्च।

अनुलेखः—

अनुलेखशब्दे अनु इत्युपसर्गः अनुकरणार्थकः। तथा च अनुकरणलेखनमित्यर्थः। सुन्दरलेखनस्य अभ्यासाय अनुलेखः उत्तमं साधनं भवति। अध्यापकः श्यामपटे, बालकानां पुस्तिकासु वा सुन्दराण्यक्षराणि लिखति। बालकाः तदनुसृत्य बहुवारं लिखन्ति। अधुना तु एतदर्थं मुद्रितपुस्तिकाः आपणे लभ्यन्ते। अत्र बालानां लेखनस्य अध्यापकेन व्यक्तिगतं निरीक्षणं, निर्देशनञ्च महत्त्वपूर्णं भवति।

प्रतिलेखः—

पाठ्यपुस्तकात्, अन्यस्मात् पुस्तकाद्वा प्रतिदिनं कञ्चित् भागं स्वलेखनपुस्तिकायां लेखितुम् अध्यापकेन छात्राः निर्दिश्यन्ते। पत्रे वामपार्श्वे कश्चन भागः रिक्तः स्यात्। लेखने पदानां मध्ये दूरं समानं स्यात्। विरामादिचिह्नानां प्रयोगः श्रद्धेयः। अक्षराणि समानाकाराणि स्युः। द्वयोः पङ्क्त्योः मध्ये एकस्याः पङ्क्तेः स्थानं

रिक्तं स्यात्। छात्राणां प्रतिलेखस्य संशोधनं कृत्वा अध्यापकः वामपार्श्वे रिक्तभागे आवश्यिकाः सूचनाः लिखेत्। एवम् अभ्यासेन छात्राणां सुलेखः सिध्यति।

श्रुतलेखः—

लेखनस्य अभ्यासाय श्रुतलेखोऽपि प्रमुखं साधनं भवति। श्रुतलेखद्वारा न केवलं सुन्दरलेखनस्य अभ्यासः, किन्तु शीघ्रलेखनस्यापि अभ्यासो भवति। श्रुतलेखनस्य अन्योऽपि लाभोऽस्ति यत् शुद्धलेखनस्य अभ्यासो भवति। अल्पे काले अधिकपरिमाणस्य विषयस्य शीघ्रं सुन्दरञ्च लेखनम् आधुनिककाले नितान्तमपेक्षितं वर्तते। यतस्समयोऽमूल्यो भवति। श्रुतलेखेन बालकानां स्मरणशक्तिर्वर्धते। श्रुतलेखस्यारम्भात्पूर्वं बालकानाम् उपवेशनस्य, लेखनीग्रहणस्य च रीतिः, अध्यापकस्य वाचनस्य गतिश्च श्रद्धेये भवतः।

श्रुतलेखे अध्यापकः प्रथमं सम्पूर्णांशं शुद्धोच्चारणपूर्वकं पठित्वा छात्रान् श्रावयेत्। प्रथमवाचनात् परं द्वितीयवाचने छात्राः लेखितुमादेष्टव्याः। छात्राणां लेखनात् परं पुनरध्यापकः तृतीयवाचनं कुर्यात्। येन छात्राः लिखितस्य संशोधनं कुर्युः।

अध्यापकस्य उच्चारणं शुद्धं समयानुसारञ्च स्यात्। वर्णानां, पदानां, वाक्यानाञ्च उच्चारणं स्पष्टमुच्चैः भावानुसारञ्च कुर्यात्। वाक्यानामावृत्तिः न कर्तव्या। अन्ते अध्यापकः छात्राणां श्रुतलेखं संशोध्य, सामान्यदोषान् छात्राणां समक्षं स्पष्टीकुर्यात्। अशुद्धशब्दानां शुद्धं रूपं छात्राः श्रुतलेखपुस्तिकायां पञ्चषवारं लिखेयुः, येन शुद्धशब्दानां लेखनस्य अभ्यासः स्यात्।

संस्कृतशिक्षणे श्रुतलेखनस्य महत्त्वं निरुपमं वर्तते। अतः सप्ताहे एकवारं श्रुतलेखस्य प्रयोगः स्यात्। तदर्थं श्रुतलेखपाठस्य शिक्षणक्रमः प्रस्तूयते।

श्रुतलेखपाठयोजनायाः सोपानानि—

1. सामान्यविषयाः।
2. सामान्योद्देश्यानि।
3. सहायकोपरकणानि।
4. पूर्वज्ञानम्।

अध्यापनसोपानानि—

1. प्रस्तावना— आवश्यकनिर्देशाः। यथा—लेखनपुस्तिकायाः स्थापनं,

श्रद्धया श्रवणं, लेखनीग्रहणं, शान्तमनसा कार्यस्य सम्पादनम् इत्यादयः।

2. विषयप्रस्तुतीकरणम्—

1. अध्यापकेन छात्राणां परिचयार्थम् अनुच्छेदस्य प्रथमवाचनम्।
2. छात्राणां लेखनार्थं द्वितीयवाचनम्।
3. छात्राणां श्रुतलेखस्य संशोधनाय अन्तिमवाचनम्।

3. संशोधनम्—अध्यापकेन, अथवा छात्रैः अन्योन्यं श्रुतलेखस्य संशोधनम्।

4. श्यामपट्टकार्यम्—श्रुतलेखे प्रवृत्तानां दोषाणां विवरणपूर्वकं शुद्धशब्दान् अध्यापकः श्यामपट्टे लिखेत्।

5. गृहकार्यम्—छात्राः स्वदोषान् ज्ञात्वा संशोधितशब्दान् पञ्चवारं लिखित्वा शुद्धलेखनस्य अभ्यासं कुर्युः।

❖❖❖

दशमोऽध्यायः

गद्यशिक्षणम्

वृत्तबन्धरहितं वाक्यं गद्यमिति निगद्यते। वृत्तबन्धसहितन्तु पद्यं भवति। संस्कृतसाहित्ये गद्यपद्ययोरयमेव भेदो भवति। परन्तु आधुनिकलोके पाश्चात्यरीतिमाश्रित्य सरलं व्यावहारिकं वाक्यं गद्यम् (Prose) इति व्यवह्रियते। तत्र काव्यगुणानामपेक्षया विषयस्य प्राधान्यं भवति। अत एव तत्र गद्यपद्ययोः महान् भेदः दृश्यते। परन्तु संस्कृतसाहित्ये गद्यकाव्ये काव्यगुणाः, विशिष्टा शैली च भवन्ति। अत एव 'गद्यं कवीनां निकषं वदन्ति' इति गद्यरचना प्रशस्यते।

संश्लिष्टता, संक्षिप्तता च संस्कृतगद्यशैल्याः विशेषता भवति। विस्तृतविषयस्य संक्षेपेण कथने, अल्पस्य विषयस्य विस्तृतरूपेण वर्णने च संस्कृतगद्यं समर्थं वर्तते। कोमलभावानां व्यक्तीकरणे, दुरूहदार्शनिकविचाराणां प्रतिपादने च गद्यं शक्तं माध्यमं भवति। पद्यकाव्ये इव गद्यकाव्येऽपि माधुर्यं, सरसता च अनुभूयते। बाणस्य कादम्बरी, दण्डिनः दशकुमारचरितम्, सुबन्धोः वासवदत्ता इत्यादीनि संस्कृतगद्यकाव्यानि प्रसिद्धानि सन्ति।

संस्कृतगद्यशिक्षणस्य उद्देश्यानि—

क सामान्योद्देश्यानि।

ख विशिष्टोद्देश्यानि।

क सामान्योद्देश्यानि—विभिन्नानां गद्यविषयाणां विभिन्नेषु स्तरेषु शिक्षणे यानि उद्देश्यानि समानानि भवन्ति तानि सामान्योद्देश्यानि भवन्ति। तथापि स्तरानुसारेण विभिन्नानि उद्देश्यानि साधनीयानि भवन्ति। यथा—

प्रारम्भिकस्तरे—

1. संस्कृतशब्दानां परिचयः।
2. वर्णानां, पदानाञ्च उच्चारणम्।

3. गद्यस्य वाचनम्।
4. सरलवाक्यानाम् अर्थग्रहणम्।
5. संस्कृतभाषायाः सामान्यपरिचयः।
6. संस्कृतपठने छात्राणां रुचेः विकासः।
7. नैतिकप्रसङ्गैः छात्राणां चरित्रस्य निर्माणम्।
8. भाषणस्य, लेखनस्य च अभ्यासः।

माध्यमिकस्तरे—

1. छात्राणां शब्दज्ञानस्य अभिवर्धनम्।
2. संस्कृतवाक्यानां शुद्धं, स्पष्टञ्च वाचनम्।
3. गद्यांशानाम् अर्थग्रहणम्।
4. संस्कृतभाषायाः व्यावहारिकं ज्ञानम्।
5. भाषणकौशलस्य, लेखनकौशलस्य च विकासः।
6. संस्कृतसाहित्ये अभिरुचिः।
7. कल्पनाशक्तेः विकासः।
8. सांस्कृतिकज्ञानस्य विकासः, नैतिकविकासश्च।
9. व्याकरणनियमानां सामान्यज्ञानम्।

उन्नतस्तरे—

1. छात्राणां संस्कृतशब्दभण्डारस्य, सूक्तिभण्डारस्य च विकासः।
2. संस्कृतभाषायाः मौखिकप्रयोगस्य, व्यावहारिकप्रयोगस्य च ज्ञानम्।
3. गद्यस्य विभिन्नशैलीनां परिचयः।
4. विवेचनात्मकशक्तेः, समीक्षात्मकशक्तेश्च विकासः।
5. कल्पनाशक्तेः, रचनाशक्तेश्च विकासः।
6. गद्यसाहित्याध्ययनशक्तेः विकासः।
7. धार्मिकज्ञानस्य, दार्शनिकज्ञानस्य च विकासः।

(ख) विशिष्टोद्देश्यानि—

प्रारम्भिकस्तरे संस्कृतगद्यशिक्षणं सरलवाक्यानां माध्यमेन भवति। लघुकथाः,

सम्भाषणपाठाः, सरलाः निबन्धाश्च प्रयुज्यन्ते। माध्यमिकस्तरे, उन्नतस्तरे च कथाः, निबन्धाः, वर्णनम्, आत्मकथाः, नाटकानि इत्यादिविषयाः गद्यपाठेषु अन्तर्भवन्ति। एतेषां सामान्योद्देश्यानि पूर्वं निर्दिष्टान्येव भवन्ति। विशिष्टोद्देश्यानि तावत् विभिन्नानि सन्ति। यथा—

	गद्यप्रकाराः	—	विशिष्टोद्देश्यानि
1.	कथा—	1.	कथाज्ञानम्
		2.	चरित्रनिर्माणम्
		3.	कल्पनाशक्तेः विकासः
2.	निबन्धः—	1.	विषयज्ञानम्
		2.	बौद्धिकशक्तेः विकासः
		3.	जिज्ञासायाः विस्तारः
3.	वर्णनम्—	1.	विषयज्ञानम्
		2.	कल्पनाशक्तेः विकासः
		3.	रचनाशक्तेः विकासः
		4.	वर्णनशैल्याः परिचयः
4.	आत्मकथा—	1.	महापुरुषाणां जीवनवृत्तान्तस्य ज्ञानम्
		2.	उच्चादर्शानां ज्ञानम्
		3.	चारित्रिकविकासः
5.	नाटकम्—	1.	सम्भाषणज्ञानम्
		2.	विषयस्य दृश्यमाध्यमेन स्पष्टीकरणम्
		3.	अभिनयकलायाः परिचयः
		4.	रसानुभूतिः

संस्कृतगद्यशिक्षणस्य सोपानानि—

1. प्रस्तावना

गद्यपाठस्य प्रारम्भात् पूर्वं संस्कृताध्यापकः प्रस्तावनां कुर्यात्। प्रस्तावनायां छात्राणां पूर्वज्ञानेन पाठगतनवीनज्ञानस्य सम्बन्धः स्थाप्यते। छात्राणां पूर्वज्ञानेन

सम्बद्धानां कतिपयप्रश्नानां द्वारा एतत्कार्यं सम्पाद्यते। प्रश्नाः सरलाः, स्पष्टाः, निश्चिताश्च स्युः। प्रश्नैः छात्राणां ज्ञानस्य स्तरः ज्ञातुं शक्यते। तथा नवीनज्ञानस्य प्राप्तये छात्रेषु जिज्ञासा उत्पाद्यते। एवं छात्राणां विषयाध्ययनाय प्रेरणा सिध्यति।

प्रस्तावनासम्बन्धिप्रश्नैः अध्यापनीयविषयस्य भूमिका निर्मीयते। आवश्यकतानुसारं चित्रप्रदर्शनेन, सम्भाषणद्वारा वा प्रस्तावना क्रियते।

2. उद्देश्यकथनम्

अध्येतव्यस्य विषयस्य प्रस्तावनायाः अन्ते उद्देश्यस्य स्पष्टीकरणम् अध्यापकस्य कर्तव्यं भवति। तेन च छात्राणां मनसि अध्येतव्यविषयस्य निश्चयो भवति।

3. प्रस्तुतीकरणम्

उद्देश्यकथनानन्तरं संस्कृताध्यापकः गद्यपाठस्य अध्यापनं प्रारभते। अस्मिन् सोपाने विभिन्नानाम् उद्देश्यानां सम्पादनाय अनेकविधानि कार्याणि कर्तव्यानि। तदर्थं कानिचिदुपसोपानानि आश्रीयन्ते।

1. आदर्शवाचनम्

अध्यापनीयं गद्यांशम् द्विवारं, त्रिवारं वा अध्यापकः उच्चैः, स्पष्टं, शुद्धञ्च वाचयेत्। तस्य वाचनम् अनुकरणयोग्यं भवेत्। अर्थाभिव्यक्तये विरामादिचिह्नानुसारम् वाचनं समर्थं स्यात्। आदर्शवाचनस्य श्रवणेन छात्राः वर्णानामुच्चारणं, भावानुगुणं गद्यवाचनञ्च जानीयुः। एवं गद्यभागस्य अर्थावगमने सरलता स्यात्। एतेन छात्राणां श्रवणकौशलं सिध्यति।

2. अनुवाचनम्

अध्यापकः आदर्शवाचनं कृत्वा गद्यांशं वाचयितुं छात्रान् प्रेरयति। कठिनवर्णानां, संयुक्ताक्षराणां, सन्धियुक्तानां शब्दानां, समासानाञ्च उच्चारणे विशेषाभ्यासः आवश्यकः। अध्यापकः छात्राणां दोषान् संशोधयेत्। एवञ्च छात्राः गद्यांशानां सुष्ठु वाचने कुशलाः भवेयुः। तथा च छात्राणां वाचनकौशलं सिध्यति।

3. व्याख्यानम्

छात्राणामनुवाचनात्परं गद्यभागे विद्यमानानां कठिनशब्दानां, वाक्यांशानाञ्च व्याख्यानं कर्तव्यम्। सन्धीनां विच्छेदः, समासानां विग्रहवाक्यञ्च बोधनीयम्। सन्धिनियमाः, समासनियमाश्च उदाहरणद्वारा स्पष्टीकर्तव्याः। एतेषां विषयाणां

बोधनाय श्यामफलकस्य, चार्टपत्राणाञ्च (Charts) उपयोगः कर्तव्यः। संस्कृतशब्दानां, वाक्यांशानाञ्च अर्थबोधनाय वक्ष्यमाणानां विधीनामुपयोगः कर्तुं शक्यते।

(क) प्रत्यक्षविधिः—

अध्यापकः शब्दानामर्थबोधनाय साक्षात् वस्तूनि, चित्राणि, प्रतिकृतीर्वा (Models) प्रदर्शयति। छात्राः अर्थं वदन्ति। एवमभिनयद्वारा, सङ्केतद्वारा वा शब्दार्थं ज्ञापयति। ततः अध्यापकः अर्थं वक्तुं छात्रान् प्रेरयति।

(ख) अनुवादविधिः—

अध्यापकः कठिनशब्दानां, वाक्यानाञ्च अर्थं मातृभाषया बोधयति, श्यामफलके लिखति च।

(ग) कोशविधिः—

संस्कृतभाषायां पर्यायशब्दानां, नानार्थशब्दानाञ्च सङ्ग्रहात्मकाः श्लोकरूपाः अनेके कोशाः सन्ति। कोशात् शब्दस्य पर्यायाः, नानार्थाः, शब्दस्य स्वरूपं, लिङ्गञ्च ज्ञातुं शक्यन्ते। संस्कृताध्ययनस्य प्रारम्भे पाठशालासु 'अमरकोषः' कण्ठस्थीक्रियते। छात्राणां शब्दभण्डारं वर्धयितुं कोशानां परिचयः नितरामुपकरोति। अतः संस्कृताध्यापकः केषाञ्चित् कठिनशब्दानामर्थबोधनाय कोषमुदाहरेत्।

यथा—मरुत्वान् = इन्द्रः। अमरकोशः—

"इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः" इति इन्द्रस्य पर्यायान् बोधयति।

बालशब्दस्य नानार्थाः यथा अनेकार्थध्वनिमञ्जर्याम्—

'बालः केशे जलं बालं बालं काशतृणं स्मृतम्।
बालो मूर्खः शिशुर्बालो बालो वेग उदाहृतः॥' इति।

(घ) प्रयोगविधिः—

केषाञ्चित् शब्दानामर्थः वाक्यप्रयोगद्वारा बोधयितुं शक्यते। अध्यापकः तं शब्दं प्रयुज्य द्वित्राणि वाक्यानि वदेत्। ततः परं तस्य शब्दस्य अर्थः प्रष्टव्यः। यथा—आपणम्।

आपणे विविधानि वस्तूनि विक्रीयन्ते।

जनाः आपणात् अपेक्षितानि वस्तूनि क्रीणन्ति।

नीडम्—

पक्षिणः नीडं निर्माय तत्र वसन्ति।

नीडं पक्षिणां गृहं भवति।

(ङ) तुलनाविधिः—

समानार्थकैः, विपरीतार्थकैश्च शब्दैः सह तुलनां कृत्वा अर्थः स्पष्टीक्रियते। तथा वर्णभेदेऽपि अर्थसाम्यं, वर्णभेदेन अर्थभेदः इत्येवं तुलनया शब्दार्थः अध्यापकेन बोधनीयः। एवञ्च छात्राणामर्थस्पष्टता, संशयनिवृत्तिः, शब्दभण्डारे वृद्धिश्च सम्भवन्ति।

1. समानार्थकाः शब्दाः यथा—जनः, मनुष्यः, मानवः, नरः, प्रजा-एतेषां शब्दानां प्रयोगे आशयभेदः स्यात्। स्त्री, नारी, महिला, वनिता, अबला, कामिनी, वामा। वत्सा, बाला, कन्या, कुमारी, मुग्धा-अत्र अवस्थाभेदः ज्ञातव्यः। पद्मं, कमलं सरसिजं, जलजं, नीरजं, वारिजं, पङ्कजम्।

2. विपरीतार्थकाः शब्दाः यथा—ह्रस्वः × दीर्घः, मित्रं × शत्रुः, रागः × द्वेषः, दूरं × समीपम्, सज्जनः × दुर्जनः इत्यादयः।

3. वर्णभेदेऽपि अर्थसाम्यं यथा—विहगः, विहङ्गः, विहङ्गमः; प्रतिकारः, प्रतीकारः; भुजगः, भुजङ्गः, भुजङ्गमः; प्रायः, प्रायशः; सूरः, सूर्यः; अधः, अधस्तात्, अधरस्तात् इत्यादयः।

4. वर्णभेदेन अर्थभेदो यथा—प्रसादः - प्रासादः, अपेक्षा - उपेक्षा, अनलः - अनिलः, कुलं - कूलम्, गृहं - ग्रहः, ददाति - दधाति, सकलं - शकलम्, इत्यादयः।

(च) व्युत्पत्तिविधिः—

व्याकरणशास्त्रानुसारं पदानां प्रकृतिप्रत्ययविभागेन, व्युत्पत्तिप्रदर्शनेन अध्यापकः अर्थबोधनं करोति। सन्धिविच्छेदेन, समासानां विग्रहवाक्यकथनेन च पदार्थबोधनं सम्पादयति।

सुबन्तशब्दाः यथा—

विधौ — विधिः = ब्रह्मा, विधिशब्दः इकारान्तः, पुँल्लिङ्गः, तस्य

सप्तमीविभक्तौ, एकवचने रूपं विधौ इति। ब्रह्मणि इत्यर्थः। विधौ — विधुः = चन्द्रः, विधुशब्दः उकारान्तः पुँल्लिङ्गः, तस्य सप्तमीविभक्तौ, एकवचने रूपं विधौ इति। चन्द्रे इत्यर्थः।

आपः–अप् = जलम्, अप् शब्दः पकारान्तः, स्त्रीलिङ्गः, नित्यबहुवचनान्तः, तस्य प्रथमाविभक्तौ बहुवचने रूपम् आपः इति, जलानि इत्यर्थः।

तिङन्तशब्दाः यथा—

ददति — दानं कुर्वन्ति इत्यर्थः। दा धातोः लटि परस्मैपदे प्रथमपुरुषे बहुवचनम्।

ददाति – दत्तः – ददति।

जानीते — जानाति इत्यर्थः। ज्ञा धातोः लटि आत्मनेपदे प्रथमपुरुषे एकवचनम्।

जानीते – जानाते – जानते।

क्रियते — कृ धातोः कर्मणि लटि प्रथमपुरुषे एकवचनम्।

कर्तरि प्रयोगः — कुलालः घटं करोति।

कर्मणि प्रयोगः — कुलालेन घटः क्रियते।

जिगमिषति — गन्तुमिच्छति – सन्नन्तः गम्लृ धातुः।

पापठ्यते — पुनः पुनः पठति – यङन्तः पठ् धातुः।

वरीवर्ति — भृशं वर्तते – यङ्लुङन्तः वृत् धातुः।

सन्धिविच्छेदः—

तदात्मानम् = तदा + आत्मानम् — सवर्णदीर्घसन्धिः।

सदैवम् = सदा + एवम् — वृद्धिसन्धिः।

समासविग्रहः —

त्रिलोकी — त्रयाणां लोकानां समाहारः — समाहारद्विगुसमासः।

चित्रगुः — चित्राः गावः यस्य सः — बहुव्रीहिसमासः।

(छ) प्रसङ्गविधिः—

केषाञ्चित शब्दानां व्याख्यानाय ऐतिहासिकः, भौगोलिकः, पौराणिको वा

प्रसङ्गः वर्णनीयो भवति। संस्कृतसाहित्यस्य दुरूहाः विषयाः स्पष्टीकर्तव्याः। एतेन सांस्कृतिकमुद्देश्यं सिध्यति। यथा—भागीरथी-राजा सगरः एकोनशतं यज्ञान् अन्वतिष्ठत्। शततमस्य यज्ञस्य समाप्तौ सः शतक्रतुः = इन्द्रः भविष्यतीति भीतः इन्द्रः यागाश्वमपहृत्य पाताले तपः कुर्वतः कपिलमुनेः आश्रमे अबध्नात्। सगरस्य षष्टिः सहस्राणि पुत्राः यागाश्वमन्विष्यन्तः भूमिं खनित्वा पातालमगच्छन्। तत्र यागाश्वं दृष्ट्वा कपिलं चोरं मत्वा, तस्य तपोभङ्गमकुर्वन्। तेन क्रुद्धः कपिलः तान् भस्मसादकरोत्। ततः बहुकालात्परं सगरवंशीयः भगीरथः तपः कृत्वा गङ्गां पातालं नीत्वा स्वपितॄन् स्वर्गमगमयत्। एवं भगीरथेन महता प्रयत्नेन आनीतत्वात् गङ्गायाः भागीरथी इति नाम प्रसिद्धमभवत्।

एवमन्येऽपि शब्दाः सागरः, सप्तर्षिमण्डलं, भारतम्, अरुन्धती, सूत्रधारः इत्यादयः व्याख्यातव्याः स्युः।

(ज) टीकाविधिः—

वेदानां, शास्त्राणां, काव्यानाञ्च स्पष्टार्थप्रतिपादनाय भाष्याणि, व्याख्याः, टीकाश्च प्रसिद्धैः व्याख्यातृभिर्विरचितानि संस्कृतसाहित्ये उपलभ्यन्ते। वेदानां सायणभाष्यं, ब्रह्मसूत्राणामुपनिषदाञ्च श्रीशङ्कराचार्यस्य भाष्यं, मल्लिनाथादीनां काव्यव्याख्यानानि च उल्लेखनीयानि सन्ति। एतेषु व्याख्यानेषु व्याकरणशास्त्ररीत्या पदानां व्युत्पत्तिः, शब्दसाधुत्वं, कोशानामुद्धरणेन अर्थप्रतिपादनं, सन्धिसमासादयः, अन्वयः, शास्त्रसिद्धान्तानुसारेण विषयस्य समर्थनं, छन्दोऽलङ्काररसभावादीनां विशदीकरणञ्च उपलभ्यते। एवं पूर्वोक्तानां सर्वेषां विधीनामुपयोगोऽत्र क्रियते। तथा च संस्कृताध्यापकः काव्यानामध्यापने टीकायाः उपयोगं कुर्यात्। एवं छात्राः टीकानामध्ययनाय प्रेरिताः स्युः। तदा तेषां काव्यशास्त्राध्ययनं समग्रं स्यात्।

4. सारांशकथनम्—

अध्यापकः गद्यपाठस्य विस्तृतं व्याख्यानं कृत्वा, तस्य सारांशं संक्षेपेण प्रस्तौति। छात्रानपि संस्कृते, मातृभाषायां वा सारांशं कथयितुं प्रेरयति। तेन च पाठ्यविषयः स्पष्टीभवति।

5. मौनवाचनम्—

अध्यापकः विषयस्य व्याख्यानात्परं छात्रेभ्यः मौनेन विषयं वाचयितुमवसरं ददाति। एतेन छात्रैः लब्धं ज्ञानं पुष्टं भवति। अज्ञातान्, सन्दिग्धान् वा विषयान् छात्राः मौनवाचनात्परम् अध्यापकं प्रष्टुं प्रभवन्ति।

6. पुनरावृत्तिः—

मौनवाचनात्परम् अध्यापकः छात्रैरज्ञातान् विषयान् स्पष्टीकुर्यात्। छात्राणां संशयानां निवारणं कुर्यात्। एवमध्यापितेषु विषयेषु प्रधानांशान् पुनरेकवारं पाठयित्वा तत्र छात्राणां ज्ञानं दृढीकुर्यात्।

7. कक्षाकार्यं ; गृहकार्यञ्च—

पुनरावृत्तेः परमध्यापकः छात्रैः लब्धस्य ज्ञानस्य प्रयोगाय किञ्चित् मौखिकं, लिखितं वा कार्यं दद्यात्। गृहकार्येण छात्रैरधीतानां विषयाणां विस्तृतोपयोगो भवेत्। तथा लेखनस्य अभ्यासोऽपि भवेत्।

मूल्याङ्कनम्—

मूल्याङ्कनं पृथक् सोपानं न भवति, किन्तु प्रत्येकं सोपानेषु साधनीयानामुद्देश्यानां सिद्धेः ज्ञानाय मूल्याङ्कनं कर्तव्यम्। वस्तुनिष्ठप्रश्नानां द्वारा छात्राणां विषयज्ञानं, तात्कालिकस्मृतिः, अल्पकालिकस्मृतिश्च परीक्ष्यते। एतेन अध्यापकेन कृतस्य परिश्रमस्य साफल्यं स्वयं ज्ञातुं शक्यते।

एवं सामान्यरूपेण उपर्युक्तसोपानानि गद्यबोधने उपयुज्यन्ते।

गद्यविशेषाणां शिक्षणम्

कथा, निबन्धः, वर्णनम्, आत्मकथा, नाटकम् इत्यादीनां गद्यप्रकाराणां बोधनस्य विशिष्टोद्देश्यानि पूर्वं निर्दिष्टानि। एतेषां बोधनेऽपि पूर्वोक्तानि सोपानानि प्रयुज्यन्ते। कथायां कथातत्त्वस्य, नाटके पात्राणां चरित्रचित्रणस्य, वर्णने प्रकृतिचित्रणस्य, निबन्धे विचारविश्लेषणस्य च प्राधान्यं देयम्। तदर्थमध्यापकः सारांशकथनात्परं विकासात्मकप्रश्नान् पृच्छेत्।

माध्यमिकस्तरे, उन्नतस्तरे च छात्राः अधीतस्य नाटकस्य अभिनयं कुर्युः। अध्यापकः तेषां निर्देशनं कुर्यात्।

❖❖❖

एकादशोऽध्यायः

कथाशिक्षणम्

कथासाहित्यम् अत्यन्तं लोकप्रियं वर्त्तते। तस्य उद्भवकालादारभ्य इदानीं यावत् निरन्तरं परिवर्तनं परिलक्षते। अस्माकं देशे कथायाः मूलस्रोतः संस्कृतभाषा संस्कृतसाहित्यं च। संस्कृतसाहित्ये कथायाः रूपद्वयं मिलति यथा आख्यायिका, कथा च। परन्तु आचार्येण दण्डिना आख्यायिकाकथयोः भेदः न स्वीकृतः।

वस्तुतः कथायाः किमपि सुनिश्चिता परिभाषा नास्ति। अस्य कारणमिदं यत् प्रकृतिरूपयोः वैविध्यं, तत्रागतं परिवर्तनं च। तथापि विद्वद्भिः तस्याः स्वरूपबोधनाय बहवः परिभाषाः कृताः। कथां प्रति मानवानामाकर्षणं जन्मतः भवति। शैशवकालात् बालकस्य कथां प्रति रुचिवर्धनं क्रियते। प्रांचीनकाले अस्माकं कथानाम् इदम् उद्देश्यमासीत् यत् मनोरञ्जनेन सह समाजे नैतिकशिक्षायाः आचारशिक्षायाः च वृद्धिः। अतः बहवः कथाः उपदेशात्मिकाः सन्ति। परन्तु अद्यतनायाः कथायाः उद्देश्यं जीवनस्य आख्या। अतः वर्तमानसमये कथाः केवलं मनोवैज्ञानिके धरातले एव वर्तन्ते।

मानवसमाजस्य विभिन्नानां रुचीनामाधारेण वर्तमानसमये कथानां लक्ष्यमधिकं विस्तृतं जातम्। कथायाः धाराः बहुप्रकारैः प्रवाहिताः। यथा दार्शनिक-रोमाञ्चक-चारित्रिक-सामाजिकादयः। वर्तमानसमये कथायाः यावत् प्रचारः, प्रसारः अस्ति न तावत् अन्यस्य कस्यापि साहित्यस्य।

कथा एका लघुवृत्तं भवति, यस्य पठनं स्वल्पसमये भवितुमर्हति। अनेन पाठकः अपि प्रभावितः भवति। अयमेव प्रभावः तथा पूर्णः भवेत् येन अन्ये अपूर्णाः प्रभावाः निर्गच्छेयुः। कथा सम्पूर्णस्य जीवनकालस्य विषयः न भवति, अपि तु घटनायाः अंशस्य चित्रणं भवति। स च अंशः स्वयमेव पूर्णतां प्राप्नोति।

कथायाः महत्त्वम्—कथासाहित्यं जनानां कृते आदियुगादेव मनोरञ्जनपुरःसरं कालक्षेपाय प्रवर्त्तते। कथा अद्यापि मनोरञ्जनेन साकं ज्ञानात्मक-नैतिक-आचार-

शिक्षादीनां स्रोतः अस्ति। पुराकालादेव अस्याः महत्त्वमस्माभिः स्वीकृतम्। कथायाः प्रयोगः तदानीम् आचारस्य लोकव्यवहारस्य च शिक्षा-दीक्षयोः कृते आसीत्। पञ्चतन्त्र-हितोपदेश-बृहत्कथामञ्जरी-कथासरित्सागरादयः तदानीन्तनीयाः प्रसिद्धाः ग्रन्थाः। ततः परं बेतालपञ्चविंशतिः, सिंहासनद्वात्रिंशतिका चेत्यादयः अपि कथासाहित्ये प्रसिद्धाः। अतः साहित्यस्य भेदत्वात् कथायाः शिक्षणमपि अत्यन्तं महत्त्वपूर्णम्। प्रारम्भिकशिक्षायां प्रविधित्वेन इतिहास-भूगोल-सामान्यविज्ञान-गणितादि-विषयेषु कथायाः स्थानमवश्यं स्मरणीयम्। शिशवः छात्राः वा कथासु रुचिमन्तः भवन्ति। अतः प्रारम्भिकशिक्षायां तदर्थं कथा आश्रीयते। अक्षरशिक्षणात् प्रारभ्य विषयाणां पाठनमपि कथाप्रविधौ अत्यन्तं रुचिकरं भवति। यद्यपि कथायाः प्रमुखमुद्देश्यं मनोरञ्जनं, तथापि कल्पनाशक्तेः स्मरणशक्तेश्च विकासाय कथाशिक्षणं प्रामुख्यं भजति। अनेकेषां विषयाणां कथामाध्यमेन शिक्षणस्य इदमेव तात्पर्यम्। द्रुतपाठे स्वाध्यायप्रवृत्तेः विकासाय कथायाः सन्निवेशः प्राधान्यं भजति। प्रत्येकं साहित्येषु विद्यमानासु सूक्तिषु च एका कथा निश्चिता भवति।

कथायाः चयनम्—कथायाः माध्यमेन अन्येषां विषयाणाम् अध्ययनाध्यापनं तदैव सफलं भवति यदा कथासु अधोलिखिताः विषयाः भवन्ति।

* घटनाप्रधानाः कथाः बालकानां कृते अधिकं रुचिकराः भवन्ति। अतः तया कथया तेषां मानसिकसक्रियता, कल्पनशक्तिः तर्कशक्तिः वर्धते।
* कथायां सम्भाषणं, परस्परकथनोपकथनं पर्याप्तं स्यात्। कथां प्रति छात्राणाम् आस्था भवति। तेषामवधानं कथायामेव भवति।
* कथायाः भाषा, शैली च सरला, रुचिपूर्णा च भवेत्।
* किशोरावस्थायां स्थितानां बालकानां कृते चारित्रिकविकासाय कथानां महत्त्वं गुरुत्वपूर्णं भवति।
* उच्चस्तरे सामाजिक-राजनैतिक-ऐतिहासिक-भूगोल-महापुरुषादीनां विषयात्मिकाः कथाः भवेयुः। तेन छात्राणां चारित्रिकविकासः भविष्यति।
* कथा रुचिपूर्णा, बालकस्य जिज्ञासायाः तृप्तिकारिणी, मनोरञ्जनकारिणी च भवेत्।

* बालकानां कृते भयोत्पादिकाः, मनोबलभग्नकारिण्यः, उत्साहनाशिकाः कथाः पाठ्यक्रमे न भवेयुः।
* कथा उद्देश्यपूर्णा स्यात्।
* कथा बालकस्य सद्गुणविकासाय भवेत्।
* वयो भेदानुसारं बालकानां मानसिकस्तरेषु विभिन्नता भवति। अपि च स्तरानुकूलासु आवश्यकतासु, रुचिषु च भिन्नताऽपि भवति। अतः कथायाः चयनं स्तरानुरूपं भवेत्। यथा—लघुबालकः स्ववातावरणे अश्व-कुक्कुर-वृषभ-मार्जारादि-परिचितेषु जीवेषु, काकादिपक्षिषु च रुचिं प्रदर्शयति।
* मध्यस्तराणाम् उच्चस्तराणाञ्च छात्राणां कृते वयोऽनुरूपा नित्यघटनानुकूला कथा उपकारिणी भवति। अतः वातावरणानुकूला कथाऽपि प्रदेया।

कथाशिक्षणस्य उद्देश्यानि

* बालकानां नैतिक-चारित्रिकविकसने योगदानम्।
* कथायाः माध्यमेन बालकानां साहित्याध्ययने रुचेः जागरणम्।
* बालकानां कल्पना-स्मरण-तर्कशक्तीनां विकासनम्।
* मानवचरित्रस्य विशेषतानां ज्ञानम्।
* वार्तालापस्य कलायां कौशलमुत्पाद्य लोकव्यवहारे नैपुण्यप्रदानम्।
* मनोरञ्जनेन सह बालकस्य ज्ञानस्य विकासनम्।
* सामाजिकतायाः नैतिकतायाश्च भावनयोरुद्भवः।
* छात्रेषु आकर्षकरूपेण स्वविचाराभिव्यक्तिकरणस्य प्रवृत्तेः उद्भवः विकासश्च।
* जीवनस्य वास्तविकतया सह परिचयः।
* कथाभण्डारस्य, नवशब्दभण्डारस्य च वर्द्धनम्।
* संस्कृतसम्भाषणे रुच्युत्पादनम्।
* पठन-श्रवण-सम्भाषणकौशलानां सम्पादनम्।

कथाप्रस्तावकस्य अध्यापकस्य गुणाः

कस्मिन्नपि विकसिते साहित्ये कथायाः न्यूनता नास्ति। वास्तविकतया साहित्यस्य अन्येषां भेदानामपेक्षया कथा अतीव लोकप्रिया। कथाः अधिकसंख्यया च मिलन्ति। परन्तु अध्ययनाध्यापनाय उचितानां कथानां चयनं न पर्याप्तम्, अपि तु तस्याः कथायाः साफल्यम् अध्यापकस्य मौखिकप्रस्तुतिम् आश्रयति। अतः अध्यापकस्य अधोलिखिताः गुणाः भवेयुः—

* अध्यापकः स्तरानुकूलतायाः प्रयोगे कुशलः स्यात्।
* कथायाः भावानुसारं स्वरपरिवर्तनं, भाषाप्रयोगः, आरोहावरोहादि-नाटकीयप्रयोगज्ञानमपि अध्यापकस्य भवेत्।
* कथां प्रति बालकानाम् एकाग्रतां सक्रियतां च रक्षितुं मध्ये मार्मिकप्रश्नान् कर्तुं सः समर्थः भवेत्।
* चित्रात्मकभाषायाः प्रयोगज्ञानं तस्य भवेत्।
* अध्यापकः बालमनोविज्ञानस्य ज्ञाता भवेत्। तदा कथायाः के अंशाः उपयुक्ताः, कथा कथं प्रेरणादायिका स्यात्, इत्यादिज्ञानं तस्य भविष्यति। कुत्र, कियत् बलं दातव्यं स जानाति।
* अध्यापकः सम्पूर्णायाः कथायाः पठनं कृत्वा हृदयङ्गमं कुर्यात्। ततः मनोयोगपूर्वकं छात्राणां समक्षं कथां वदेत्। तेन बालकाः कथायां लीनाः भविष्यन्ति।
* कथायाः भाषा सरला मधुरा च स्यात्। कथावतरणे अध्यापकः कुशलः स्यात्।
* कथायाः श्रावणसमये सः निरन्तरं प्रसन्नमुद्रया भवेत्।
* आवश्यकतानुसारं अङ्गसञ्चालने, भावाभिनयने च अध्यापकः दक्षः भवेत्। परन्तु तत्रापि शिष्टता भवेत्।

संस्कृतकथायाः विशेषताः

प्रत्येकं साहित्यानां मूलभूता काचित् विशेषता भवति। विशेषता तस्य आत्मा भवति। संस्कृतकथायाः अपि किमपि वैशिष्ट्यं भवति। यथा—

सोद्देश्यता—कथायाः लेखने किञ्चित् निश्चितमुद्देश्यं भवेत्। अस्याः रचना,

प्रयोजनं वा उद्देश्यहीनं मनोरञ्जकं न। तस्याः उद्देश्यं धर्मार्थकामानां प्राप्तिः। लोकनीति-राजनीति-आचारशिक्षादयः कथायां सुनिश्चितं भवेयुः। आचार्यविष्णुशर्मणा रचितं पञ्चतन्त्रं कथायाः प्राचीनतममुदाहरणम्। अनन्तरं हितोपदेश-बृहत्कथामञ्जरी-कथासरित्सागर-सिंहासनविंशतिकादयः प्रसिद्धाः।

कथावस्तु—संस्कृतकथानां कथावस्तु क्रमबद्धं, रोचकञ्च। जीवनस्य विभिन्नानां परिष्ठितीमाधारेण निर्मिताः कथाः लेखकस्य मौलिकतायाः परिचायिकाः। यदि जे.बी. ईसनबीनमहोदयस्य कथाविषयकम् अधस्तन-सिद्धान्तं निकषमिति मन्यामहे तर्हि संस्कृतकथाः एतदर्थं सिद्धाः। यथा प्रभावस्य ऐक्यम्, कथायाः श्रेष्ठता, घटनायाः प्राधान्यम्, कश्चन प्रधानः पात्रः, किञ्चित् समस्यायाः समाधानम्, एते पञ्चगुणाः कथायां भवेयुः।

चरित्रचित्रणम्—संस्कृतकथाग्रन्थेषु द्विप्रकारकं पात्रं मिलति। यथा पशुपक्षिणः मानवाश्च। कथासु पात्राणां बाहुल्यं नास्ति। परन्तु पात्राणां चरित्रस्य चित्रणं सम्यक् कृतमस्ति।

कथोपकथनम्—कथोपकथनं रुचिकरं, सरलं, बोधगम्यमस्ति। भाषाप्रयोगोऽपि पात्रानुरूपमस्ति।

भाषा-शैली—संस्कृतकथानां भाषा सरला, बोधगम्या, प्रवाहपूर्णा चास्ति। कथां रुचिपूर्णां कर्तुं शैलीषु अपि परिवर्तनं परिलक्ष्यते। सम्पूर्णा कथा गद्यात्मिका न भवति। मध्ये-मध्ये पद्यमपि भवति। इयमेव शैलीविविधता भवति। विशेषतः अयं प्रयोगः उपदेशात्मिकासु कथासु सूक्तिरूपेण भवति।

कथाशिक्षणम्

साहित्यस्य कश्चन भेदः भवति कथा। अतः सामान्यगद्यापेक्षया अस्याः अध्यापनं भिन्नं भवति। यावत् कथायाः आवश्यकतायाः ध्यानं न प्रदीयते, तावत् उद्देश्यानि अपि सिद्धानि न भवन्ति। अतः कथाशिक्षणे सिद्धान्ताः विचारणीयाः।

कथाः पाठ्यपुस्तकेषु, द्रुतपाठ्यपुस्तकेषु च भवन्ति। परन्तु पाठ्यपुस्तकानि गभीराध्ययनाय निमित्तानि, तथा द्रुतपाठ्यपुस्तकानि व्यापकाध्ययनाय भवन्ति। सूक्ष्माध्ययनं गभीराध्ययनं वा एतेषामुद्देश्यानि न भवन्ति। अतः सङ्ग्रहीतानां कथानां पाठनं भिन्नसोपानानुसारं भवेत्। परन्तु पाठ्यपुस्तके स्थितानां कथानामध्यापनं शिक्षकः मौखिकरूपेण कुर्यात्। अस्मिन् विषये पूर्वमपि उक्तं यत् सङ्ग्रहीतानां

कथानां भाषा, सरला, बोधगम्या च भवेत्। परन्तु कदाचित दृश्यते यत् अन्यासु दृष्टिषु सङ्कलकः कथायाः चयनं करोति, तत्र भाषापक्षः उपेक्षितः भवति। अपि च भाषा ईदृशी कठिना भवति। अतः पाठ्यपुस्तकविषयवत् कथा अपि भवति। तदानीमध्ययनमपि सामान्यगद्यपद्धत्या कर्त्तव्यम्। अतः यथा गद्यभागात् प्रश्नाः क्रियन्ते तथैव कथाभागादपि प्रश्नाः आगमिष्यन्ति। अतः गद्यपाठनपद्धतिवत् काठिन्यनिवारणपुरःसरं अधोलिखितसोपानानुसारम् अस्याः शिक्षणं प्रदेयम्। अपि च शिक्षणाय सामान्यतः शब्दार्थव्याख्या नास्ति।

उपर्युक्तकथनानुसारेण कथाशिक्षणक्रमः अनेन प्रकारणे भवेत्। यथा—

1. सामान्यपरिचयः
2. सामान्योद्देश्यानि
3. विशिष्टोद्देश्यानि
4. सामाान्योपकरणानि
5. विशिष्टोपकरणानि
6. पूर्वज्ञानम्
7. प्रस्तावना
8. उद्देश्यकथनम्
9. पाठोपस्थापनम्

   (1) अत्रायमुल्लेखनीयः यत् प्रस्तुतः पाठः कतिषु अन्वितिषु विभाजनीयः। एका अन्वितिः कुतः आरभ्य कियत् पर्यन्तम्।

   (2) कठिनशब्दानामर्थः, पात्राणां नामानि च सोपानानुसारं श्यामफलके लेखनीयानि। तेन कथायाः अवगमने छात्राः सफलाः भविष्यन्ति। तदनन्तरम् अध्यापकः मूलपाठं प्रति आगच्छेत्। पाठोपस्थापनम् उद्देश्यकथनात् परं स्वयमेव प्रारब्धं भवति।

10. अध्यापककथनम्—अध्यापकेन रुचिपूर्णया, सरलया, सुबोधया च भाषया कथायाः प्रथमांशस्य प्रस्तुतिः।
11. बोधप्रश्नाः (उपर्युक्तस्यांशस्याधारेण)
12. अध्यापककथनम्—पूर्वोक्तविधिना कथायाः शेषभागस्य प्रस्तुतिः।

13. बोधप्रश्नाः—कथायाः शेषभागात् पूर्ववत् प्रश्नाः।

14. नवशब्दव्याख्या—नवीनशब्दानां सरलीकरणं करणीयम्।

15. मूलकथायाः शुद्धोच्चारणम्।

16. उत्प्रेरणात्मक-प्रश्नाः।

17. कथानिष्कासनम् (पुनरावृत्तिः)—सम्पूर्णायाः कथायाः, केन्द्रीय-महत्त्वस्य च विषये प्रश्नाः, अथवा तस्यैव विभिन्नैः छात्रैः खण्डशः आवृत्तिः।

18. गृहकार्यम्—गृहकार्यस्य बहूनि रूपाणि भवितुमर्हन्ति। यथा—

(क) कथायाः विभिन्नानां पात्राणां वार्तालापस्य सारांशलेखनम्।

(ख) घटनानां क्रमागतरूपरेखायाः संरचना।

(ग) कथायाम् आगतानां प्रश्नानाम् उत्तरलेखनम्।

कथायाः पाठयोजना

मूर्खपण्डितकथा

कदाचित् एकस्मिन् गुरुकुले चत्वारः ब्राह्मणाः सुहृदः पठन्ति स्म। ते बहुकालम् अनेकान् ग्रन्थान् पठितवन्तः। तदनन्तरं ते गुरोः अनुज्ञां स्वीकृत्य स्वगृहं प्रस्थितवन्तः।

किञ्चित् दूरं गमनात् परं मार्गः द्विधा विभक्तः आसीत्। एकेन मार्गेण शवयात्रायां बहवः जनाः गच्छन्ति स्म। तेषां सुहृदां संशयो जातः 'केन मार्गेण गन्तव्यम्' इति। एकेन पुस्तकं दृष्ट्वा उक्तं 'महाजनो येन गतः स पन्थाः' इति। अतः ते शवयात्रामनुसृत्य श्मशानं गतवन्तः। तत्र श्मशाने तैः एकः रासभः दृष्टः। तदा द्वितीयेन पुस्तकं दृष्ट्वा उक्तं 'उत्सवे च श्मशाने च सम्मिलन्ति हि बान्धवाः' इति। अयम् अस्माकं बान्धवः, पूजनीयः इति निश्चितवन्तः। तदा त्वरितगमनः कश्चन क्रमेलकः तत्र आगतः। तृतीयेन पुस्तकं दृष्ट्वा उक्तं 'धर्मस्य त्वरिता गतिः'। अतः अयं धर्मः अस्ति इति। चतुर्थेन तदा पुस्तकम् अवलोक्य कथितम् 'इष्टं धर्मेण योजयेत्' इति। अतः वयं प्रियं बान्धवं धर्मेण योजयामः इति चिन्तयित्वा रासभं, क्रमेलकस्य ग्रीवायां रज्जुना बद्धवन्तः।

तत्र सम्मिलिताः सर्वे तान् दृष्ट्वा 'एते मूर्खपण्डिताः' इति परिहासं कृतवन्तः।

छात्राध्यापकस्य नाम ....

विद्यालयस्य नाम...

दिनाङ्कः .... विषयः – संस्कृतम् (कथा)

कक्षा – नवमी प्रकरणम् – मूर्खपण्डितकथा

कालांशः—

सामान्योद्देश्यानि

* संस्कृतभाषायाः कथासाहित्यं प्रति अनुरागोत्पादनम्।
* कथामाध्यमेन कठिनविषयस्यापि ज्ञानं सरलभाषया, रुचिपूर्णप्रकारेण प्रदानम्।
* कथामाध्यमेन सुन्दरसजीवादर्शानां छात्राणां मस्तिष्कपटलेषु अङ्कनेन तेषां विकासस्य मार्गस्य प्रशस्तीकरणम्।
* ज्ञानप्रदानेन सहैव छात्राणां मनोरञ्जनस्यापि सम्पादनम्।
* छात्राणां कल्पनाशक्तेः, चिन्तनशक्तेः तर्कशक्तेश्च जागरणम्।
* संस्कृतकथासाहित्यमाध्यमेन भारतीयसंस्कृतेः ज्ञानम्, विद्यार्थिनां चारित्रिकः विकासश्च।
* सामाजिकतायाः, नैतिकतायाश्च भावनयोरुद्भवः।
* छात्रेषु आकर्षकरूपेण स्वविचाराभिव्यक्तिकरणस्य प्रवृत्तेः उद्भवः विकासश्च।
* जीवनस्य वास्तविकतया सह परिचयः।
* कथाभण्डारस्य, नवशब्दभण्डारस्य च वर्द्धनम्।
* संस्कृतस्य सरलवाक्यानि श्रुत्वा, पठित्वा च अर्थावबोधनस्य क्षमतावर्द्धनम्।
* संस्कृतसम्भाषणे रुच्युत्पादनम्।
* संस्कृतभाषायाः कृते आत्मीयतायाः भावनायाः उद्भवः।

विशिष्टोद्देश्यानि

*** ज्ञानात्मकम्—**

नवशब्दानां ज्ञानं यथा—रासभः, क्रमेलकः, शवयात्रा, सुहृत्, पन्थाः, महाजनः, त्वरिता, रज्जुः।

विषयवस्तुसम्बद्धः—"मूर्खतापूर्वकम्, अविचार्य वा कार्यकरणेन कीदृशं फलं प्राप्यते" इति ज्ञापनम्।

हास्येन सहैव "स्वविवेकोपयोगस्य ज्ञानप्रदानम्।"

*** कौशलात्मकम्—**

प्रश्नोत्तराणां माध्यमेन संभाषणस्य चिन्तनकौशलस्य च विकासः।

कथानिष्कासनस्य माध्यमेन स्वशब्देषु स्वमनोगतभावानां प्रकटनस्य कौशलोत्पादनम्।

गृहकार्यस्य माध्यमेन लेखनकौशलस्य विकासः।

*** अभिरुच्यात्मकम्—**

अन्यासामपि शिक्षाप्रदकथानां श्रवणे-पठने-सङ्ग्रहणे च रुच्युत्पादनम्।

संस्कृतकथासाहित्यस्य, पञ्चतन्त्र-हितोपदेशादीनां पठने, तेभ्यः निज-लघुपुस्तकसङ्ग्रहे स्थानप्रदाने रुच्युत्पादनम्।

*** अभिवृत्त्यात्मकम्—**

स्वव्यावहारिक जीवने अपि कथया प्रेरणां स्वीकृत्य सर्वदा सुविचार्य, स्वविवेकेन कार्यसम्पादनस्य अभिवृत्तेः विकासः।

सहायकोपकरणानि

सामान्यानि—सुधाखण्डाः, मार्जनी, सङ्केतिका, आकुञ्चश्यामफलकम्।

विशिष्टानि—चित्राणि प्रस्तावनायाम्, कथोपकथने च।

पूर्वज्ञानम्

छात्राः बाल्यकालादेव परिवारजनेभ्यः, अध्यापकेभ्यः, पुस्तकेभ्यः वा कथाः शृण्वन्ति, पठन्ति च। सामान्यरूपेण ते जानन्त्येव यत् सर्वदा कार्यकरणात् पूर्वं चिन्तनमावश्यकमस्ति, अन्यथा हानिरेव भवति।

प्रस्तावना—छात्राध्यापकः चित्रं प्रदर्श्य निम्नाङ्कितान् प्रश्नान् पृच्छति।

प्रस्तावितप्रश्नाः	संभावितोत्तराणि
प्र. 1. एषः मनुष्यः कस्योपरि अस्ति?	मनुष्यः वृक्षस्य उपरि अस्ति।
प्र. 2. वृक्षस्योपरि सः किं करोति?	वृक्षस्योपरि सः शाखां छेदयति।
प्र. 3. सः कां शाखां छेदयति?	सः यस्योपरि तिष्ठति तामेव शाखां छेदयति।
प्र. 4. एतत् कार्यं कीदृशमस्ति? मूर्खतायाः, बुद्धिमत्तायाः वा?	एतत् मूर्खतायाः कार्यमस्ति।

उद्देश्यकथनम्—

अद्य वयं मूर्खपण्डितानां कथां पठिष्यामः, यत् कथं ते शास्त्रज्ञाः, विद्वांसः भूत्वा अपि स्वविवेकस्य उपयोगमकृत्वा मूर्खतापूर्वकं कार्याणि कुर्वन्ति। तथा लोके जनानामुपहासस्य, अपमानस्य च पात्राणि भवन्ति।

उद्देश्यम्	छात्राध्यापक/छात्र क्रियाः	श्यामपट्टकार्यम्
स्वशब्देषु कथायाः प्रस्तुतीकरणम्	**कथोपस्थापनम्**—छात्राध्यापकः चित्राणां प्रदर्शनं कुर्वन स्वशब्देषु रुचिपूर्णतया कथां श्रावयति। छात्राः ध्यानेन शृण्वन्ति, पश्यन्ति। तथा कथामध्ये रुचिं गृह्णन्ति।	
	प्रथमान्वितिः—	
सरलसंस्कृते रोचकतां, जिज्ञासां च उत्पादयन् कथायाः प्रस्तुतीकरणम्	एकदा चत्वारः ब्राह्मणाः आसन्। ते गुरुकुले शिक्षां गृह्णन्ति। एकदा ते ब्राह्मणाः विचारं कृतवन्तः यद् इदानीम् अस्माकं शिक्षा पूर्णा अभवत्। अतः वयं स्वगृहं गमिष्यामः। अतः ते गुरोः आज्ञां स्वीकृत्य स्वपुस्तकानि नीत्वा आश्रमतः प्रस्थानं कृतवन्तः। ते यदा मार्गे अग्रे गतवन्तः, तदा तत्र द्वौ मार्गौ स्तः। तदा तैः चिन्तितं यत् "केन मार्गेण गन्तव्यम्?" तस्मिन्नेव समये तत्र शवयात्रा आगतवती। तदा एकेन पुस्तकं दृष्ट्वा	चित्राणि

	कथितम् यत् महाजनः येन मार्गेण गच्छति स एव मार्गः भवति। अतः ते शवयात्रायाः अनुसरणं कृतवन्तः। तत्र श्मशाने एकः गर्दभः आसीत्। द्वितीयेन पुस्तकं दृष्ट्वा उक्तम्-उत्सवे, श्मशाने वा यः कोऽपि मिलति सः अस्माकं बन्धुः भवति। अतः ते गर्दभं स्वबन्धुं मत्वा तस्य गन्धेन, पुष्पैश्च पूजाम् आरब्धवन्तः। तस्य पादवन्दनां कृतवन्तः।	
श्रुतांशस्य मूल्याङ्कनम्	**बोधप्रश्नाः—**	
	प्र. 1. ब्राह्मणाः कुत्र शिक्षां गृह्णन्ति स्म?	गुरुकुले।
	प्र. 2. ते किं नीत्वा आश्रमतः प्रस्थानं कृतवन्तः?	पुस्तकानि।
	प्र. 3. श्मशाने यः मिलति सः अस्माकं किं भवति?	बन्धुः।
	प्र. 4. श्मशाने ते कं दृष्टवन्तः?	गर्दभम्
	द्वितीयान्वितिः—	
कथायाः द्वितीयभागस्य प्रस्तुतीकरणम्	अग्रे ते एकम् उष्ट्रम् दृष्टवन्तः। तं दृष्ट्वा तृतीयेन कथितम्-धर्मस्य शीघ्रा गतिः भवति। अतः एषः धर्म एव अस्ति। चतुर्थेन उक्तम् यत् शास्त्रे लिखितमस्ति 'स्वमित्रम् धर्मेण सह योजनीयम्'। अतः ते गर्दभं उष्ट्रस्य ग्रीवायां बद्धवन्तः। तस्मिन्नेव समये तत्र आगताः जनाः तान् परिहसितवन्तः।	चित्राणि
	बोधप्रश्नाः—	
श्रुतांशेन प्राप्तज्ञानस्य मूल्याङ्कनम्	प्र. 1. अग्रे ते कं दृष्टवन्तः?	उष्ट्रम्।
	प्र. 2. तं दृष्ट्वा तृतीयेन किमुक्तम्?	एषः धर्मोऽस्ति।
	प्र. 3. इष्टः केन सह योजनीयः?	धर्मेण सह।
	प्र. 4. ते उष्ट्रं केन सह बद्धवन्तः ?	गर्दभम्।
	प्र. 5. के ब्राह्मणान् परिहसितवन्तः ?	जनाः।

नवशब्दव्याख्या—

छात्राध्यापकः विभिन्नैः प्रविधिभिः, उपकरणैः च कठिनपदानाम् अर्थं स्पष्टयति येन छात्राः अर्थावबोधने समर्थाः भवेयुः। छात्राः ध्यानेन शृण्वन्ति–पश्यन्ति च, कठिनपदानां अर्थं स्मृत्वा अर्थावबोधं प्राप्नुवन्ति।

उद्देश्यम्—कठिनपदानामर्थावबोधनेन तेषामनुप्रयोगे क्षमतोत्पादनम्।

शब्दः	अर्थः	प्रविधिः	प्रयोगः
पारङ्गताः	कुशलाः	वाक्यप्रयोगः	मराठाः युद्धकलायां पारङ्गताः आसन्।
महाजनः	यः व्यवसायं करोति	पर्यायविधिः	व्यवसायी, वणिक्, व्यापारी
ग्रीवायां	कंठप्रदेशे	वाक्यप्रयोगः	माता ग्रीवायां हारं धारयति।
क्रमेलकः	उष्ट्रः	प्रतिकृति-द्वारा	क्रमेलकस्य प्रतिकृतिं प्रदर्शयति।
त्वरिता	शीघ्रा	विलोमविधिः	त्वरिता × मन्दा, वायुयानस्य गतिः त्वरिता भवति।
इष्टम्	प्रियम्	विलोमविधिः	इष्टं × अनिष्टम्

उद्देश्यम्	**छात्राध्यापक/छात्र क्रियाः**	**श्यामपट्टकार्यम्**
शुद्धोच्चारणस्य सम्पादनम्	**मूलकथायाः शुद्धोच्चारणम्**— छात्राध्यापकः छात्रैः मूलकथायाः भावानुगुणं, शुद्धोच्चारणपूर्वकं वाचनं कारयति। छात्राः स्पष्टं शुद्धञ्च पठन्ति, अन्ये छात्राः ध्यानेन शृण्वन्ति।	
1. विचाराणां विश्लेषणम्। 2. स्वमनोगत-भावानां, चिन्तनस्य च प्रकटनम्।	**उत्प्रेरणात्मकप्रश्नाः**— प्र. 1. अस्याः कथायाः मूलभाव. किमस्ति? प्र. 2. "विचारं कृत्वा एव कार्यं करणीयम्" इत्यस्य कोऽभिप्रायः? प्र. 3. अविचार्य कार्यकरणेन काः हानयः भवन्ति?	

	कथनिष्कासनम्—	
पठित- कथायाः मूल्याङ्कनम्।	रिक्तस्थानानि पूरयन्तु— (गुरुकुले, महाजनः, उष्ट्रः, रजकः, त्वरिता, ग्रीवायां, बान्धवः, धर्मेण, पारङ्गताः, रासभः, पन्थानौ)	
	एकदा..........चत्वारः ब्राह्मणाः पठन्ति स्म। वयं सर्वविद्या......। अग्रे मार्गे द्वौ..... आस्ताम्। तैः चिन्तितम्..........येन गतः स पन्थाः। श्मशाने तैः .... दृष्टः। अयं अस्माकं.......। तैः तस्य.......... प्रारब्धा। तदैव एकः.......... तत्रागतः। धर्मस्य .... गतिः। इष्टं.......... योजयेत्। तैः रासभः उष्ट्रस्य.......... बद्धः।	गुरुकुले पारङ्गताः, पन्थानौ महाजनः रासभः,बान्धवः पादवन्दना, उष्ट्रः त्वरिता, धर्मेण ग्रीवायाम्।
	शीर्षकप्रकटनम्-	
चिन्तनशक्तेः विकासः।	छात्राध्यापकः सर्वेभ्यः छात्रेभ्यः कथायाः किमपि अन्यत् शीर्षकं चिन्तयितुं कथयति। छात्राः शीर्षकं वदन्ति। छात्राध्यापकः शीर्षकं श्यामपट्टे लिखति।	1. विद्यातः बुद्धिः उत्तमा। 2. सुविचार्यैव कार्यं कर्त्तव्यम्।
	गृहकार्यम्-	
स्वाध्याय- प्रवृत्तेः विकासः।	लिखितम्- निम्नपदानामर्थं लिखन्तु- (i) क्रमेलकः (ii) रासभः (iii) ग्रीवा (iv) रजकः (v) महाजनः प्र. 2. कथायाः सारं मूलभावं च स्वशब्देषु लिखन्तु। **मौखिकम्—** नवशब्दानामर्थस्मरणं कुर्वन्तु। कथायाः शिक्षां स्मरन्तु।	

❖❖❖

द्वादशोऽध्यायः

काव्यशिक्षणम्

भारतीयैरालङ्कारिकैः काव्यविमर्शे अनेके वादाः पुरस्कृताः सन्ति। रसवादः, रीतिवादः, वक्रोक्तिवादः, ध्वनिवादश्च तत्र प्रसिद्धाः सन्ति। अनेकैराचार्यैः काव्यलक्षणं बहुधा व्याख्यातं वर्तते। यथा—

संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।

काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम्॥ — अग्निपुराणम्।

इष्टार्थव्यवच्छिन्ना पदावली काव्यमिति दण्डी।

वाक्यं रसात्मकं काव्यमिति - विश्वनाथकविराजः।

'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'— इति मम्मटाचार्यः।

रमणीयार्थप्रतिपादकः शब्दः काव्यमिति जगन्नाथपण्डितराजः।

इत्येतादृशानि प्राचीनकाव्यलक्षणानि विमृश्य चमत्कारिबोधजनकशब्दार्थयुगलं काव्यमिति लक्षणं निरूपयन्ति श्रीकृष्णचन्द्रचतुर्वेदाः स्वकीये अलङ्कारध्वनिविमर्शनामके ग्रन्थे।

काव्यस्य प्रयोजनानि सङ्गृहीतानि मम्मटाचार्येण यथा—

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।

सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥" इति।

तत्र सद्यःपरनिर्वृतिः = रसास्वादानन्दानुभूतिः परमं प्रयोजनमिति च वर्णयति।

एवं काव्यं जीवितस्य व्याख्यानं भवति, समाजस्य दर्पणञ्च। अत्र मानवीयभावनानामभिव्यक्तिः हृदयाह्लादकरीत्या क्रियते। शब्दयोजना, वृत्तबन्धः, अलङ्काराणां चमत्कारः, भावसौन्दर्यं, रीतिवैचित्र्यं, रसनिर्भरता च काव्यमास्वादयोग्यं कुर्वन्ति। एवञ्च काव्यशिक्षणं छात्राणां मानसिकविकासाय, कल्पनाशक्तेः, रचनात्मकप्रवृत्तेश्च विकासाय, सौन्दर्यानुभूतये च उपयुज्यते।

संस्कृतकाव्यशिक्षणस्योद्देश्यानि—

(क) सामान्योद्देश्यानि

(ख) विशिष्टोद्देश्यानि

(क) सामान्योद्देश्यानि—

1. आरोहावरोहपूर्वकं भावानुसारं सुस्वरेण पद्यानां वाचनेन आनन्दानुभवः।
2. पद्यानामर्थस्य, भावस्य च अवगमने क्षमता।
3. काव्यसौन्दर्यानुभूतिः।
4. विभिन्नकाव्यशैलीनां परिचयः।
5. कवेः व्यक्तित्वस्य, काव्यमहत्त्वस्य च परिचयः।
6. उदात्तभावानां, जीवनादर्शानाञ्च परिचयेन नैतिकविकासः।
7. काव्याध्ययने रुच्युत्पादनम्।
8. पद्यरचनाप्रवृत्त्यै प्रेरणा।
9. छात्राणां कल्पनाशक्तेः, रचनाशक्तेश्च विकासः।

(ख) विशिष्टोद्देश्यानि—

विशिष्टोद्देश्यानि पद्यविशेषेण सम्बद्धानि भवन्ति।

1. पद्ये कविना वर्णितस्य भावस्य परिचयः।
2. कवेः विचारधारायाः, रचनाशैल्याश्च परिचयः।
3. कविना वर्णितानामादर्शानां ग्रहणम्।
4. कवेः जीवनस्य, अन्यकृतीनाञ्च परिचयः।
5. समीक्षात्मकदृष्ट्या, तुलनात्मकदृष्ट्या च तस्य काव्यस्य संस्कृतसाहित्ये स्थानं कीदृशमिति विमर्शः।

पद्यशिक्षणस्य विभिन्नप्रणाल्यः

उपर्युक्तानामुद्देश्यानां साधनाय विभिन्नेषु स्तरेषु विषयानुसारं विभिन्नाः प्रणाल्यः प्रयुज्यन्ते।

1. अनुवादप्रणाली

अनया प्रणाल्या अध्यापकः संस्कृतपद्यस्य पदच्छेदं कृत्वा, अन्वयमुक्त्वा, प्रत्येकं शब्दस्यार्थं मातृभाषया वदति। ततः पद्यस्य भावं विवृणोति। अस्यां प्रणाल्यां छात्राः निष्क्रियाः भवन्ति। परन्तु प्रारम्भिकस्तरे अन्वयकाठिन्ये सति एषैव प्रणाली आश्रयणीया भवति।

2. दण्डान्वयप्रणाली

ओङ्कारदासेन अन्वयप्रबोधे दण्डान्वयस्य लक्षणमित्थं कथितमस्ति।

"आद्यं विशेषणं योज्यं विशेष्यं तदनन्तरम्।
क्त्वाणमुल्ल्यपप्रभृत्येवम्पूर्वं दण्डान्वयो भवेत्॥" इति।

दण्डान्वयविधौ व्याख्याता सम्पूर्णस्य पद्यस्य अर्थं मनसि निधाय तत्र स्थितानि पदानि वाक्यरूपेण योजयति। विशेषणपदानि पूर्वं संयोज्य, तदनन्तरं विशेष्यपदं योजयति। एवं प्रधानक्रियापदेन सम्बद्धानि कृदन्तक्रियापदानि पूर्वं संयोज्य प्रधानक्रियापदमन्ते स्थापयति। यथा क्त्वान्तम् – गृहं गत्वा पश्यति।

ल्यबन्तम् – नेत्रे निमील्य निद्राति। णमुलन्तम् – कथां स्मारं स्मारं हसति। तुमन्नन्तम् – संस्कृतं पठितुं यतते।

दण्डान्वयेन पद्यस्य बोधनं प्रदर्श्यते।

आशीर्भिरभ्यर्च्य मुनिः क्षितीन्द्रं प्रीतः प्रतस्थे पुनराश्रमाय।
तं पृष्ठतः प्रष्ठमियाय नम्रो हिंस्रेषुदीप्तास्त्रधनुः कुमारः॥

भट्टिकाव्यम्–1–24

पदच्छेदं, पदार्थञ्च बोधयित्वा वाक्यार्थं बोधयितुं दण्डान्वयः प्रयुज्यते। यथा—

विशेषणम्	विशेष्यम्	कृदन्तक्रिया-पदम्	प्रधान-क्रियापदम्
प्रीतः	मुनिः	पुनः	
	क्षितीन्द्रम्		
	आशीर्भिः	अभ्यर्च्य	प्रतस्थे।
	आश्रमाय		

हिंस्रेषुदीप्तास्त्रधनुः,

नम्रः कुमारः

प्रष्ठं तं पृष्ठतः इयाय।

एवं कर्तृकर्मादिविशेष्येभ्यः पूर्वं विशेषणानि संयोज्य, कृदन्तक्रियापदानि, क्रियाविशेषणानि च प्रधानक्रियातः पूर्वं निधाय दण्डवत् अन्वयोऽत्र व्याख्यात्रा उपस्थाप्यते। ततः पद्यस्य वाच्यार्थः, भावश्च स्पष्टीक्रियते।

अत्र अध्यापकः कर्त्रादीनां, तद्विशेषणानाञ्च अन्वयं प्रश्नद्वारा सम्पाद्य छात्रेषु सक्रियत्वं कल्पयितुं शक्नोति। तत्कथमिति रघुवंशस्य पद्येन स्पष्टीक्रियते।

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्॥

पदच्छेदः— दुदोह, गाम्, सः, यज्ञाय,
सस्याय, मघवा, दिवम्।
सम्पद्विनिमयेन, उभौ,
दधतुः, भुवनद्वयम्।

दण्डान्वयः— प्रथमपादे कर्तृवाचकं पदं किम् ? सः (दिलीपः) ;
किमर्थं ? यज्ञाय,
कर्मवाचकं किम् ? गाम् (भूमिं),
किं चकार ? दुदोह।
द्वितीयपादे कर्तृपदं किम् ? मघवा
किमर्थं ? सस्याय,
कर्मवाचकं किम् ? दिवम्,
किं चकार ? दुदोह।
उत्तरार्धे कर्तृपदं किम् ? उभौ।
करणवाचकं किम् ? सम्पद्विनिमयेन।
कर्मवाचकं किम् ? भुवनद्वयम्।
किं चक्रतुः ? दधतुः।

सः (दिलीपः) यज्ञाय गां दुदोह। मघवा सस्याय दिवं दुदोह। उभौ सम्पद्विनिमयेन भुवनद्वयं दधतुः।

एवं संस्कृताध्यापकः दण्डान्वयं सम्पाद्य भावार्थं बोधयति। यदि छात्राः कारकैः पदार्थैश्च परिचिताः स्युः तदेयं प्रणाली उपयुज्यते। माध्यमिकस्तरे, उन्नतस्तरे च प्रणालीयमुपयोक्तुं शक्यते। तथापि नेयं वैज्ञानिकी प्रणाली।

3. खण्डान्वयप्रणाली—

ओङ्कारदासेन प्रदर्शितं खण्डान्वयस्य लक्षणमेवमस्ति।

'कर्तृकर्मक्रियास्तावत् श्लोके योज्यास्ततः परम्।
किमो रूपं पुरस्कृत्य तृतीयादि नियोजयेत्॥
ल्यबन्तश्च तुमन्तश्च क्त्वान्तं कर्मविभूषितम्।
खण्डान्वये पुनः प्रश्नपूर्वमन्ते प्रयोजयेत्॥' इति।

पद्यगतानां सन्धिसमासादीनां विवरणं कृत्वा, कठिनपदानामर्थं बोधयित्वा अध्यापकः अन्वयबोधनार्थं, व्याख्यां कर्तुञ्च खण्डान्वयप्रणालीमाश्रयति। अत्र क्रियापदमादाय किम् शब्दस्य रूपैः कः, कं, केनेत्यादिभिः कर्त्राकांक्षा, कर्माकांक्षा, करणाकांक्षा, सम्प्रदानाकांक्षा, अपादानाकांक्षा, अधिकरणाकांक्षा, सम्बन्धाकांक्षा, एवं कीदृशः, कथम्भूतः इत्यादिभिः विशेषणाकांक्षा, च प्रश्नानां द्वारा क्रियते। तथा चेयमाकांक्षाप्रणाली इत्यप्युच्यते। यथा रघुवंशस्य चतुर्थसर्गे प्रथमश्लोकः—

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः॥

पदच्छेदः—सः, राज्यं, गुरुणा, दत्तं, प्रतिपद्य, अधिकं, बभौ।
दिनान्ते, निहितं, तेजः, सवित्रा, इव, हुताशनः॥

खण्डान्वयः— अत्र क्रियापदं किम् ? बभौ।
कः बभौ? सः (रघुः) बभौ।
किं कृत्वा ? प्रतिपद्य।
किं प्रतिपद्य ? राज्यं प्रतिपद्य।
कीदृशं राज्यम् ? दत्तम्।
केन दत्तम् ? गुरुणा दत्तम्।

कथं बभौ ? अधिकं बभौ।

क इव बभौ ? हुताशन इव।

किं कृत्वा ? प्रतिपद्य।

किं प्रतिपद्य ? तेजः प्रतिपद्य।

कीदृशं तेजः ? निहितम्।

केन निहितम् ? सवित्रा निहितम्।

कदा ? दिनान्ते

सः (रघुः) गुरुणा दत्तं राज्यं प्रतिपद्य दिनान्ते सवित्रा निहितं तेजः प्रतिपद्य हुताशन इव अधिकं बभौ।

खण्डान्वयप्रणाल्यां संस्कृतभाषयैव प्रश्नाः क्रियन्ते। व्याकरणशास्त्रसिद्धान्तानुसारं क्रियान्वयित्वं, क्रियाजनकत्वं वा कारकत्वं भवति। अतः सर्वेषां कारकाणां क्रियावाचकेन धातुना सह साक्षात् परम्परया वा सम्बन्धो भवति। एवञ्च क्रियापदेन कर्त्रादीनामाकांक्षा वैज्ञानिकी भवति। अस्यां प्रणाल्यां छात्राः सक्रियाः भवन्ति। पद्यस्य सामान्यं ज्ञानं भवति। ततः परमध्यापकेन विस्तृता व्याख्या क्रियते।

4. व्याख्याप्रणाली—

अनुवादप्रणाल्यां सरलशब्दार्थस्य प्राधान्यं भवति, किन्तु व्याख्याप्रणाल्यां भावार्थस्यापि। भावार्थस्य स्पष्टीकरणाय शब्दार्थः, वाक्यार्थश्च प्रतिपाद्यते। कवेराशयः, अन्यप्रसङ्गाश्च विव्रियन्ते। संक्षिप्ता व्याख्यैव टीकेति उच्यते। गद्यशिक्षणे टीकाविधेः स्वरूपं प्रदर्शितमस्ति। रघुवंशस्य व्याख्याने भूमिकायां मल्लिनाथेन प्रतिज्ञातमस्ति—

इहान्वयमुखेनैव सर्वं व्याख्यायते मया।
नामूलं लिख्यते किञ्चित् नानपेक्षितमुच्यते॥ इति।

केचित् व्याख्याकाराः मूलस्य व्याख्यानं विहाय अनपेक्षितं बहु लिखन्ति। परन्तु मल्लिनाथेन व्याख्यायाः निष्कृष्टं स्वरूपमत्र निगदितम्। पद्यस्य व्याख्यानस्य स्वरूपं प्रदर्शयितुं मल्लिनाथस्य व्याख्यानमत्रोदाह्रियते।

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना॥ (रघु - 1- 23)

द्विविधं वृद्धत्वं ज्ञानतो वयसा च। अत्र तस्य राज्ञः ज्ञानवृद्धत्वमाह अनाकृष्टस्येति। विषयैः शब्दादिभिः, अनाकृष्टस्य अवशीकृतस्य, विद्यानां वेदवेदाङ्गादीनां, पारदृश्वनः पारमन्तं दृष्टवतः। दृशेः क्वनिप्। धर्मे रतिर्यस्य तस्य राज्ञः, जरसा जरया विना। नि. 'पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा' इत्यमरः। 'षिद्भिदादिभ्योऽङ्' इत्यङ्प्रत्ययः। 'जराया जरसन्यतरस्याम्' इति जरसादेशः। वृद्धत्वं वार्धकमासीत्। तस्य यूनोऽपि विषयवैराग्यादिज्ञानतो वृद्धत्वमासीदित्यर्थः। नाथस्तु चतुर्विधवृद्धत्वमिति कृत्वा तत्र 'अनाकृष्टस्येत्यादिना विशेषणत्रयेण वैराग्यविद्याज्ञानवृद्धत्वान्युक्तानीत्यवोचत्।'

एतादृशव्याख्यानानामध्ययनेन संस्कृताध्यापकः श्लोकानां भावार्थं स्पष्टीकर्तुं प्रभवति। छात्रानपि व्याख्यानं पठितुं प्रेरयित्वा अध्यापकः मार्गदर्शनं कुर्यात्।

5. तुलनाप्रणाली—

कस्यचित् कवेः पद्यस्य व्याख्यनसन्दर्भे तस्यैव कवेः अथवा अन्यकवीनां पद्यस्य भावेन, रचनाशैल्या वा तुलना प्रस्तूयते। एवं समानतादृष्ट्या, भिन्नतादृष्टया च विभिन्नकाव्यानां, विभिन्नकवीनाञ्च विचारधाराणां, रचनाशैलीनाञ्च तुलनात्मकमध्ययनं भवति। वाल्मीकेः, अश्वघोषस्य, कालिदासस्य काव्येषु नाटकेषु, आधुनिककवीनां, पाश्चात्यकवीनां काव्येषु, नाटकेषु च वर्णनेषु, पात्रचित्रणे, कथारचनायाञ्च साम्यस्य, वैषम्यस्य च अध्ययनम् उन्नतस्तरे छात्राणां साहित्यविमर्शे उपयुक्तं भवति।

6. समीक्षाप्रणाली—

काव्यानां, नाटकानाञ्च व्याख्यानसन्दर्भे आलङ्कारिकसिद्धान्तानामाधारेण पर्यालोचनं क्रियते। वस्तुनेतृरसादीनां प्रतिपादने कविना प्रदर्शिता प्रतिभा समीक्ष्यते। अध्यापकस्य मार्गदर्शने छात्राः काव्यानि समीक्ष्य विस्तृताध्ययनं कुर्वन्ति। एषापि प्रणाली उन्नतस्तरे, अनुसन्धाने च उपयुज्यते।

7. भाष्यप्रणाली—

व्याख्याप्रणाल्याः विस्तृतं रूपं भवति भाष्यप्रणाली। पतञ्जलिमहर्षेः व्याकरणमहाभाष्यं, ब्रह्मसूत्राणाम्, उपनिषदां, श्रीमद्भगवद्गीतायाश्च प्रसिद्धैराचार्यैः प्रणीतानि भाष्याणि च संस्कृतवाङ्मये उपलभ्यन्ते। अत्राचार्यैः स्वसिद्धान्तप्रतिपादनाय अनेके लोकव्यवहाराः, पौराणिककथाश्च उदाह्रियन्ते।

न्यायानां, युक्तीनां, दृष्टान्तानाञ्च प्रतिपादनेन स्वविचाराः सिद्धान्तीक्रियन्ते। रामायणभागवतादीनां व्याख्याने पौराणिकैरपि इयं प्रणाली आश्रीयते। एषापि प्रणाली शास्त्राणामध्ययने उन्नतस्तरे एव उपयुज्यते।

पद्यशिक्षणस्य सोपानानि

पद्यशिक्षणेऽपि गद्यवदेव सोपानानि भवन्ति। किन्तु वाचने, व्याख्याने च ईषद्भेदो भवति।

1. प्रस्तावना—

पद्यशिक्षणे प्रस्तावनायां काव्यमयं वातावरणमध्यापकेन स्रष्टव्यं भवति। तदर्थमध्यापकः वक्ष्यमाणां कामपि रीतिमाश्रयेत्।

1. काव्यानां विषये छात्राणां पूर्वज्ञानस्य आधारेण प्रस्तावनां कुर्यात्।
2. कवेः, काव्यस्य वा विषये सम्भाषणेन प्रस्तावनां रचयेत्।
3. मातृभाषायां, संस्कृते वा पूर्वपठितानां समानभावानां पद्यानामुदाहरणेन प्रस्तावनां कुर्यात्।

2. उद्देश्यकथनम्—

अध्येतव्ये पद्ये विषयस्य, भावस्य, रसस्य वा संक्षेपेण निर्देशं कुर्यात्।

3. प्रस्तुतीकरणम्—

उद्देश्यकथनात्परं पद्यस्य अध्यापनमारभ्यते। तत्र सफलतां प्राप्तुं संस्कृताध्यापकः निम्नोक्तानि कार्याणि सम्पादयेत्।

1. आदर्शवाचनम्—पद्यस्य वाचनं गद्यवाचनवन्न स्यात्। अध्यापकः श्लोकं वृत्तानुसारं,ताललयगत्यनुसारं, स्पष्टं शुद्धञ्च वाचयेत्। आदर्शवाचनेन पद्यगतभावस्य अभिव्यक्तिः स्यात्। वाचनं सङ्गीतात्मकं न स्यात्। सर्वेषां छात्राणामनुकरणयोग्यं भवेत्। अध्यापकः द्विवारं त्रिवारं वा पद्यं वाचयेत्।

2. अनुवाचनम्—अध्यापकः पञ्चषैः छात्रैः अनुवाचनं कारयेत्। आवश्यकतानुसारं पद्यस्य सामूहिकवाचनमपि युज्यते। अध्यापकोऽपि छात्रैः साकं पद्यं वाचयेत्। अनुवाचनगतान् दोषान् निवारयेत्।

3. व्याख्यानम्—अध्यापकः श्लोकस्य पदच्छेदं कृत्वा कठिनशब्दानामर्थं बोधयेत्। सन्धिसमासादीनां बोधनं पद्यार्थज्ञानाय अपेक्षितमेव कुर्यात्।

काव्यसौन्दर्यानुभवे, रसास्वादे च व्याकरणबोधनं साधकं स्यान्न तु बाधकम्। ततः परं दण्डान्वयेन, खण्डान्वयेन वा पद्यस्य सामान्यं व्याख्यानं कुर्यात्।

4. सौन्दर्यानुभूतिः—सौन्दर्यानुभूतिः काव्यशिक्षणस्य प्रधानमुद्देश्यं भवति। रचनासौन्दर्यं, अलङ्कारप्रयोगं, भावसौन्दर्यञ्च विशदीकृत्य अध्यापकः छात्रेषु भावुकतामुत्पादयेत्। शब्दयोजनायाः, अर्थप्रतिपादनस्य च वैशिष्ट्यं बोधयेत्। रसभावादीनामभिव्यक्तौ व्यञ्जनाव्यापारस्य प्रामुख्यं ज्ञापयेत्। एवं विस्तृतव्याख्यानं कृत्वा अध्यापकः संक्षेपेण सारांशं कथयेत्।

5. मौनवाचनम्—अध्यापकः मौनवाचने पद्यगतं भावं चिन्तयितुं छात्रान् निर्दिशेत्। काव्यसौन्दर्यस्य अनुभूतये मौनवाचनमत्यन्तमुपकरोति। छात्राः अध्यापकेन वर्णितान् विषयान् विचिन्त्य स्वबुद्ध्या पर्यालोचनं कुर्वन्ति। काव्यसौन्दर्यमनुभवन्ति।

4. पुनरावृत्तिः—

पुनरावृत्तावध्यापकः रसानुभवाय पद्यस्य सस्वरवाचनं करोति। छात्राः सामूहिकवाचनाय प्रेरिताः स्युः। ततः परं पूर्ववर्णितानां विषयाणामाधारेण छात्रैः साकं विमर्शं कुर्यात्। तथा च छात्राणां पद्यविषयकं ज्ञानं दृढं भवेत्।

5. कक्षाकार्यं, गृहकार्यञ्च—

पुनरावृत्तेः परमध्यापकः छात्रैः लब्धस्य ज्ञानस्य प्रयोगाय किञ्चित् मौखिकं, लिखितं वा कार्यं कक्षायां कारयेत्। ततः परं गृहे विरामसमये कर्तुं रचनात्मकं सरलं कार्यं दद्यात्।

त्रयोदशोऽध्यायः

नाटकशिक्षणम्

संस्कृतसाहित्ये नाटकं रमणीयं काव्यं भवति। श्रव्यं, दृश्यमिति काव्यं द्विविधं भवति। श्रव्यकाव्यं केवलं कर्णसुखदं भवति। दृश्यकाव्यन्तु कर्णस्य, नेत्रस्य च सुखदं भवति। अतः संस्कृते नाटकस्य विशिष्टं स्थानं वर्तते। अत एवोक्तं – 'काव्येषु नाटकं रम्यम्' इति।

भरतमुनिना नाट्यशास्त्रे नाटकं चतुर्ण्णां वेदानां सार इति, पञ्चमवेद इति च वर्णितम्। यथा—

"जग्राह पाठ्यं ऋग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वर्णादपि॥" इति।
"नाट्याख्यं पञ्चमं वेदम्" इति च।

दशरूपककारः धनञ्जयः 'अवस्थानुकृतिर्नाट्यम्' इति नाटकं निरवोचत्। संस्कृतनाटकानि पद्यबहुलानि भवन्ति। नाटकाभिनयाय रङ्गमञ्चः सज्जीकृतो भवति। पात्रधारिणः उचितैः वेषभूषादिभिः, हावभावैः, क्रियाकलापैश्च अभिनयं कुर्वन्ति। नाटकस्य द्रष्टारः सामाजिकाः पात्रेषु तल्लीनाः रसानुभवं प्राप्नुवन्ति।

नाटके चतुर्विधः अभिनयः भवति – सात्विकः, आङ्गिकः, वाचिकः, आहार्यश्चेति। नाटकाभिनयः बालकानाम् मानसिकविकासे महत्त्वपूर्णं साधनं भवति। नाटकस्य कथाद्वारा विभिन्नानां पात्राणां स्वभावः व्यवहारश्च बालकैः ज्ञातुं शक्यते। उत्तमनाटकेषु आदर्शपात्राणाम् अनुकरणेन बालकानां सच्चारित्र्यं सम्पादयितुं शक्यते। नाटकीयपात्राणाम् अनुभवानाम्, आदर्शानाञ्च ग्रहणेन अधीतस्य इतिहासस्य, साहित्यस्य च अध्ययनं सफलीकुर्वन्ति। पात्राणां परिस्थितीनाञ्च मननेन, विवेचनेन च विषयं हृदयङ्गमं कुर्वन्ति। अभिनयेन साकं शब्दानां स्पष्टोच्चारणम्, आरोहावरोहपूर्वकं ध्वनीनाम् उच्चारणं, प्रवाहरूपेण भाषणं, भावानाम् अभिव्यक्तिः

इत्यादि गुणाः शिक्षयितुं शक्यन्ते। एवं नाटके अभिनयेन सहयोगस्य भावना वर्धते। सभायां जनानां पुरतः भाषणे संकोचः न भवति।

नाटकस्य प्रयोजनानि—

भरतमुनिना नाट्यशास्त्रे नाटकस्य त्रीणि प्रयोजनानि उक्तानि—

1. हितोपदेशजननम्—जनानां, समाजस्य च कल्याणार्थम् उपदेशः।

2. विश्रान्तिजननम्—सामाजिकानां मानसिकग्लानेः अपनयनेन विश्रान्तिकल्पनम्।

3. विनोदजननम्—जनानां मनोरञ्जनम्।

महाकविना कालिदासेन मालविकाग्निमित्रे प्रतिपादितं यत्—"प्रयोगप्रधानं हि नाट्यशास्त्रम्" इति। अर्थात् नाटकं प्रयोगप्रधाना कला भवति।

मनोरञ्जनस्य साधनेषु नाटकं लोकप्रियम् अस्ति। चलचित्राणां प्रचारेण यद्यपि नाटकस्य आकर्षणं न्यूनम् अभवत्, तथापि अनेकेषु क्षेत्रेषु अधुनापि नाटकम् आकर्षकं भवति। अनेके साहित्यप्रियाः जनाः न केवलं नाटकदर्शनेन, किन्तु नाटकानां वाचनेनापि आनन्दम् अनुभवन्ति। बालकानां शिक्षणाय जनहितानाम् उपदेशाय च नाटकस्य प्रयोगः भवति।

नाटकशिक्षणस्य उद्देश्यानि—

1. मानवस्वभावस्य अध्ययनम्—मानवप्रकृतेः अवगमनं कठिनं भवति। मनुष्यस्य स्वभावः कदाचित् अत्यन्तं सरलः दृश्यते। परन्तु कदाचित् अतीव विचित्रः जटिलश्च भवति। अतः मानवस्वभावस्य अवगमनं सरलं न भवति। नाटकशिक्षणेन मानवस्वभावस्य अध्ययनं सरलं भवति। बालकाः नाटकस्य विभिन्नपात्राणां व्यवहारस्य अवगमने समर्थाः भवन्ति।

2. विभिन्नजीवनदर्शनानां ज्ञानम्—नाटकेषु अनेकविधानि पात्राणि भवन्ति, येषां जीवनदर्शनं भिन्नं भवति। अनेकप्रकाराणां जीवनदर्शनानां प्रतिनिधीभूतानां पात्राणां दर्शनेन छात्राः जीवनदर्शनस्य ज्ञानं प्राप्नुवन्ति।

3. संवादशिक्षा—नाटकेषु विभिन्नपात्राणि स्वभावानुसारं भाषाप्रयोगं कुर्वन्ति। कुत्रचित् भाषायां माधुर्यम्, अन्यत्र ओजः, कदाचित् प्रसादश्च भवन्ति। रसानुगुणं भाषणे एतेषां गुणानां प्रयोगं नाटकद्वारा छात्राः शिक्षन्ते।

4. भावाभिव्यक्तिः—भाषायाः अध्ययने भावाभिव्यक्तेः अत्यधिकं

महत्त्वमस्ति। नाटकशिक्षणेन छात्राः आरोहावरोहक्रमेण विभिन्नभावानां व्यक्तीकरणमभ्यस्यन्ति। स्वकीयभावानां भाषणद्वारा प्रकाशनेन आत्माभिव्यक्तेः अवसरं लभन्ते।

5. अनुकरणस्य अवसरः—अनुकरणं मानवस्य स्वभावो भवति। तस्य पूर्तिः नाटकशिक्षणेन सम्पादयितुं शक्यते। छात्रेभ्यः विभिन्नानामवस्थानाम् अनुकरणस्य महत्त्वपूर्णम् उद्देश्यं भवति।

6. विभिन्नपरिष्ठितीनां ज्ञानम्—नाटके विभिन्नपरिष्ठितीनां वर्णनं भवति। मानवजीवने यासां परिष्ठितीनामनुभवः प्राप्यते, तासां ज्ञानं नाट्टकशिक्षणेन छात्रैः प्राप्तुं शक्यते। एतादृशं ज्ञानं बालकस्य भाविजीवने देशकालानुसारं प्रवर्तितुं सहायतां प्रददाति।

7. स्वस्थमनोरञ्जनम्—नाटकशिक्षणं बालकस्य मानसिकसंवेगानां बहिरानयनेन स्वस्थमनोरञ्जनस्य अवसरं कल्पयति। अनुचितकार्येभ्यो निवर्त्य मानसिकस्वास्थ्यं सम्पादयति।

8. हितोपदेशः—मानवमूल्यानां धर्मस्य, सत्यस्य, न्यायस्य च बोधनेन जीवितस्य हितकरं मार्गं प्रदर्शयति नाटकम्। जीवनसङ्घर्षे उचितकार्यनिर्णयस्य शक्तिं ददाति। एवं नाटकशिक्षणं बालकानां जीवनस्य हितकरम् उपदेशं ददाति।

नाटकशिक्षणविधयः

1. व्याख्याविधिः—

अनेन विधिना अध्यापकः पाठ्यस्य नाटकभागस्य अर्थं बोधयित्वा कठिनांशानां भावानाञ्च विवरणं करोति। गद्यांशं, पद्यांशञ्च भावानुसारं वाचयति। पात्राणां स्वभावं, चरित्रचित्रणञ्च विशदयति। अनेन विधिना नाटकस्य बोधनमपि गद्यपद्यबोधनेन समानं भवति। गद्यपद्यादीनां बोधने उपयुक्तानां विधीनामनुसरणं क्रियते। एतेन संस्कृतशिक्षणस्य सामान्योद्देश्यानां साधनेऽपि नाटकशिक्षणस्य विशिष्टोद्देश्यानि न सिध्यन्ति।

2. अभिनयविधिः—

नाटकभागस्य व्याख्यानानन्तरं छात्राः तन्नाटकम् अभिनेतुं प्रेर्यन्ते। पात्राणां स्वभावं ज्ञात्वा, यथोचितं संभाषणं कुर्वन्ति। अध्यापकः मार्गदर्शनं करोति। अयं नाटकाभिनयः द्विधा सम्पादयितुं शक्यते।

(क) कक्ष्याभिनयप्रणाली—

नाटकमभिनेतुम् उत्सुकाः उत्तमाः छात्राः अध्यापकेन निर्णीयन्ते। अन्ये छात्राः सामाजिकाः भवन्ति। निर्दिष्टाः छात्राः स्वपात्राणां सम्भाषणानि कण्ठस्थं कुर्वन्ति। रङ्गमञ्चं, वेषभूषादिकम्, आहार्यञ्च विनैव अध्यापकस्य निर्देशनानुसारं वाचिकम्, आङ्गिकं, सात्त्विकञ्च अभिनयं कुर्वन्ति। अनेन कक्ष्याभिनयविधिना छात्राः नाटकानामध्ययने, प्रदर्शने च प्रेरिताः भवन्ति। नाटकशिक्षणस्य विशिष्टोद्देश्यानि च सिध्यन्ति। अत्र समयव्यये सत्यपि धनव्ययो नास्ति।

(ख) रङ्गमञ्चप्रणाली—

नाटकशिक्षणस्य सर्वोत्तमो विधिरयम्। अध्यापकेन चिताः छात्राः अधीतस्य नाटकस्य अभिनयाय अभ्यासं कुर्वन्ति। सुषज्जिते रङ्गमञ्चे वेषभूषाद्यलङ्करणैः अलङ्कृतानि पात्राणि सामाजिकानां पुरतः प्रत्यक्षीभूय स्वाभिनयकौशलेन, सम्भाषणचातुर्येण च सामाजिकान् आनन्दयन्ति।

अयं विधिः यद्यपि बहुसमयसाध्यः, व्ययसाध्यश्च भवति तथापि विद्यालये उत्सवानां सन्दर्भे नाटकानामायोजनं सर्वेषामाह्लादकरं भवति। सङ्गीते, नाट्ये च कुशलानामध्यापकानां विशेषपरिश्रमः अत्र आवश्यको भवति। एवं नाटकशिक्षणस्य सर्वाणि उद्देश्यानि, प्रयोजनानि च साधयितुं शक्यन्ते।

नाटकशिक्षणस्य सोपानानि—

1. सामान्योद्देश्यानि।
2. विशिष्टोद्देश्यानि।
3. सहायकोपकरणानि।
4. पूर्वज्ञानम्।

अध्यापनसोपानानि—

1. प्रस्तावना
2. उद्देश्यकथनम्

3. प्रस्तुतीकरणम्—

(क) अध्यापकस्य आदर्शवाचनम् आरोहावरोहक्रमेण सस्वरं स्यात्। अत्र आङ्गिकाभिनयः वर्जनीयः।

(ख) सम्पूर्णस्य नाटकभागस्य व्याख्यानात्परं कक्ष्याभिनयप्रणाल्या छात्रैः अध्याकस्य निर्देशानुसारं नाटकाभिनयः सम्पादनीयः।

(ग) संक्षिप्तव्याख्या—1. कठिनशब्दानामर्थबोधनम्।

2. सन्धिविच्छेदः, समासविग्रहः।

(घ) सौन्दर्यानुभूतिः—भावविश्लेषणम्, चरित्रचित्रणम्।

4. **पुनरावृत्तिः**—नाटककथायाः, पात्राणाञ्च पुनर्विमर्शः।

5. **गृहकार्यम्**—कक्ष्याकार्ये अध्यापकः पात्राभिनयस्य निर्देशान् ददाति। छात्राः गृहे सम्भाषणस्य अभिनयस्य च अभ्यासं कुर्वन्ति।

✤✤✤

चतुर्दशोऽध्यायः

व्याकरणशिक्षणम्

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते॥"

प्रधानं च षट्स्वङ्गेषु व्याकरणम्।

व्याक्रियन्ते = व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणशब्दस्यार्थः। वि आङित्युपसर्गद्वयपूर्वककृञ् धातोः ल्युट्प्रत्यये व्याकरणमिति शब्दः निष्पद्यते। प्रकृतिप्रत्ययविभागेन शब्दानां व्युत्पत्तिरत्र प्रदर्श्यते। शब्दानुशासनमिति व्याकरणशास्त्रस्यापरं नाम। शब्दानां साधुत्वनिरूपणम्, असाधुशब्दानां निवारणञ्च अस्य शास्त्रस्य प्रधानं कार्यं भवति। संस्कृतस्य अनेकैः वैयाकरणैः रचितानि अनेकानि व्याकरणानि सन्ति। तेषु पाणिनीयं व्याकरणं समग्रत्वात्, संक्षिप्तत्वाच्च सुप्रसिद्धं भवति। एतदेव व्याकरणमधुनापि पठनपाठनयोः वरीवर्ति।

व्याकरणं भाषायाः संस्कारं सम्पादयति। भाषायाः स्वरूपं संरक्षति। अत एव अनेकसहस्रवर्षेभ्यः संस्कृतभाषायाः स्वरूपमविच्छिन्नम् अनुवर्तते। शब्दानुशासनस्याभावे विशृङ्खला भाषा अनेकधा परिवर्तते। तस्याः मूलस्वरूपं ज्ञातुमशक्यं भवति। तथा च प्राचीनसाहित्यस्य, विज्ञानस्य च अध्ययनं दुःशकं भवति।

लोके जनैः व्यवह्रियमाणा भाषा व्याकरणनियमबद्धा न भवति। अतः मातृभाषायाः अध्ययनमपि व्याकरणज्ञानं विना अपूर्णमेव भवति। संस्कृतभाषा तु व्यवहारे न प्रयुज्यते। अतः व्याकरणाध्ययनं विना संस्कृतस्य निष्कृष्टं ज्ञानमार्जयितुं न शक्यते।

संस्कृतभाषा संश्लिष्टा भाषा भवति। प्रकृतिप्रत्यययोः पृथक् प्रयोगो न भवति। 'न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः' इति नियमो वर्तते। एवं सन्धिविषयेऽस्ति यथा—

'संहितैकपदे नित्या, नित्या धातूपसर्गयोः।
नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते॥' इति।

एवञ्च वाक्यं विहायान्यत्र सन्धिर्नित्यो भवति। विभक्तिज्ञानं विना अर्थज्ञानं न भवति। समासानां विग्रहभेदेन अर्थभेदो भवति। विशेषणविशेष्ययोः प्रयोगे लिङ्गविभक्तिवचनानां समानता आवश्यकी। तथा च 'यल्लिङ्गं यद्वचनं, या च विभक्तिर्विशेष्यस्य, तल्लिङ्गं, तद्वचनं, सा च विभक्तिर्विशेषणस्य' इति। एवं क्रियापदानां प्रयोगे पुरुषवचनव्यवस्था ज्ञातव्या। तथा च संस्कृतभाषाया अध्ययने एतेषां सामान्यव्याकरणनियमानां ज्ञानमत्यावश्यकं भवति। तथा चोक्तम्—

'अव्याकरणमधीतं भिन्नद्रोण्या तरङ्गिणीतरणम्।
भेषजमपथ्यसहितं त्रयमिदमकृतं वरं, न कृतम्॥' इति।

व्याकरणशिक्षणविषये मतभेदः—

केचिद्विद्वांसः व्याकरणशास्त्रस्याध्ययनमत्यावश्यकं मन्वते। ते स्वमतमेवं समर्थयन्ति।

1. व्याकरणशास्त्रस्याध्ययनेनैव भाषायामधिकारः सिध्यति।
2. साहित्यस्य, अन्यशास्त्राणाञ्च अध्ययनं सुकरं भवति।
3. व्याकरणाध्ययनं बौद्धिकमनुशासनं सम्पादयति।
4. व्याकरणशास्त्रे अधीताः न्यायाः, युक्तयश्च जीवने सामान्यव्यवहारे उपयोक्तुं शक्यन्ते।

अन्ये केचिदाधुनिकाः विद्वांसः भाषाध्ययने व्याकरणाध्ययनमनुपयुक्तमिति निराकुर्वन्ति। ते चैवं प्रतिपादयन्ति।

1. भाषाध्ययने प्रथमं भाषैव अध्येतव्या। साधुशब्दानां, शुद्धवाक्यानाञ्च वारं वारमभ्यासेन भाषा स्वाधीना भवति। व्याकरणाध्ययनं तत्र प्रतिबन्धकं भवति।
2. भाषाध्ययनं विना, व्याकरणाध्ययनं निष्फलं भवति। अत एव अनेके

छात्राः सम्पूर्णं व्याकरणमधीत्यापि संस्कृतेन भाषितुं, लेखितुञ्च असमर्थास्सन्ति।

3. व्याकरणं नीरसः, कठिनश्च विषयो भवति। सरसानां, सरलानाञ्च साहित्यविषयाणां बोधनेन भाषा अध्यापयितुं शक्यते।
4. व्याकरणाध्ययनेन लभ्यं बौद्धिकमनुशासनं जीवने उपयुज्यत इति मनोवैज्ञानिकैः प्रत्याख्यातम्।
5. एवञ्च भाषाध्ययनात्परं व्याकरणाध्ययनेन तत्र विशेषज्ञानं स्यात्। किन्तु व्याकरणद्वारा भाषाध्ययनं नोचितम्। भाषाध्ययने व्याकरणं साधनमेव स्यात्, न तु साध्यम्।

अपरे केचित् संस्कृतज्ञाः शिक्षाशास्त्रिणः संस्कृतभाषाध्यापने व्याकरणाध्यापनस्य मध्येमार्गं श्रेयस्करं मन्यन्ते। यथा—

1. भाषाध्यापने प्रारम्भिकस्तरे भाषैवाध्यापनीया, परन्तु व्याकरणज्ञः संस्कृताध्यापकः वर्णानां शुद्धोच्चारणं, साधुशब्दानां, शुद्धवाक्यानाञ्च प्रयोगं सम्पादयेत्।
2. भाषायाः परिचयानन्तरं प्रायोगिकं, सरलं व्याकरणं बोधनीयम्।
3. आधुनिकविधीनामुपयोगेन, दृश्यश्रव्योपकरणानां प्रयोगेण च व्याकरणाध्ययनं सरलं, रुचिकरञ्च विधातव्यम्।
4. भाषायाः, साहित्यस्य च अध्ययनाय उपयुक्ताः व्याकरणविषयाः स्तरानुगुणम्, उचितमात्रायाम् अध्यापनीयाः।
5. व्याकरणशास्त्रस्य कूलङ्कषमध्ययनम् उन्नतस्तरे एव भवेत्।

व्याकरणशिक्षणस्योद्देश्यानि—

भाषायाः अध्ययने व्याकरणं मार्गदर्शकं भवति। यथा भाषायाः अध्ययनम् आजीवनं प्रचलति तथैव व्याकरणस्यापि। भूगोलशास्त्रस्याध्ययने मानचित्रमिव, भाषाध्ययने व्याकरणशिक्षणस्य उद्देश्यानि समानानि भवन्ति। तथापि कुत्रचित् कस्यचित् प्राबल्यं स्यात्। अतः सामान्यरूपेण क्रमशः उद्देश्यानि निर्दिश्यन्ते।

1. स्थानप्रयत्नानुसारं वर्णानामुच्चारणम्।
2. साधुशब्दानां ज्ञानम्।

3. भाषणे, लेखने च शुद्धवाक्यानां प्रयोगः।
4. पदानां व्युत्पत्तिज्ञानेन अर्थज्ञानम्।
5. सन्धिसमासादीनां नियमज्ञानेन भाषायाः विस्तृतज्ञानम्।
6. कारकनियमानां ज्ञानेन विभक्तीनां प्रयोगस्य, वाक्यरचनायाश्च ज्ञानम्।
7. शब्दरूपाणां, धातुरूपाणां, कृत्तद्धितान्तानाञ्च ज्ञानेन शब्दज्ञानस्य वर्धनम्।
8. व्याकरणग्रन्थानामध्ययनेन, प्रायोगिकाभ्यासेन च भाषायां पूर्णाधिकारप्राप्तिः।
9. सैद्धान्तिकग्रन्थानामध्ययनेन व्याकरणशास्त्रे अनुसन्धाने योग्यताप्राप्तिः।

व्याकरणशिक्षणस्य विभिन्नाः प्रणाल्यः

1. अनौपचारिकप्रणाली—

अस्यां प्रणाल्याम् औपचारिकरूपेण व्याकरणं नाध्याप्यते। किन्तु शुद्धोच्चारणं, साधुशब्दज्ञानं पुरुषलिङ्गविभक्तिवचनानां प्रयोगश्च भाषाद्वारा अध्याप्यते। अनेके विद्वांसः व्याकरणाध्ययनं विनैव साहित्याध्ययनेन भाषायामधिकारं प्राप्य, प्रादेशिकभाषासु निबन्धान्, काव्यानि च अरचयन्। परन्तु संस्कृतस्य विषये नैतत् प्रायोगिकं भवति। संस्कृतभाषायाः विस्तृतशब्दसमूहस्य साधुत्वं व्याकरणज्ञानं विना न सम्भवति। लघुना उपायेन बहूनां शब्दानां ज्ञानं, साधुत्वनिश्चयश्च व्याकरणनियमज्ञानेनैव सम्भवति। तथापि प्रारम्भिकस्तरे भाषाध्यापने इयं प्रणाली उपयुक्ता स्यात्। अध्यापकः वर्णोच्चारणे, साधुशब्दप्रयोगे च जागरूकः स्यात्। एवञ्चेत् व्याकरणस्य साधारणनियमाः छात्रैः क्रमेण अवगताः स्युः।

2. प्रयोगप्रणाली—

इयं प्रणाली अनौपचारिकप्रणाल्याः विस्तृतं रूपं भवति। व्याकरणनियमानां भाषायां प्रयोगद्वारा व्याकरणशिक्षणं सम्पाद्यते। अत्रापि व्याकरणनियमाः न बोध्यन्ते। आधुनिकपाठ्यपुस्तकेषु इयं रीतिः दरीदृश्यते। कारकविभक्तीनाम्, उपपदविभक्तीनाञ्च प्रयोगः पाठेषु क्रमशः विन्यस्तो भवति। अनुवादे, वाक्यरचनायाञ्च तेषां प्रयोगाणाम् अभ्यासाय प्राधान्यं दीयते। एवं छात्राः क्रमेण भाषायामधिकारं प्राप्नुवन्ति। सन्धिसमासादिविषयेऽपि बहूनामुदाहरणानां सङ्कलनेन अभ्यासः कार्यते। अत्र सरलात् कठिनं प्रति, अभ्यासः इत्याद्यधिगमनियमानां प्रयोगो

भवति। एवं रीत्या भाषाज्ञानस्य सिद्धावपि अपवादानां, निष्कर्षाणाञ्च ज्ञानाभावात् निश्चितज्ञानं न सिध्यति। प्रयोगविषये भ्रमप्रमादानामवकाशो भवति। तथापि अनया प्रणाल्या व्याकरणाध्ययनस्य भूमिका निर्मातुं शक्यते।

3. आगमन-निगमनप्रणाली—

आधुनिकैः शिक्षाशास्त्रिभिः शास्त्राणामध्यापनाय इयं समुचिता प्रणालीति निरूप्यते। आधुनिकविज्ञानशास्त्रेषु प्राकृतिकनियमानां, निश्चितानां सिद्धान्तानाञ्च बोधनाय इयं प्रणाली प्रयुज्यते। व्याकरणमपि भाषायाः स्वरूपस्य, स्वभावस्य च प्रतिपादकं शास्त्रं भवतीत्यतः अत्रापि शास्त्रीयपरिशोधनासरणिरावश्यकी।

अस्यां प्रणाल्यां द्वे सोपाने वर्तते- आगमनं, निगमनञ्चेति। प्रयोगाणां स्वरूपस्य परिशीलनेन तेषां सामान्यस्वरूपं ज्ञात्वा कश्चन सामान्यर्नियमः कल्प्यते। लक्ष्याणामध्ययनेन लक्षणं निरूप्यते। न्यायशास्त्रेऽपि पदार्थानां लक्षणं निष्कृष्टरूपेण प्रतिपाद्यते। अतिव्याप्त्यव्याप्त्यसम्भवादिदोषरहितं वाक्यं लक्षणं भवति। एवमेव व्याकरणशास्त्रेऽपि उदाहरणानां परिशीलनेन सामान्यनियमः निष्कास्यते। इयमेव आगमनप्रणालीत्युच्यते। महर्षिणा पाणिनिनापि अनयैव प्रणाल्या सकलवैदिकलौकिकपदजालं परिशील्य साधारणनियमाः, विशेषनियमाश्च सूत्ररूपेण रचिताः। एवं प्रकल्पितस्य नियमस्य अन्येषु बहुषु उदाहरणेषु परीक्षणेन अतिव्याप्त्यव्याप्त्यादिदोषाणां परिहारेण निष्कर्षणं निगमनमित्युच्यते। वार्तिकानां निर्माणे कात्यायनेन, व्याकरणमहाभाष्ये पतञ्जलिना च इयमेव प्रणाली उपयुक्ता दृश्यते।

इयं प्रणाली शास्त्रीया, मनोवैज्ञानिकी च। अस्यां प्रणाल्यां ज्ञातात् अज्ञातं प्रति, विश्लेषणात् संश्लेषणं प्रति, उदाहरणेभ्यो नियमं प्रति, अभ्यासः इत्यादिशिक्षणनियमानामुपयोगो भवति। छात्राः अध्ययने सक्रियाः भवन्ति। एवमधीतः नियमः तेषां बुद्धौ चिरं तिष्ठति। अतः कण्ठस्थीकरणस्य आवश्यकता न भवति। अधीतस्य नियमस्य प्रयोगः पाठ्यविषये, अनुवादे, निबन्धरचनायाञ्च कर्तव्यः। तत्र सहयोगप्रणाली सहकारिणी भवति।

अनया प्रणाल्या एकैकस्य नियमस्य अध्ययनाय महान् कालः अपेक्ष्यते। विस्तृतव्याकरणशास्त्रस्य सर्वेऽपि नियमाः अनया प्रणाल्या बोधयितुं न शक्यन्ते। महाविद्यालयेषु विकसितमतयो युवानः सूत्राध्ययनेन प्रयोगान् ज्ञातुं प्रभवन्ति।

तथापि माध्यमिकस्तरे सूत्ररचनाप्रकारस्य बोधनाय, छात्रेषु

परिशीलनकौशलस्य विकासाय अत्यन्तमपेक्षितानां केषाञ्चित् व्याकरणनियमानां बोधने आगमन-निगमनप्रणाली नितरामुपयुज्यते।

4. सहयोगप्रणाली—

भाषायाः साहित्यस्य च अध्ययने व्याकरणमुपकारकं भवतीति निश्चप्रचम्। भाषा, व्याकरणञ्च अविनाभावेन स्थिते, अन्योन्याश्रिते च। संस्कृतसाहित्याध्ययने तु व्याकरणज्ञानमपरिहार्यं भवति। साहित्यस्य सूक्ष्मांशानां विश्लेषणं व्याकरणस्य आधारेण क्रियते। कुन्तकस्य वक्रोक्तिविचारे, भोजस्य सरस्वतीकण्ठाभरणे च एतत् स्पष्टं द्रष्टुं शक्यते।

व्याकरणज्ञानं विना संस्कृतकाव्यानामध्ययनं, रसास्वादश्च न सम्भवति। व्याकरणाध्ययनात्परं काव्याध्ययनन्तु नारम्भ्यते। अतः काव्याध्ययनसमये तत्रापेक्षितानां व्याकरणांशानां बोधनमावश्यकं भवति। एवं साहित्येन साकं व्याकरणस्य बोधनमेव सहयोगप्रणाली इत्युच्यते।

अपादाने पञ्चमी—2.3.28 इति सूत्रेण अपादाने अर्थे पञ्चमी विभक्तिः विधीयते। अपादानसंज्ञा तु अष्टभिः सूत्रैः विधीयते। यथा—ध्रुवमपायेऽपादानम् — 1.4.24, भीत्रार्थानां भयहेतुः — 1.4.25, पराजेरसोढः — 1.4.26, वारणार्थानामीप्सितः — 1.4.27, अन्तर्धौ येनादर्शनमिच्छति — 1.4.28, आख्यातोपयोगे — 1.4.29, जनिकर्तुः प्रकृतिः — 1.4.30, भुवः प्रभवः — 1.4.31।

भट्टिमहाकविना कारकाधिकारे एतेषामुदाहरणानि कथं निबद्धानीति प्रदर्श्यते। अशोकवने हनुमता दृष्टायाः सीतायाः वर्णनमेवं क्रियते अष्टमे सर्गे।

"**वृक्षाद्** वृक्षं परिक्रामन् **रावणाद्** बिभ्यतीं भृशम्।
शत्रोस्त्राणमपश्यन्तीम् अदृश्यो जनकात्मजाम्॥ 8— 70

तां पराजयमानां सः **प्रीतेः** रक्ष्यां **दशाननात्**।
अन्तर्दधानां **रक्षोभ्यः** मलिनां म्लानमूर्धजाम्॥ 8 — 71

रामादधीतसन्देशः वायोर्जातश्च्युतस्मिताम्।
प्रभवन्तीम**िवादित्याद्** अपश्यत् कपिकुञ्जरः॥ 8 — 72

अत्र अष्टानामपि अपादानभेदानां क्रमशः उदाहरणानि द्रष्टुं शक्यन्ते।

केरलीयेन वैयाकरणकविना नारायणभट्टतिरिणा धातुकाव्यं रचितम्। अत्र पाणिनीये धातुपाठे पठितानां धातूनां कृदन्तरूपं, तिङन्तरूपं वा क्रमशः निबद्धमस्ति। सर्गत्रयात्मके अस्मिन् काव्ये श्रीकृष्णाय उद्धवद्वारा रुक्मिण्या सन्देशप्रेषणं, रुक्मिणीकल्याणञ्च कथा भवति।

"स गान्दिनीभूरथ गोकुलैधितं
स्पर्धालुधीगाधितकार्यबाधिनम्।
द्रक्ष्यन् हरिं नाधितलोकनाथकं
देधे मुदास्कुन्दितमन्तरिन्द्रियम्॥ 1—1

'भू सत्तायाम्, एध वृद्धौ, स्पर्ध सङ्घर्षे, गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च, बाधृ – लोडने, नाधृ – नाथृ याच्ञोपतापैश्वर्याशीःषु, दध धारणे, स्कुदि आप्रवणे इत्येतेषां धातूनां रूपाणि अत्र दृश्यन्ते।"

एवं रावणार्जुनीयमिति महाकाव्यमपि पाणिनीयसूत्राणाम् उदाहरणकाव्यमस्ति। डॉ. विजयपालमहोदयैः सम्पाद्यमानमेतत् राष्ट्रियसंस्कृतसंस्थानेन अचिरमेव प्रकाशयिष्यते।

एवं साहित्याध्ययनाय साहित्येन साकं व्याकरणस्याध्ययनं सहयोगप्रणाली भवति। एषा प्रणाली माध्यमिकस्तरे, उन्नतस्तरे च अत्यन्तमुपयुक्ता भवति। भाषाध्ययनेऽपि निबन्धरचनायाम्, अनुवादे च अपेक्षितानां व्याकरणनियमानां बोधनमावश्यकं भवति। तथा पूर्वमधीतानां नियमानामभ्यासायापि एषा प्रणाली उपयुज्यते।

अनया प्रणाल्या साहित्याध्ययनाय अपेक्षितानां केषाञ्चित् व्याकरणनियमानां प्रायोगिकं ज्ञानमेव सम्भवति। व्याकरणशास्त्रस्य कूलङ्कषमध्ययनन्तु प्राचीनप्रणाल्यैव सिध्यति।

5. प्राचीनप्रणाली—

प्राचीनकालादारभ्य भारते व्याकरणाध्यापने आश्रीयमाणैषा प्रणाली कैश्चित् सूत्रप्रणाली, सिद्धान्तप्रणाली इत्यपि व्यवह्रियते। अस्यां प्रणाल्यां व्याकरणाध्यापनाय कश्चन व्याकरणग्रन्थः पाठ्यपुस्तकरूपेण उपयुज्यते। अष्टाध्यायी, काशिकावृत्तिः वैयाकरण-सिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी, Kale's Higher Sanskrit Grammar, Bhandarkar's Grammar इत्यादिषु ग्रन्थेषु कोऽपि ग्रन्थः अध्याप्यते।

संज्ञानां, परिभाषाणाञ्च साह्येन विधिसूत्राणां व्याख्यानम्, उदाहरणानि, प्रत्युदाहरणानि, विमर्शः, समीक्षा इत्येतत्सर्वमत्र अन्तर्भवति। सूत्राणि, उदाहरणानि च छात्रैः कण्ठस्थीकर्तव्यानि, आवश्यके समये स्मर्तव्यानि च भवन्ति। एवं सूत्राणां द्वारा छात्राः भाषायाः, शब्दानाञ्च निश्चितं ज्ञानं प्राप्नुवन्ति। अल्पेन समयेन, परिश्रमेण च बहवः शब्दाः ज्ञातुं शक्यन्ते।

यदि छात्राः विकसितमतयः, संस्कृतसाहित्ये कृतपरिश्रमाश्च भवन्ति तर्हि अनया प्रणाल्या व्याकरणस्य अध्ययनं सुकरं भवति। सूत्रन्तु विस्तृतनियमस्य संक्षिप्तं रूपं भवति। अर्थज्ञानपूर्वकं सूत्राणां कण्ठस्थीकरणे दोषो नास्ति। विज्ञानस्य, गणितस्य च अध्ययने बालकैः अनेकानि निर्वचनानि, नियमाश्च स्मर्तव्यानि भवन्ति। माध्यमिकस्तरे, उन्नतस्तरे च व्याकरणशास्त्रस्याध्यापनाय एषा प्रणाली उपयुज्यते। प्रारम्भिकस्तरे भाषाज्ञानं विना अस्याः प्रणाल्याः प्रयोगो नोचितः प्रतीयते।

व्याकरणशिक्षणस्य आधुनिकविधयः

क्रीडाविधिः—कार्यं श्रमं जनयति चेत् क्रीडा विनोदं जनयति। बालकानां क्रीडासु रुचिर्भवति। अतः प्राचीनकालेऽपि साहित्यक्रीडाः शिक्षणे आदृताः आसन्। व्याकरणविषयाणां बोधनाय अनेकानि पद्यानि रचितानि, येषामध्ययनेन शास्त्रज्ञानेन साकं विनोदोऽपि भवति।

काचिद् ब्राह्मणी वैयाकरणं परिणेतुमिच्छति। सा आगतं वरं परीक्षितुं प्रश्नान् पृच्छति। विहस्य इत्यत्र का विभक्तिः ? वरो वदति — षष्ठीविभक्तिः। विहाय इत्यत्र का विभक्तिः ? चतुर्थीविभक्तिः। अहम् इत्यत्र का विभक्तिः ? द्वितीयाविभक्तिः। कथम् इत्यत्र का विभक्तिः ? द्वितीयाविभक्तिः। अल्पज्ञः सः वरः अव्ययानां, सुबन्तानाञ्च भेदं न जानाति स्म। विहस्य, विहाय, कथम् इत्येतानि अव्ययानि। अव्ययानां लिङ्गविभिक्तिवचनानि न भवन्ति। अहमिति प्रथमैकवचनम्। परन्तु वरः रामस्य, रामाय, रामम् इत्येतेषां सादृश्यं विचिन्त्य उत्तरमुक्तवान्।

किं वरः सम्मतो वा? इति पित्रा पृष्टा सा कन्या अकथयत्—

'यस्य षष्ठी चतुर्थी च विहस्य च विहाय च।
अहं कथं द्वितीया स्यात् द्वितीया स्यामहं कथम्?' इति।

यस्य वरस्य विहस्य इति षष्ठी, विहाय इति चतुर्थी, अहं, कथम् इति द्वितीया स्यात्, तस्य अहं कथं द्वितीया = भार्या, स्याम् = भवेयम् इति।

कश्चन दरिद्रः पण्डितः राजानमुपेत्य चमत्कारेण समासनामानि संयोज्य पद्यं प्राह—

'द्वन्द्वो द्विगुरपि चाहं मद्गृहे नित्यमव्ययीभावः।
तत्पुरुष कर्मधारय येनाहं स्यां बहुव्रीहिः॥'

अहं द्वन्द्वः = भार्यासहितः, द्विगुः अपि = द्वौ गावौ यस्य सः द्विगुः च, मद्गृहे = मम गृहे, नित्यं = सर्वदा, अव्ययीभावः = धनाभावात् व्ययो नास्तीति दारिद्र्यमित्यर्थः, तत् = तेन कारणेन, पुरुष! = हे महापुरुष!, कर्म = किमपि वैतनिकं कर्म, धारय = देहि। येन अहं बहुव्रीहिः = बहवः व्रीहयः यस्य सः बहुव्रीहिः – बहुधान्यवान्, स्याम् भवेयम्। इति।

अस्मिन् पद्ये द्वन्द्वः, द्विगुः, अव्ययीभावः (नित्यसमासः), तत्पुरुषः, कर्मधारयः, बहुव्रीहिः इति समासानां नामानि प्रयुक्तानि।

"प्रातः प्रातः समुत्थाय द्वौ मुनी च कमण्डलू।
अत्र क्रियापदं वक्तुम् अवधिर्ब्रह्मणो वयः॥"

अत्र क्रियापदं गुप्तमस्ति। तत्किमिति वक्तव्यम्। द्वौ मुनी प्रातः समुत्थाय कमण्डलू प्रातः = पूरयतः इत्यर्थः। प्रा = पूरणे इति धातोः प्रथमपुरुषद्विवचनम्।

"आगतः पाण्डवाः सर्वे दुर्योधनसमीहया।
तस्मै गां च सुवर्णं च रत्नानि विविधानि च॥"

अस्मिन् पद्ये न केवलं क्रियापदं, सन्धिसमासादयोऽपि कष्टाः सन्ति। सर्वेऽदुर्योधनसमीहया इत्यत्र सर्वे, अदुः, यः, धनसमीहया, इति पदच्छेदः कर्तव्यः। अत्रायमन्वयः।

यः धनसमीहया = धनेच्छया, आगतः, तस्मै सर्वे पाण्डवाः गां च, सुवर्णं च, विविधानि रत्नानि च अदुः = दत्तवन्तः। डु दाञ् दाने इति धातोः लुङि प्रथमपुरुषबहुवचनम्।

"तातेन कथितं पुत्र! लेखं लिख ममाज्ञया।
न तेन लिखितो लेखः पितुराज्ञा न लङ्घिता॥"

अत्र 'न तेन' इति पदद्वयस्य संयोजनेन 'नतेन' इत्येकं पदं कार्यम्। तदा विरोधो न भवति। एतादृशमन्यदेकं पद्यं विद्यते। यथा—

"कान्ते! धावय मे पादाविति भर्त्रा निवेदिता।
न तया धावितौ पादौ भर्तुराज्ञा न लङ्घिता॥"

अत्रापि 'नतया' इत्येकं पदं गृह्यते चेत् विरोधस्य परिहारो भवति।

"राक्षसेभ्यः सुतां हृत्वा जनकस्य पुरीं ययौ।
अत्र कर्तृपदं गुप्तं मर्यादा दशवार्षिकी॥"

राक्षसानाम् इभ्यः = स्वामी, राक्षसेभ्यः रावणः, जनकस्य सुतां हृत्वा पुरीं लङ्कां ययौ = अगच्छत् इत्यर्थः।

एतादृशान्यनेकानि पद्यानि सुभाषितरत्नभाण्डागारे समुपलभ्यन्ते। तेषां बोधनेन बालकानां व्याकरणज्ञानेन साकं मनोरञ्जनमपि सिध्यति। एवं व्याकरणबोधने क्रीडाविधिः प्रयोक्तव्यः।

उन्नतस्तरे छात्रेषु व्याकरणपठनस्य आसक्तिम् उत्पादयितुं मनोरञ्जनञ्च सम्पादयितुं किञ्चित् कठिनतरं पद्यं प्रयोक्तुं शक्यते। यथा—

"कति ते कबरीभारः सुमनस्सङ्गात् प्रियेऽतिनीलत्वात्।
भवति च कलापवत्त्वात् निर्जरसेव्यः कथं न स्यात्॥"

प्रिये!, ते = तव, कबरीभारः = केशसन्निवेशः, सुमनस्सङ्गात् — सुमनसां = पुष्पाणां, देवानां वा, सङ्गात् = सङ्गमात्, कति — कः इव = ब्रह्मेव आचरति इति कति। (उपमानादाचारे — पा.सू. 3.1.11, सर्वप्रतिपदिकेभ्यः क्विब्वा वक्तव्यः वा. 2.) नीलत्वात् = नीलवर्णत्वात्, अति — अः इव = विष्णुरिव आचरति इति अति। कलापवत्त्वात् कलापः = आभरणं, चन्द्रो वा, तद्वत्त्वात् भवति — भवः = शिव इव आचरति इति भवति, च। निर्जरसेव्यः — निर्जराणां = जरारहितानां तरुणानां, देवानां वा, सेव्यः कथं न स्यात्। प्रिये! तव केशपाशः नीलवर्णः, पुष्पैः, आभरणैश्च शोभितः तरुणानां सेव्यो भवति। ब्रह्मेव, विष्णुरिव शिव इव च आचरतीति देवानाञ्च सेव्यो भवति।

व्याकरणस्य विज्ञानत्वेन अध्ययनम्

व्याकरणशास्त्रं भाषायाः विज्ञानं भवति। ध्वनिविज्ञानं, शब्दोत्पत्तिविज्ञानं, पदव्युत्पत्तिविज्ञानं, वाक्यनिर्माणविज्ञानं, शाब्दबोधविज्ञानं, स्फोटविज्ञानम् इत्यादयः अनेके विषयाः व्याकरणशास्त्रे निरूप्यन्ते। अतः आधुनिकविज्ञानस्य शिक्षणे उपयुक्ताः सर्वेऽपि विधयः अत्र प्रयोक्तुं शक्यन्ते। आगमन-निगमनविधिरपि तत्र

प्रमुखो भवति। प्राकृतिकविषयाणां बोधनाय प्रायोजनाविधिः, अन्वेषणविधिरिति द्वौ विधी उपयुज्येते। एतयोः स्वरूपं, व्याकरणे प्रयोगश्च अधुना निरूप्यते।

प्रायोजनाविधिः (Project Method)

कस्यापि विषयस्य प्रायोगिकं ज्ञानं छात्राः स्वयं कार्यं कृत्वा प्राप्नुयुः। अध्यापकस्य मार्गदर्शने प्रस्तुतां कार्ययोजनाम् आश्रित्य छात्राः निश्चिते समये कार्यं समाप्य प्रायोगिकं ज्ञानं प्राप्नुवन्ति। जान् डीवी महाशयः, तस्य शिष्यः डब्ल्यू.एच्. किल्पेट्रिक् महोदयश्च प्रायोजनाविधेः प्रतिपादकौ स्तः।

प्रायोजनाविधेः निर्वचनानि

किल्पेट्रिक्—"सामाजिकवातावरणे संलग्नतापूर्वकं क्रियमाणा सोद्देश्यक्रिया एव प्रायोजना भवति।"

स्टीवेन्सन्—"प्राकृतिकवातावरणे समस्यात्मकप्रक्रियायाः समाधानान्वेषणमेव प्रायोजना।"

प्रोफेसर् बल्लर्ड्—"प्रायोजना जीवनस्य अभिन्नम् अङ्गमस्ति। प्रायोजनाविधेः 'क्रियया अधिगमः' इति विवरणापेक्षया 'जीवनेन अधिगमः' इति विवरणम् उचिततरं स्यात्।"

स्वतन्त्रता, सोद्देश्यता, आसक्तिः, क्रियाशीलता इत्येते गुणाः अत्र अध्ययनं सफलीकुर्वन्ति। अनुभवजन्यं ज्ञानमेव वास्तविकं ज्ञानं भवति।

प्रायोजनाविधेः सोपानानि—प्रायोजनाविधेः पञ्च सोपानानि भवन्ति। तानि च—

1. परिस्थितिनिर्माणम्
2. कार्यचयनम्, उद्देश्यनिर्धारणम्
3. कार्यक्रमनिरूपणम्
4. कार्यान्वयः
5. मूल्याङ्कनम् इति।

1. परिस्थितिनिर्माणम्—शिक्षकः स्वयं समस्यां न उपस्थापयति, किन्तु अन्यैः उपायैः सङ्कल्पितस्य विषयस्य अध्ययनाय परिस्थितिं कल्पयति। उपपदविभक्तेः द्वितीयायाः बोधनाय एकं चित्रं प्रदर्श्य छात्रैः सह वार्तालापं करोति।

नदीं निकषा मार्गः अस्ति। मार्गम् उभयतः गृहाणि सन्ति। गृहं परितः वृक्षाः सन्ति। वृक्षम् अभितः बालाः क्रीडन्ति।

कश्चन छात्रः वदति—गृहस्य परितः प्राकारः अस्ति।

अन्यः वदति—नद्याः निकषा मार्गः अस्ति।

तदा कश्चित् छात्रः पृच्छति—किमत्र युक्तम्? गृहं परितः इति द्वितीयाविभक्तिर्वा? अथवा गृहस्य परितः इति षष्ठीविभक्तिर्वा? इति।

अन्यः कश्चन छात्रः पृच्छति—नदीं निकषा इति द्वितीया समीचीना, उत नद्याः निकषा इति षष्ठी? इति। ततः शिक्षकस्य मार्गदर्शने कार्यस्य चर्चा भवति।

2. कार्यचयनम्, उद्देश्यनिर्धारणम्—छात्राः परस्परं विचार्य अध्यापकस्य साह्येन कार्यस्य स्वरूपम्, उद्देश्यञ्च निर्धारयन्ति। यथा—द्वितीयाविभक्तेः प्रयोगे प्रयोजकानां पदानामन्वेषणं, नियमानां निरूपणमिति कार्यस्य स्वरूपम्, उद्देश्यञ्च छात्राः शिक्षकस्य साह्येन निर्धारयन्ति।

3. कार्यक्रमनिरूपणम्—छात्राः कार्यं कृत्वा लक्ष्यं प्राप्तुम् उपायान् विचिन्त्य, कार्यक्रमं लिखित्वा स्पष्टीकुर्वन्ति। यथा—उपपदविभक्तेः द्वितीयायाः अध्ययनाय मार्गान् चिन्तयन्ति। व्याकरणग्रन्थाः द्रष्टव्याः, व्याकरणपण्डिताः प्रष्टव्याः, काव्यनाटकादिग्रन्थेषु प्रयोगाः द्रष्टव्याः इति छात्राः उपायान् प्रस्तुवन्ति, कार्यक्रमञ्च निरूपयन्ति।

1. येषां पदानां सम्बन्धात् द्वितीयाविभक्तेः प्रयोगो भवति, तादृशवाक्यानां समाहरणम्।
2. समाहृतवाक्यानां विश्लेषणम्।
3. नियमानां परिकल्पनम्।
4. नियमानाम् उदाहरणैः सह वर्गीकरणम्।
5. व्याकरणसूत्रैः प्रमाणैश्च परीक्षणम्।
6. नियमानाम् प्रयोगेण स्वातन्त्र्येण वाक्यरचना।

4. कार्यान्वयः—वर्गेषु विभक्ताः छात्राः अध्यापकस्य मार्गदर्शनेन आसक्त्या, परिश्रमेण च कार्यं सम्पादयन्ति। कृतं कार्यं लिखितरूपेण निवेदयन्ति। छात्राः स्वतन्त्राः स्वबुद्ध्या कार्ये प्रवृत्ताः भवन्ति। शिक्षकः बाधाः निवार्य, सन्देहान् दूरीकृत्य, अग्रे गन्तुं प्रोत्साहयति।

छात्राः स्वनिर्मितकार्यक्रमानुसारं उपपदविभक्तेः द्वितीयायाः प्रयोगान्, नियमांश्च निरूपयन्ति। प्रमाणैः परीक्ष्य, स्वयमपि वाक्यानि रचयन्ति।

5. मूल्याङ्कनम्—छात्राः कृतस्य कार्यस्य मूल्याङ्कनं स्वयमेव कुर्वन्ति। अध्यापकः मूल्याङ्कनार्थम् अपेक्षितानि प्रमाणानि, उपायान्, युक्तीश्च बोधयति। छात्राणां कार्यम् असमग्रं चेत् पूरयितुं मार्गं निर्दिशति। एवमेकस्य प्रायोजनाकार्यस्य समाप्तेः परम् अन्यत् कार्यं कर्तुं योजनां रचयति।

छात्राः सङ्गृहीतान् विषयान् सारणीकुर्वन्ति। अभितः, परितः, उभयतः, सर्वतः, धिक्, समया, निकषा, हा, प्रति इत्येतैः अव्ययैः योगे द्वितीया भवति। एवं सामीप्ये द्योत्ये उपरि, अधि, अधः इत्येतेषाम् अव्ययानां द्वित्वं भवति। तद्योगे द्वितीया भवति। यथा—

उपर्युपरि वृक्षं पक्षिणः डयन्ते।

मेघान् अधोऽधः विमानं डयते।

अध्यधि पर्वतं हरिणाः धावन्ति।

सामीप्यं देशकृतं, कालकृतञ्च भवति। पूर्वोक्तानि वाक्यानि देशकृतस्य सामीप्यस्य उदाहरणानि भवन्ति। कालकृतस्य सामीप्यस्य उदाहरणानि यथा—

उपर्युपरि रविवासरं सोमवासरो भवति।

अपराह्णम् अधोऽधः पूर्वाह्णः भवति।

अध्यधि दुःखं सुखं भवति।

प्रायोजनाविधेः समीक्षा—

गुणाः—

1. जीवने व्यावहारिककार्याणामिव विशिष्टानाम् विषयाणामपि अध्ययनं सम्भवति।
2. छात्राः स्वतन्त्राः, समस्यापरिहारे संलग्नाः वर्गेषु परस्परं सहभावेन कार्यं कुर्वन्ति, सक्रियाः भवन्ति।
3. अध्यापकः सुहृत्, मार्गदर्शकः, दार्शनिकश्च भवति। मार्गदर्शनेन, विघ्ननिवारणेन च छात्रान् प्रोत्साहयति। छात्रकेन्द्रितोऽयं विधिः।
4. अत्र परीक्षाः, अङ्काः, श्रेणयो वा न भवन्ति। छात्राः स्वस्य कार्यस्य मूल्याङ्कनं स्वयमेव कुर्वन्ति।

5. प्रायोजनाविधेः साफल्यं विदुषः कुशलस्य शिक्षकस्य सामर्थ्ये निहितमस्ति।

दोषाः—

1. अत्र औपचारिकशिक्षणादपि अनौपचारिकम् अध्ययनम् अधिकं भवति। प्रतिभावन्तः, उत्साहशीलाश्च छात्राः प्रयोजनं प्राप्नुवन्ति। मन्दाः, मध्यमाश्च वञ्चिताः भवन्ति।
2. परीक्षाणामभावात् वैयक्तिकस्तरस्य ज्ञानं न भवति। व्यक्तिगतभेदानां परिगणनं नास्ति।
3. अत्यल्पस्य विषयस्य अध्ययनाय अत्यधिकः समयः अपेक्ष्यते।
4. उपकरणानामभावे प्रायोजनायाः कार्यान्वयो दुष्करः।
5. धनस्य, समस्य च दुर्व्ययोऽपि सम्भाव्यते।

निष्कर्षः—उन्नतस्तरे प्रौढानां, विकसितमतीनां कृते विधिरयम् उपयोगी स्यात्। नूतनतत्त्वानाम् अन्वेषणस्य प्रवृत्तिः अधिगता स्यात्।

अन्वेषणविधिः (ह्युरिष्टिक्-विधिः)
(Heuristic Method)

''ह्युरिष्टिक्'' इति पदं 'Heurisco' इति ग्रीक्-शब्दात् निष्पन्नमस्ति। तस्य च 'अहमन्विष्य अवगच्छामि' इत्यर्थः। अन्वेषणाय छात्राणां प्रेरणमेव शिक्षकस्य कार्यमिति हर्बर्ट् स्पेन्सर् महोदयस्य सिद्धान्तमाश्रित्य प्रोफेसर् एच्. ई. आर्मस्ट्राङ्ग् महाशयेन नवदशशताब्द्यां विज्ञानशिक्षणार्थं निरूपितोऽयं विधिः।

विद्यालयस्य पाठ्यक्रमे विज्ञानं यदा अवश्याध्येयविषयत्वेन कल्पितः, तदा प्रयोगशालायाः, उपकरणानाञ्च अभावेऽपि सरलतया विज्ञानस्य शिक्षणाय आर्मस्ट्राङ्ग् महाशयेन ह्युरिष्टिक् विधिः आविष्कृतः। ततः परमयं विधिः गणितव्याकरणादीनां शिक्षणेऽपि प्रयुक्तः।

ह्युरिष्टिक् विधेः निर्वचनम्—

भाटिया—''छात्रेभ्यः तत्त्वानि न पाठ्यन्ते, किन्तु ते स्वयमेव अन्वेषकाः भूत्वा तत्त्वानि आविष्कुर्वन्ति।''

स्मित्, हेरिसन्, महोदयौ—"ह्युरिष्टिक् विधौ छात्राः स्वसमस्यायाः समाधानम् अन्येषां साह्यं विना परिश्रमेण स्वयं प्राप्नुवन्ति।"

एच्.सि. बर्नाई—"ह्युरिष्टिक् विधिः छात्रान् शोधकर्मणि प्रेरयति। छात्राः स्वीयाक्षेपान् स्वयं समादधति। अन्वेषणेन अन्ते स्वयमेव तत्त्वज्ञानं प्राप्नुवन्ति।"

इदम् ऐतिहासिकम् उदाहरणं ह्युरिष्टिक्विधेः स्वरूपं स्पष्टयति। ग्रीक् देशस्य राजा नूतनतया निर्मितस्य किरीटस्य कृते उपयुक्तस्य स्वर्णस्य परिमाणस्य विषये सन्देहं प्राकटयत्। किरीटस्य स्वरूपं संरक्षणीयम्। स्वर्णस्य परिमाणं ज्ञातव्यम्। प्रसिद्धः वैज्ञानिकः आर्किमेडिस् महोदयः समस्यायाः परिष्काराय अभ्यर्थितः। समस्यापरिहरणे व्यग्रः सः दिवानिशं तदेव चिन्तयन्नासीत्।

जलकुण्डिकायां स्नानं कुर्वतः जले मग्नस्य तस्य शरीरस्य भारः अपगत इव, जलस्य परिमाणम् उद्गतमिव च प्रत्यभात्। झडिति समस्यायाः परिष्कारः मनसि अस्फुरत्। आनन्दातिरेकेण वस्त्रमपि अधृत्वा स्नानगृहादेव 'युरेका' (अहमाविष्कृतवान्) इति उच्चैः आक्रोशन् मार्गेषु अधावत्। अयमेव 'आर्किमेडिस् नियमः' इति तन्नाम्ना प्रसिद्धोऽभवत्।

ह्युरिष्टिक् विधेः सोपानानि—

ह्युरिष्टिक् विधिना वैज्ञानिकविषयाणाम् अध्यापनाय पञ्च सोपानानि प्रयोक्तव्यानि भवन्ति। तानि च

1. समस्यायाः उपस्थापनम्
2. तत्त्वानां निरीक्षणं, वर्गीकरणञ्च
3. परिकल्पना
4. परीक्षणम्
5. निष्कर्षः

1. समस्यायाः उपस्थापनम्—शिक्षकः कक्ष्यायामेकां समस्यां तथा उपस्थापयति यथा छात्राः तमध्येतव्यं विषयम् आवश्यकम्, उपयोगिनञ्च मन्यन्ते। उदाहरणार्थं व्याकरणशिक्षणे अव्ययानां सुबन्तानाञ्च भेदः कः इति विषयः शिक्षकेण उपस्थाप्यते।

2. तत्त्वानां निरीक्षणं, वर्गीकरणञ्च—समस्यायाः स्वरूपं ज्ञात्वा छात्राः अन्वेषणमारभन्ते। संस्कृतकाव्येषु, कोषेषु, व्याकरणग्रन्थेषु च अन्विष्य समाहृतानि

पदानि विश्लिष्य वर्गीकुर्वन्ति। रामः, धनम्, अयम्, गौरी, हिमालयः इत्यादीनि सुबन्तानि पदानि। अपि, च, चिरं, प्रातः, पुनः, तदा, चित्, चन, कथम्, कदा, कुत्र इत्यादीनि अव्ययानि।

3. परिकल्पना—सङ्गृहीतानां तत्त्वानां निरीक्षणेन युक्त्या तर्कसङ्गतां परिकल्पनां समस्यायाः समाधानत्वेन निर्णयन्ति। यथा—सुबन्तशब्दानां लिङ्गं विभक्तिः, वचनम् इति भेदेन एकैकस्य शब्दस्य चतुर्विंशतेरधिकानि रूपाणि सम्भवन्ति। यद्यपि अव्ययमपि सुबन्तं भवति, तथापि तस्य लिङ्गविभक्तिवचनभेदाः न भवन्ति।

4. परीक्षणम्—शिक्षकस्य साह्येन छात्राः कृतस्य कार्यस्य परीक्षणं विभिन्नैः प्रमाणैः कुर्वन्ति। यथा—सुबन्तशब्दानां स्वभावमाश्रित्य एकविंशतिः सुप्प्रत्ययाः भवन्ति। लिङ्गाश्रितानि, विभक्तिवचनाश्रितानि च कार्याणि भवन्ति। अव्ययस्य तु नपुंसकलिङ्गस्य प्रथमैकवचनस्य सुप्रत्ययो भवति, तस्य च लुक् भवति। अतः त्रिषु लिङ्गेषु, सर्वासु विभक्तिषु, सर्वेषु वचनेषु च समानरूपाणि अव्ययानि इति कथ्यन्ते।

5. निष्कर्षः—परीक्षणेन ज्ञातानामंशानां निर्धारणेन निष्कर्षः सम्पाद्यते। विरुद्धाः, अपवादाश्च पृथक् क्रियन्ते। तेषां कृते अन्यस्य नियमस्य कल्पनं वा, प्रकृते नियमे, नियमान्तरस्य संयोजनेन वा निष्कर्षो भवति।

कानिचित् सुबन्तप्रतिरूपकाणि अव्ययानि भवन्ति। यथा—चिरं, चिरेण, चिराय, चिरात्, चिरस्य, कामम्, अन्तरेण, नमः, तत्, किम् इत्यादीनि। अस्ति, अस्मि इत्यादीनि तिङन्तप्रतिरूपकाणि अव्ययानि सन्ति। अतः एतादृशाः भ्रान्तिजनकाः शब्दाः श्रद्धेयाः भवन्ति। इति निष्कर्षः।

समीक्षा—प्रायोजनाविधाविव अत्रापि गुणदोषाः सम्भवन्ति।

समस्या-परिष्कारविधिरपि (Problem-solving Method) नास्मादतीव भिद्यते। आगमन-निगमनविधिश्च एतादृश एव भवति। अतः विज्ञानशिक्षणे प्रयुक्ताः एते विधयः व्याकरणशिक्षणे स्तरानुगुणं, समयानुसारं शिक्षकेण प्रयोक्तव्याः स्युः।

सिद्धरूपाणां कण्ठस्थीकरणम्

संस्कृतभाषायाः अध्ययनस्य प्रारम्भे सुबन्तशब्दानां, तिङन्तशब्दानाञ्च रूपाणि छात्रैः कण्ठस्थीकर्तव्यानि इति सम्प्रदायः वरीवर्ति। व्याकरणनियमैः

व्युत्पादिताः शब्दाः त्रिषु लिङ्गेषु अकारान्तादिक्रमेण व्यवस्थापिताः आदर्शभूताः कण्ठस्थीक्रियन्ते चेत् ततः परं काव्यादीनामध्ययने शब्दानाम् अन्तलिङ्गविभक्तिवचनानां प्रत्यभिज्ञानेन अर्थग्रहः सुकरो भवति। एवमेव परस्मैपदिनाम्, आत्मनेपदिनाञ्च धातूनां दशसु गणेषु विभक्तानां दशसु लकारेषु, त्रिषु पुरुषेषु, त्रिषु वचनेषु च रूपाणि वाचोविधेयानि भवन्ति चेत् विस्तृतस्य संस्कृतवाङ्मयस्य अध्ययने सौकर्यं भवति। छात्राणां शब्दकोशः विशालो भवति। धातोः अर्थज्ञानेन, तस्मात् धातोः निष्पन्नानां शब्दानामर्थज्ञानं सुग्रहं भवति।

अत्र आधुनिकाः मनोवैज्ञानिकाः एवं प्रत्यवतिष्ठन्ते।

1. बाल्ये शब्दरूपाणां कण्ठस्थीकरणं नीरसा, खेदजनिका प्रक्रिया भवति।
2. बलात्, निरन्तरं कण्ठस्थीकरणेन बालकानां मस्तिष्कं मन्दीभवति।
3. चिन्तनतर्कणादिबौद्धिकप्रक्रियाः अवरुद्धाः भवन्ति।
4. बालकस्य चिन्तनशक्तिः कुण्ठिता भवति।
5. यथाश्रुतग्रहणेन बालकस्य स्वतन्त्रं व्यक्तित्वं न विकसति।

किञ्च बहवः बालकाः कण्ठस्थीकरणमेव संस्कृताध्ययनमिति मन्यन्ते। कण्ठस्थीकरणात् भीताः संस्कृताध्ययनात् पराजयन्ते। अतः संस्कृतभाषाध्ययनस्य प्रारम्भे सिद्धरूपाणां वा, व्याकरणसूत्राणां वा कण्ठस्थीकरणं नोचितमिति बहूनां शिक्षाविदामपि मतम् अनिराकरणीयमस्ति।

अर्थज्ञानं विना शब्दानां वा,कोशानां वा, शास्त्राणां वा, वेदानां वा कण्ठस्थीकरणं क्लेशकरम्। तेन समयस्य, परिश्रमस्य च अपव्ययो भवति। प्राचीनैरपि पण्डितैः तत् निन्दितमेव। यथा—

'यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥' इति।

अत्रैवं समाधीयते। भाषाशिक्षणस्य प्रारम्भे एव सिद्धरूपाणां कण्ठस्थीकरणे बालकानां प्रेरणमनुचितमिति अङ्गीक्रियते। परन्तु भाषायाः सामान्यज्ञानप्राप्तेः परं काव्यादीनाम् अध्ययनाय सिद्धरूपाणां परिचयः अपेक्षितः। तेन छात्राणां महान् लाभो भवति। शिक्षकस्यापि कार्यं सरलं भवति। एकस्य अकारान्तस्य पुल्लिङ्गस्य रामशब्दस्य रूपाणाम् अध्ययनेन संस्कृते विद्यमानानां लक्षशः अकारान्तशब्दानां

रूपाणि ज्ञायन्ते। नपुंसकलिङ्गस्य अकारान्तशब्दस्य, पुल्लिङ्गस्य च कानि रूपाणि सदृशानि सन्ति, कानि भिन्नानीति विविच्य ज्ञातव्यम्। प्रथमाद्वितीयाविभक्त्योरेव भेदो भवति। तृतीयाविभक्तिमारभ्य उभयोः रूपाणि समानानि भवन्ति।

एवं सर्वनामसंज्ञकानाम् अकारान्तशब्दानां सर्वादीनां रूपाणि च विवेचनीयानि। रामशब्दस्य, सर्वशब्दस्य च रूपाणि पञ्च स्थलानि विहाय समानानि भवन्ति। द्वयोः भेदस्तावत्-प्रथमाबहुवचने- रामाः - सर्वे; चतुर्थ्येकवचने- रामाय - सर्वस्मै; पञ्चम्येकवचने - रामात् - सर्वस्मात्; षष्ठीबहुवचने- रामाणाम्- सर्वेषाम्; सप्तम्येकवचने- रामे- सर्वस्मिन् इति।

अर्थज्ञानपूर्वकं शब्दरूपाणां विवेचनेन, प्रयोगद्वारा अभ्यासेन च कण्ठस्थीकरणं, स्मरणं, धारणं, प्रत्यभिज्ञानं, प्रत्याह्वानञ्च स्वतः सिद्ध्यति। गणितस्य, विज्ञानस्य च अध्ययने गुणितकोष्ठकानि, सूत्राणि, नियमाश्च स्मर्तव्यानि भवन्ति। पारिभाषिकपदानां निर्वचनानि न स्मर्यन्ते चेत् अध्ययनं न प्रचलति।

अतः भाषाध्ययने व्याकरणनियमानुगतानि शब्दानां साधुरूपाणि, वाक्यनिर्माणे सहायकाः कारकनियमाश्च यथोचितं ज्ञातव्याः, सादृश्यभेदज्ञानेन स्मर्तव्याश्च।

कण्ठस्थीकरणे उपयुक्ताः केचन विधयः

1. **पूर्णविधिः** (Whole Method)—कण्ठस्थीकर्तव्यः विषयः आदितः सान्तं पठित्वा पुनः तथैव आवर्तनं क्रियते। रामशब्दस्य सर्वाणि रूपाणि पठित्वा धारणपर्यन्तं पुनः पुनः आवर्तयति। 'पूर्णादंशं प्रति' इति शिक्षणसूत्रम् अत्र उपयुज्यते। ग्रहणधारणपटूनां बालानां, प्रौढानाञ्च कृते उपकारकोऽयं विधिः।

2. **खण्डविधिः** (Part Method)—कण्ठस्थीकर्तव्यं विषयं शिक्षकः खण्डशः विभज्य उपस्थापयति। छात्रः प्रथमखण्डस्य ग्रहणानन्तरमेव द्वितीयखण्डं कण्ठस्थीकरोति। यथा—**रामशब्दस्य प्रथमाविभक्तेः त्रीणि वचनानि** - रामः रामौ रामाः इति हृदिस्थं कृत्वा ततः द्वितीयाविभक्तिं पठति- **रामं रामौ रामान्** इति। 'अंशात् पूर्णं प्रति' इति शिक्षणसूत्रम् अत्र प्रयुज्यते।

3. **मिश्रितविधिः** (Mixed Method or Whole-part Method)—पूर्वोक्तयोः द्वयोः विध्योः मिश्रणमत्र क्रियते। आदौ एकवारं विषयं पूर्णतः **पठित्वा, ततः छात्रः एकैकं भागं खण्डशः** कण्ठस्थीकरोति। अन्ते पुनरेकवारं पूर्णं पठति। यदा विषयः विस्तृतो भवति, तदा विधिरयम् उपकरोति।

4. प्रगतिशीलविधिः (Progressive Method)—**वेदानाम्, अष्टाध्याय्याः, अमरकोशस्य, काव्यानां वा** कण्ठस्थीकरणाय उपकारकोऽयं विधिः। प्रतिदिनं नियमितसमये कण्ठस्थीकरणं प्रचलति। प्रथमदिने कश्चन भागः कण्ठस्थीक्रियते। द्वितीयदिने पूर्वभागस्य स्मरणं कृत्वा, द्वितीयभागः हृदिस्थः क्रियते। तृतीयदिने आदितः पूर्वभागं स्मृत्वा, तृतीयभागः पठ्यते। एवं सम्पूर्णस्य ग्रन्थस्य कण्ठस्थीकरणं प्रचलति। अयमेव पारायणविधिः इत्युच्यते।

5. व्यवधानविधिः (Spaced Method)—छात्रः कण्ठस्थीकरणीयं विषयम् पठित्वा कानिचित् दिनानि तस्य मननं करोति। पुनः तं विषयं पठति। एवं समयव्यवधानेन काले काले विषयस्य पठनेन स्मरणं दृढं भवति।

6. निरन्तरविधिः (Unspaced Method)—पूर्वविधेः विपरीतोऽयं विधिः। छात्रः समयव्यवधानं विना एकमेव विषयं निरन्तरं पठित्वा हृदिस्थं करोति।

7. क्रियात्मकविधिः (Active Method)—पद्यानां, गीतानां, नाटकानाञ्च अभिनयेन साकं कण्ठस्थीकरणं छात्राणां रुचिकरं भवति। अल्पेन समयेन, आनन्देन, विनायासं कण्ठस्थीकरणं सम्भवति।

8. मौनविधिः (Passive Method)—अयं विधिः पूर्वविधेः विपरीतो वर्तते। प्रौढाः अर्थावगमनपूर्वकं मौनवाचनं कृत्वा विषयं धारयन्ति।

9. वृत्तविधिः (Recitation Method)—ताललयानुसारं पद्यानां सस्वरपाठनेन कण्ठस्थीकरणं सुकरं भवति। वृत्तेषु निबद्धानि पद्यानि, कारिकाः, कोशाश्च तथा पठितुं शक्यन्ते। शब्दरूपाणि, धातुरूपाण्यपि लयबद्धतया पाठयन्ते। यथा—रामः रामौ रामाः इति।

10. आवृत्तिविधिः (Repetition Method)—अध्यापकेन उच्चारितं श्रुत्वा छात्राः द्विवारम् आवर्तयन्ति। वेदमन्त्राणां बोधनमेवमेव क्रियते। एवं प्रतिदिनं श्रवणेन, श्रुतस्य द्विः उच्चारणेन च विषयस्य धारणं सम्भवति।

यथासम्भवम् एतेषां विधीनाम् उपयोगेन सिद्धरूपाणां कण्ठस्थीकरणं संस्कृताध्ययनम् उपस्करोति।

व्याकरणशिक्षणस्य सोपानानि—

विद्यालयेषु व्याकरणशिक्षणे आगमननिगमनप्रणाली विशेषरूपेण उपयुज्यत इति हेतोः तया प्रणाल्या व्याकरणशिक्षणस्य सोपानानि निर्दिश्यन्ते।

1. प्रस्तावना—

अध्येतव्ये व्याकरणविषये छात्राणां पूर्वज्ञानं परीक्षितुं केचन प्रश्नाः पृच्छ्यन्ते। अध्येतव्ये विषये आसक्तिमुत्पादयितुं तत्सम्बद्धाः प्रयोगाः काव्येभ्यः समुद्धृत्य प्रदर्श्यन्ते।

2. उद्देश्यकथनम्—

अध्येतव्यस्य सन्धिनियमस्य, समासस्य, प्रत्ययस्य वा सामान्यरूपेण निर्देशः क्रियते।

3. प्रस्तुतीकरणम्—

आगमन-निगमनप्रणाल्या व्याकरणस्य अध्यापनाय अत्रैतानि उपसोपानानि आश्रीयन्ते।

1. सामान्यनियमस्य अधिगमनाय आवश्यकानाम् उदाहरणानां निश्चितरीत्या प्रदर्शनम्।
2. प्रयोगाणां परिशीलनं, विश्लेषणं, वर्गीकरणञ्च।
3. साधारणनियमस्य अधिगमनम्।
4. नियमस्य निर्धारणाय विभिन्नेषु उदाहरणेषु परीक्षणम्।
5. अपवादानां परित्यागेन निष्कृष्टनियमस्वरूपस्य निर्धारणम्।

4. पुनरावृत्तिः—

निश्चितस्य नियमस्य, उदाहरणानाञ्च पुनः परिशीलनेन स्मरणयोग्यत्वं सम्पाद्यते।

5. कक्षाकार्यं, गृहकार्यञ्च—

नियमस्य अभ्यासाय कक्षायां किञ्चित् मौखिकं, लिखितं वा कार्यं दीयते। ततः गृहे विस्तृताध्ययनाय रचनाकार्यम्, अनुवादो वा दीयते।

❖❖❖

पञ्चदशोऽध्यायः

रचनाशिक्षणम्

भाषायाः प्रयोजनं विचारविनिमयः — विचाराणाम् आदानं प्रदानञ्च; अथवा ग्रहणम्, अभिव्यक्तिश्च। श्रवणेन, वाचनेन च विचाराणां ग्रहणं, भाषणेन, लेखनेन च अभिव्यक्तिः सम्भवति। व्यावहारिकस्तरमारभ्य, शास्त्रकाव्यप्रणयनपर्यन्तम् अभिव्यक्तेः विभिन्नस्तराः सन्ति, ते सर्वे रचनायाम् अन्तर्भवन्ति। रचना सर्जनात्मकं कार्यं भवति। अत्र भाषायाः सन्दर्भे शाब्दिकी रचना एव गृह्यते। संस्कृतसाहित्ये रचनाप्रकाराणां वैविध्यं नाट्यशास्त्रे, अलङ्कारशास्त्रे च बहुधा प्रतिपादितमस्ति।

प्रधानतः रचना द्विविधा भवति काव्यं, शास्त्रमिति। हृदयगतानां भावानां, रसानाञ्च रमणीयतया निबन्धनेन रचितं काव्यं मनोरञ्जकं भवति। बौद्धिकविचाराणां युक्तिभिः, समर्थकैः न्यायैश्च प्रतिपादनं शास्त्रं भवति। तदेवमुक्तमभियुक्तैः—

'द्वे वर्त्मनी सरस्वत्याः शास्त्रं काव्यमिति स्थिते।
प्रज्ञोपज्ञं तयोराद्यं प्रतिभोद्भवमन्तिमम्॥' इति।

शास्त्ररचनायां बौद्धिकी प्रज्ञा, काव्यरचनायां प्रतिभा च मूलकारणं भवति। काव्यनिर्मितौ कारणत्रयं मम्मटेन प्रोक्तं काव्यप्रकाशे—

"शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यासः इति हेतुस्तदुद्भवे॥" इति

जन्मजाता, मन्त्रौषध्युपासनादिभिर्लब्धा वा प्रतिभा शक्तिरित्युच्यते। लोकव्यवहाराणां, शास्त्राणां, पूर्वकविप्रणीतानां काव्यानाञ्च अध्ययनेन नैपुण्यं सिध्यति। काव्यशास्त्रज्ञानां गुरूणां मार्गदर्शनेन रचनायामभ्यासः अपेक्षितः। एवं शक्तिः, निपुणता, अभ्यासः इत्येते त्रयः सम्भूय काव्योत्पत्तौ कारणं भवन्ति। । हेतुरिति एकवचनस्य प्रयोगेण त्रयाणां युगपत् हेतुत्वं, न तु पृथक् इति स्पष्टीक्रियते।

तथापि प्रतिभायाः प्राधान्यमङ्गीक्रियते बहुभिः।

"अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।
यस्त्वशक्तिकृतो दोषः झडित्येवावभासते॥" इति

नैपुण्यादपि शक्तेः काव्यनिर्माणे प्राथम्यं मन्यते। प्रतिभासम्पन्नाः कवयः लौकिकैरेव शब्दैः, अर्थैश्च अलौकिकमर्थं प्रकाशयन्ति, रञ्जयन्ति च लोकान्। यथा—

'यानेव शब्दान् वयमालपामः
यानेव चार्थान् वयमुल्लिखामः।
तैरेव विन्यासविशेषभङ्ग्या
सम्मोहयन्ते कवयो जगन्ति॥'

शाब्दिकी अभिव्यक्तिः मौखिकी, लिखितरूपा चेति द्विधा भवति। मौखिकाभिव्यक्तिरेव मनुष्याणां सहजा, स्वाभाविकी च। सैव लिखिताभिव्यक्तेः भूमिकां रचयति। प्रत्यक्षं परस्परेण व्यवहारे मौखिकाभिव्यक्तिः पर्याप्ता स्यात्। कालेन, देशने च व्यवहितानां, दूरस्थानां कृते विचाराभिव्यक्तिः लेखनमाध्यमेन कर्तव्या भवति। प्रत्यक्षव्यवहारे आङ्गिकाभिनयः, हावभावादयश्च अभिप्रायप्रकाशने शब्दानां सहायकाः भवन्ति। लेखने तु सर्वं कार्यं शब्दैरेव सम्पादनीयम्। उद्दिष्टस्य आशयस्य प्रकटनाय शब्दानां बन्धः (सङ्घटना) नितरां युक्तः स्यात्। स एव निबन्ध इत्युच्यते, कैश्चित् प्रकृष्टो बन्धः प्रबन्धः इति च। वाक्यघटकाः शब्दाः उद्दिष्टस्य अर्थस्य बोधने शक्ताः स्युः। शब्दार्थयोः सम्बन्धः वाच्यवाचकभावापरपर्याया शक्तिरित्युच्यते। शक्तिग्रहे च कोशव्याकरणयोः अनुपेक्षणीयं स्थानमस्ति। अतः निबन्धरचनायै व्याकरणस्य, कोशानाञ्च अध्ययनं नितरामपेक्ष्यते।

मौखिकनिबन्धरचनयाः प्रारम्भिकस्तरे भाषितव्यवहारे उच्चारणस्य महत्त्वं सुविज्ञातमेव। तत्र दोषाणां कारणानि, परिहारोपायाश्च सप्तमेऽध्याये उच्चारणशिक्षणे प्रतिपादिता इति नात्र पुनरावर्त्यते। मौखिकनिबन्धोऽपि वृत्तबन्धरहितः गद्यरूपः, वृत्तबन्धसहितः पद्यरूपश्च भवति।

मौखिकनिबन्धशिक्षणस्य उद्देश्यानि—

1. छात्राणां भाषणकौशलस्य वर्द्धनम्।
2. शब्दज्ञानस्य, वाक्यरचनाज्ञानस्य च सम्पादनम्।
3. प्रतिभायाः, विचाराणाञ्च धैर्येण प्रतिपादनम्।

4. सम्भाषणेन, संवादेन च विचारविनिमयकौशलस्य वृद्धिः।
5. वर्णनकौशलस्य, कल्पनाकौशलस्य च वृद्धिः।
6. विषयानुसारं, भावानुसारं कण्ठस्वरस्य परिवर्त्तनम्।
7. वाचिकाभिनयकौशलस्य सम्पादनम्।
8. कथाकथनकौशलस्य वर्द्धनम्।
9. आशुपद्यकथनम्।

शिक्षणविधयः—

कथाकथनविधिः (Story telling Method)—छात्राः अन्येभ्यः श्रुतां, पुस्तकेषु पठितां वा कथां वदेयुः। अध्यापकः कथासम्बद्धानि चित्राणि प्रदर्श्य कथां वदेत्। छात्रा अपि स्वेच्छया स्वकल्पनानुसारं कथां वक्तुं शक्नुवन्ति। ततः परमध्यापकः चित्राणि प्रदर्श्य, तत्र दृश्यमानानां वस्तूनां, मृगाणां, पक्षिणाञ्च वाचकान् शब्दान् उपदिशेत्। तदा छात्राः स्वकल्पनया कथां वदेयुः।

सम्भाषणविधिः (Conversation Method)—कमपि व्यवहारं, विषयं वा आदाय अध्यापकः छात्रैः साकं सम्भाषेत। छात्रानपि मिथः सम्भाषितुं प्रेरयेत्। अत्रैकं पद्यरूपं सम्भाषणमुदाह्रियते।

का त्वं बाले?	काञ्चनमाला
कस्याः पुत्री?	कनकलतायाः।
हस्ते किं ते?	तालीपत्रं
का वा रेखा?	का खा गा घा।

जीवनस्य दैनन्दिनव्यवहारेषु आपणे, पत्रालये, बस्यानिस्थाने च सम्भाषणं कथं स्यादिति अध्यापकः छात्रान् शिक्षयेत्।

संवादविधिः (Debate)—कस्यापि विषयस्य पक्षद्वयमुपादाय मिथः वर्गद्वयस्य संवादः स्यात्। सत्यम्, असत्यमिति वा, युक्तम्, अयुक्तमिति वा आवश्यकम्, अनावश्यकमिति वा स्वपक्षस्य युक्तिभिः, समर्थनं, परपक्षस्य निराकरणञ्च कर्तव्यम्। अध्यापकः अध्यक्षो भूत्वा मार्गदर्शनं करोति, नियन्त्रयति च।

उद्योगेषु स्त्रीणाम् आरक्षणम् (Reservation) इति विषये कक्षायां केचन

छात्राः (एकः वर्गः) तदावश्यकमिति समर्थयन्ति चेत् अन्ये छात्राः (द्वितीयवर्गः) अनावश्यकमिति प्रतिपादयन्ति। अन्ते अध्यापकः अध्यक्षः निर्णयं करिष्यति। अयं संवादः द्वयोः छात्रयोः मध्येऽपि भवितुमर्हति। युक्तिप्रत्युक्तिभिः खण्डनमण्डनात्मकः संवादः, वादो वा शास्त्रसभासु प्रसिद्धः। 'वादे वादे जायते तत्त्वबोधः' इति तत्त्वज्ञानस्य प्राप्तावयमुपायस्सुनिश्चितो वर्तते। काव्येष्वपि चमत्कारजनकः पद्यरूपः संवादः कविभिर्निबद्धो दृश्यते। यथा राधामाधवयोः संवादः—

अङ्गुल्या कः कवाटं प्रहरति ? कुटिले! माधवः, किं वसन्तः ?
नो चक्री, किं कुलालः ? न हि धरणिधरः, किं द्विजिह्वः फणीन्द्रः ?।
नाहं घोराहिमर्दी, किमु विहगपति, नो हरिः, किं कपीन्द्रः ?
इत्येवं सत्यभामाप्रतिवचनजितः पातुवश्चक्रपाणिः॥

अन्यदपि प्रश्नोत्तररूपं समानवाक्यनिबद्धं पद्यमुदाह्रियते—

कं सञ्जघान कृष्णः ?
का शीतलवाहिनी गङ्गा ?।
के दारपोषणरताः ?
कं बलवन्तं न बाधते शीतम् ? ॥

एतेषां प्रश्नानामुत्तरं पादेषु प्रथमद्वितीयपदानां सन्धानेन लभ्यते। यथा—

कंसं जघान कृष्णः
काशीतलवाहिनी गङ्गा।
केदारपोषणरताः
कम्बलवन्तं न बाधते शीतम्॥

एतादृशानां संवादानाम् अध्ययनेन शब्दप्रयोगचातुर्यं वर्धते।

हास्योक्तिविधिः (Jokes)—बालकेभ्यः हास्योक्तयो रोचन्ते। अतः अध्यापकः हास्योक्तीः कथयेत्। छात्रानपि हास्योक्तीः सङ्ग्रहीतुं, वक्तुञ्च प्रेरयेत्। पद्यरूपा हास्योक्तिरत्र प्रस्तूयते।

'वैद्यराज ! नमस्तुभ्यं यमराजसहोदर!।
यमस्तु हरति प्राणान्, वैद्यः प्राणान् धनानि च॥

वैद्यराज ! नमस्तुभ्यं क्षपिताशेषमानव।

त्वयि विन्यस्तभारोऽयं कृतान्तः सुखमेधते॥

चितां प्रज्वलितां दृष्टवा वैद्यो विस्मयमागतः।

नाहं गतो, न मे भ्राता कस्येदं हस्तलाघवम्॥'

चर्चाविधिः (Discussion Method)—लघुवर्गेषु विभक्ताः छात्राः कमपि विषयं, कार्यक्रमं वा अधिकृत्य चर्चां कुर्युः। चर्चितान् अंशान्, स्वीकृतान् निर्णयांश्च सरलैः वाक्यैः लिखेयुः। अध्यापकः विषय-निर्देशेन चर्चामायोजयति, पर्यवेक्षते च।

शैक्षिकयात्रायाः विषये एकेन वर्गेण दर्शनीयानां स्थलानाम्, अन्येन वर्गेण भोजनस्य विषये, अन्येन वर्गेण वाहनस्य मार्गस्य च विषये चर्चा क्रियते। एकस्मिन् वर्गे एकः छात्रः चर्चाविषयं, निर्णयञ्च स्पष्टं लिखति। विभिन्नेभ्यः स्रोतोभ्यः अपेक्षितं समाचारं समाहरन्ति छात्राः। अतः तस्मिन् विषये छात्राणां शब्दज्ञानं, विचार-विकासश्च वर्धते।

गोष्ठीविधिः (Seminar Method)—विचारणीयः विषयः अध्यापकेन सप्ताहात् पूर्वमेव प्रस्तूयते। छात्राः तं विषयं सम्यगधीत्य सभायां स्वविचारं संक्षेपेण प्रस्तुवन्ति। अध्यापकः अध्यक्षो भूत्वा सभायाः निर्वहणं करोति। 'वनसंरक्षणम्' इति विषयं छात्राः सम्यक् विचिन्त्य, विभिन्नस्रोतोभ्यः विषयं सङ्गृह्य निमेषद्वये, निर्दिष्टे समये वा प्रतिपादयन्ति। अत्र छात्राणां भाषा, प्रतिपादनयुक्तयः, भाषणरीतिः, आङ्गिकाभिनयश्च परीक्ष्यन्ते। उचितं मार्गदर्शनं क्रियते।

आशुभाषणविधिः (Extempore Speech)—सद्यः प्रदत्तं विषयमादाय छात्रः स्वप्रतिभया भाषणे नैपुण्यं प्रदर्शयेत्। अधिकं प्रयत्नं विना प्रायः निमेषत्रयं भाषितुं छात्राः प्रेरिताः स्युः। अत्र छात्रस्य शब्दज्ञानं, विषयप्रतिपादनरीतिः, उपक्रमोपसंहारयोः समानता, अंशानां विश्लेषणं, क्रमशः प्रतिपादनं, युक्त्या समर्थनं, भाषणरीतिः, आङ्गिकाभिनयश्च परीक्ष्यन्ते। अध्यापकः यथोचितं प्रशिक्षणं ददाति।

नाटकविधिः (Dramatisation)—अध्यापकः नाटकाभिनयार्थं स्वीकृतां कथां (Theme) बोधयति। कथायाः विभजनं कृत्वा दृश्येषु घटनां विवृणोति।

पात्राणां स्वरूपं, स्वभावञ्च बोधयति। पात्राणाम् अभिनयार्थं केचन चिताः छात्राः स्वयमेव भाषणं कुर्वन्तः अभिनयन्ति। यावत्पर्यन्तं सम्भाषणं पात्राणां भावं व्यञ्जयितुं, दर्शकानां मनो रञ्जयितुञ्च समर्थं न भवति, तावत्पर्यन्तं तत्र परिवर्तनं क्रियते। एवमनेकवारम् अभ्यासं कृत्वा अन्ते तत् नाटकं लिख्यते।

एवमनेन विधिना छात्राः वाचिकाभिनये, नाटकरचनायाञ्च नैपुण्यं सम्पादयन्ति।

पद्यपूरणविधिः—पद्यरचनाशिक्षणाय अध्यापकः कानिचित् पद्यानि पठित्वा वृत्तानुरूपं वर्णविन्यासं, यतिं, तालं, लयञ्च बोधयेत्। कस्यचित् पद्यस्य पदानां परिवर्तनेन विषयान्तरं, भावान्तरं वा प्रतिपादयितुं प्रेरयेत्। एतच्च प्रथमं मौखिकरूपेण भवेत्। अनन्तरं तस्य लेखनं कर्तव्यम्। यथा—

'स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः॥' रघु. 4-1

'स मातुर्मरणाद् रिक्तं पदं प्राप्याधिकं बभौ।
सूर्यस्यास्तमयाद् रात्रौ प्रभामिव निशाकरः॥'

सः = राजीवगान्धिः, मातुः = इन्दिरागान्धेः, पदं = प्रधानमन्त्रिपदम्।

समस्यापूरणविधिः—पद्यरचनायां छात्राणां नैपुण्यं विकासयतुं काचित् समस्या प्रस्तूयते अध्यापकेन। छात्राः स्वप्रतिभानुसारं समस्यायाः समाधानं पद्यरूपेण रचयन्ति। अत्रापि मौखिकी रचना पूर्वं सम्पाद्यते। अनन्तरं लिख्यते। उदाहरणार्थम्—

'निशि सूर्यः समागतः' इति समस्या। अयं श्लोकस्य चतुर्थः पादः स्यात्। अन्ये त्रयः पादाः पूरणीयाः।

1. सूर्यचन्द्रावुभौ बालौ ग्रामान्नगरं गतौ।
   चन्द्रः प्रत्यागतः सायं निशि सूर्यः समागतः॥
2. सुरापानेन चोन्मत्तः समागत्य गृहाद् बहिः।
   पूर्णचन्द्रं विलोक्याह निशि सूर्यः समागतः॥
3. कृष्णं प्रतीक्षमाणा सा राधा विरहपीडिता।
   पूर्णचन्द्रं विलोक्याह निशि सूर्यः समागतः॥

छात्राः प्रारम्भे शब्ददोषं, वृत्तदोषञ्च कुर्युः। अध्यापकः संशोधनं कृत्वा प्रोत्साहयेत्।

दृष्टव्याख्यानविधिः (Running Commentary)—प्रवर्तमानस्य कार्यक्रमस्य, उत्सवस्य, क्रीडायाः वा निरन्तरवर्णनम् अत्युत्तमं भाषणकौशलं व्यञ्जयति। मध्ये सन्दर्भोचिताः पुराणकथाः, ऐतिहासिकविषयाश्च संयोजनीया भवन्ति। दृश्यस्य वर्णनं चित्ताकर्षकं भवेत्। अध्यापकः एतं विधिमुपयुज्य छात्राणां भाषणकौशलं वर्धयेत्। समुचितम् अभ्यासं कारयेत्।

❖❖❖

षोडशोऽध्यायः

अनुवादशिक्षणम्

भारतस्य विभिन्नेषु प्रदेशेषु विभिन्नाः भाषाः भाष्यन्ते। तथापि आसेतुहिमाचलं संस्कृतसाहित्यं पठनपाठनयोर्वरीवर्ति। ये केचित् कार्यान्तरव्यापृताः संस्कृतं पठितुमसमर्थाः तेऽपि स्वमातृभाषया अनूदितान् संस्कृतग्रन्थान् पठन्ति। अत एव प्राचीनकालादारभ्य रामायणं, महाभारतं, पुराणानि, काव्यानि, नाटकानि, श्रीमद्भगवद्गीता, उपनिषदः, अन्ये च बहवो ग्रन्थाः प्रादेशिकभाषाभिः अनूदिताः उपलभ्यन्ते। वैदिकसाहित्यं, लौकिकसाहित्यं, शास्त्रग्रन्थाः, दार्शनिकग्रन्थाश्च भारतीयभाषाभिः, आङ्गलभाषया, अन्यवैदेशिकभाषाभिश्च अनूदिताः विश्वे भारतीयस्य साहित्यस्य, विज्ञानस्य, संस्कृतेश्च महत्त्वं, गाम्भीर्यञ्च प्रसारयन्ति।

प्राचीनकालादारभ्य प्रादेशिकभाषासु रचितं साहित्यं संस्कृतेनापि अनूदितमस्ति। पैशाचीभाषया रचिता बृहत्कथा, प्राकृतभाषया रचितं जैनसाहित्यं, हालस्य गाथासप्तशती, अन्यदपि प्रसिद्धं प्राकृतसाहित्यं, पालिभाषया रचितं बौद्धसाहित्यं, वैदेशिकं साहित्यं विज्ञानमपि संस्कृतभाषया अनूदितमस्ति। यतः संस्कृतं सर्वत्र भारते, विदेशेषु च साहित्यविज्ञानयोः प्रसारस्य माध्यमत्वेन कविभिः,पण्डितैः, साधारणजनैश्च अङ्गीकृतमासीत्। अतः अद्यत्वेऽपि आधुनिकसाहित्यस्य संस्कृतेन अनुवदितुं, संस्कृतेन रचितानाम् अनेकेषां ग्रन्थानाम् आङ्गलभाषया, हिन्दीभाषया, प्रादेशिकभाषाभिश्च अनुवदितुञ्च अनुवादशिक्षणं संस्कृतशिक्षणस्य अभिन्नमङ्गमिति अङ्गीकर्तव्यम्।

रचनाकौशलम् अनुवादशिक्षणस्य आधारो भवति। रचनायाम्, अनुवादे च कोशानां, व्याकरणनियमानाञ्च उपयोगः अनुपेक्षणीयोऽस्ति। अन्यथा शब्दसौष्ठवम् अर्थगौरवञ्च न सिध्यति। वाक्यरचनाशिक्षणे संरचनाविधिः नितरामुपयुज्यते। संस्कृतस्य श्रवण-भाषण-वाचन-लेखनकौशलानां केनचित् परिमाणेन साधनात् परं

रचनायाः, अनुवादस्य च शिक्षणं माध्यमिकस्तरे युगपत् आरब्धुं शक्यते। यतः रचनानुवादयोः मिथः सम्बन्धः प्रसिद्ध एव।

अनुवादशब्दस्य अर्थः, निर्वचनञ्च—

अनु इत्युपसर्गपूर्वकात् वद व्यक्तायां वाचि इति धातोः भावे घञ्प्रत्यये अनुवादशब्दः निष्पद्यते। अनुसृत्य कथनमिति शाब्दिकोऽर्थः सिध्यति। सिद्धस्योपन्यासः अनुवादः इति वैयाकरणसिद्धान्तकौमुदी-सू. 2.4.3।

प्रमाणान्तरेण प्राप्तस्यार्थस्य शब्देन सङ्कीर्तनमनुवाद इति केचित्। चक्षुरादिभिरिन्द्रियैरधिगतस्य विषयस्य वाचा प्रतिपादनमनुवाद इत्यपरे। कयापि भाषया प्रोक्तानां विषयाणां भाषान्तरेण कथनमनुवाद इति अद्यत्वे रूढोऽयमर्थः।

एषामाशयानां परिशीलनेन ज्ञायते यत् प्रौढभाषया विस्तरेण रचितानां ग्रन्थानां तयैव भाषया सरलतयां संक्षेपेण कथनमपि अनुवादो भवति। वृत्तबद्धपद्यैः रचितानां शास्त्राणां, काव्यानां पुराणानाञ्च सरलसंस्कृतेन गद्यरूपेण कथनमपि अनुवादो भवति।

अनुवादस्य आवश्यकता—

(1) सर्वेऽपि जनाः सर्वाः भाषाः अध्येतुं न शक्नुवन्ति। तथापि अन्यभाषाभाषिणां जनानां विचाराणामवगमने भाषा अवरोधिका न स्यात्। अतः अनुवादः तत्र विभिन्नभाषाभाषिणां जनानां मध्ये सम्बन्धं स्थापयति। भारतं बहुभाषाभाषि राष्ट्रं वर्तते। एवमतिप्राचीनकालात् संस्कृतं भारते, अन्येषु च देशेषु विचारविनिमयार्थम् उपयुक्ता भाषा वर्तते। प्रादेशिकभाषाभिः अभिव्यक्तानां भावानां, विचाराणाञ्च संस्कृतेन अनुवादः, संस्कृतेन रचितानां ग्रन्थानां प्रादेशिकभाषाभिरनुवादश्च विभिन्नदेशीयानां जनानां मिथः वैचारिकं, भावात्मकञ्चैक्यं स्थापयितुमुपयुज्यते।

(2) ये साहित्योपासकाः भवन्ति ते सर्वासु भाषासु विद्यमानं प्राचीनमर्वाचीनञ्च साहित्यं पठितुमिच्छन्ति। स्वभाषया अनूदितं विभिन्नभाषासाहित्यं तान् बहुधा उपकरोति। विभिन्नासु भाषासु रचितं, पुरस्कृतञ्च उत्तमं साहित्यं पत्रिकाद्वारा प्रचारयन्ति केचन सम्पादकाः।

(3) ये च विज्ञानाराधकाः जनाः सन्ति तेऽपि बहुविधं विज्ञानं स्वभाषया अनूदितमधीत्य स्वज्ञानं वर्धयन्ति। स्वकीयञ्च ज्ञानं प्रकाशयन्ति।

(4) ये केचित् दर्शनाध्ययनरताः विभिन्नाभिः भाषाभिः रचितान् दार्शनिकग्रन्थान् स्वभाषया अनूदितान् पठित्वा जिज्ञासां शमयन्ति।

(5) एवं भारतीयविज्ञानं (Indology), पुरावस्तुतत्त्वशास्त्रं (Archeology), आयुर्वेदं, वास्तुशास्त्रं, ज्योतिःशास्त्रं, गणितशास्त्रं, भारतस्य प्राचीनमितिहासञ्च अध्येतुकामाः विद्यार्थिनः, वेदेषु, वेदाङ्गेषु, दर्शनेषु, सूत्रग्रन्थेषु, शास्त्रग्रन्थेषु, काव्येषु, नाटकेषु च उपपादितान् अनेकविधान् विषयान् जिज्ञासमानाः, संस्कृतमजानानाः, किञ्चित् संस्कृतं जानन्तोऽपि प्रौढान् विशालान् मूलग्रन्थान् अध्येतुमशक्ताश्च अनुवादग्रन्थान् आश्रयन्ते इति निश्चप्रचम्। अनेनापि अनुवादस्य आवश्यकता महत्ता च अनुभूयते।

(6) ये केचित् धर्माचार्याः, समाजसुधारकाः, राजनेतारः, विज्ञानिनश्च स्वमतं प्रचारयितुम् अनुवादकान् आश्रयन्ते।

(7) आधुनिकेषु सञ्चारमाध्यमेषु वृत्तपत्रादिषु विभिन्नप्रदेशेषु प्रवृत्तान् वृत्तान्तान् विभिन्नाभिः भाषाभिः प्रसारयितुम् अनुवादकानाम् अनुवादसामर्थ्यमेव निदानमिति निर्विवादम्।

(8) भारते केन्द्रसर्वकारस्य प्रशासनं हिन्दीभाषया आङ्गलभाषया च भवति। हिन्दीभाषारहितेषु राज्येषु केन्द्रसर्वकारस्य नीतीः, नियमान्, कार्यक्रमांश्च प्रसारयितुं, विभिन्नानि कार्याणि साधयितुञ्च तत्तद्भाषाभिः तेषामनुवादः सम्पादनीयः। तत्रापि अनुवादस्य प्राधान्यमङ्गीक्रियते।

(9) जनप्रियाणि, लोकोत्तराणि, पुरस्कृतानि च चलचित्राणि विश्वस्य सर्वाभिः भाषाभिः अनूद्य प्रसार्यन्ते। अस्मिन् कार्ये अनुवादस्य महत्त्वपूर्णं स्थानं स्वीक्रियते।

(10) केचित् भाषाविज्ञानिनः सङ्गणकविशेषज्ञाश्च सम्भूय आङ्गलभाषातः संस्कृतेन, संस्कृतात् आङ्गलभाषया च, भारतीयभाषाभिः परस्परञ्च विषयाणामनुवादाय अनुवादप्रणालीनां (Translation Systems) निर्माणं कुर्वन्ति। तत्र अनुवादनिपुणानां संस्कृतज्ञानां महती आवश्यकता वर्तते।

एवमस्मिन् लोके भावानां, विचाराणाञ्च भाषान्तरेण प्रकाशनमेव अनुवाद इति व्यावहारिकोऽयं सङ्कल्पः विश्वसाहोदर्यसम्पादने नितरामुपकरोति।

अनुवादस्य विभिन्नाः प्रकाराः—

अनुवादशब्दार्थस्य विचारेण ज्ञायते यत् सिद्धानां विषयाणां कयाचित् भाषया प्रतिपादितानां, तत्समानया सरलया भाषया, तद्भिन्नया भाषया वा प्रतिपादनमनुवाद

इति। उपलभ्यमानस्य अनुवादसाहित्यस्य स्थालीपुलाकन्यायेन परिशीलनेन विभिन्नाः अनुवादप्रकाराः दृष्टिपथमायान्ति। तेषां विवेचनमत्र संक्षेपतः क्रियते।

1. शब्दानुवादः—

मूलग्रन्थस्य यथायथं भाषान्तरीकरणं शब्दानुवादस्य प्रधानमुद्देश्यं भवति। कोशानां, व्याकरणनियमानाञ्च उपयोगेन प्रतिपदं पदार्थस्य उपस्थापनमत्र क्रियते। अनुवादकः स्वकीयान् भावानत्र न योजयति, न वा मूलग्रन्थं व्याचिख्यासति। एतादृशमनुवादं केचित् 'मक्षिकास्थाने मक्षिका' इति निन्दन्ति। परन्तु निष्पक्षपातं, यथार्थञ्च एतादृशमनुवादं कर्तुं केचिदेव समर्थाः स्युः। अत्र शब्दानुवादस्य एकमुदाहरणं प्रस्तूयते—

"निहत्य धार्तराष्ट्रान् नः का प्रीतिः स्याज्जनार्दन।
पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः॥" श्रीमद्भगवद्गीता- 1.36

जनार्दन! = हे कृष्ण! धार्तराष्ट्रान् = धृतराष्ट्र के पुत्रों को, निहत्य = मार कर, नः = हम लोगों को, का प्रीतिः स्यात् = क्या प्रसन्नता होगी? एतान् आततायिनः = इन आततायियों को, हत्वा = मारने से, अस्मान् = हमें, पापमेव = पाप ही, आश्रयेत् = लगेगा।

एतादृशे शब्दानुवादे उचितशब्दानामलाभे क्लेशो भवति। मूलग्रन्थकारस्य आशयाः कुत्रचित् अस्पष्टा एव अवशिष्यन्ते। सूक्ष्माणां गभीराणां च विषयाणां शब्दानुवादः नातीव श्लाघ्यो भवति। तथापि सरलानां सामान्यविषयाणां, कथानाञ्च शब्दानुवादेनापि कार्यं सिध्यति।

2. अर्थानुवादः—

वेदानां, शास्त्रग्रन्थानां, काव्यानाञ्च शब्दानुवादेन पाठकानां सन्तोषो न भवति। अतः अर्थानुवादस्य आवश्यकता अनुभूयते। तत्र अनुवादकः मूलग्रन्थस्य आशयं स्पष्टीकर्तुं किञ्चित् व्याख्यां करोति। अयमेव अर्थानुवाद इत्यभिधीयते।

प्रत्येकं भाषाणां शैली भिन्ना भवति। केचन विशिष्टाः शब्दाः भाषासु भवन्ति। तेषामन्यत्र विवर्तनं दुष्करं भवति। यथा—देवानां प्रियः = मूर्खः, वैयाकरणखसूचिः = व्याकरणानभिज्ञः, तिष्ठद्गुः = गोदोहन - कालः इत्यादयः। अनेके शब्दाः, पदबन्धाः, आभाणकानि, न्यायाश्च भवन्ति, येषां भाषान्तरे प्रतिपादनाय समानाः शब्दाः न भवन्ति। तत्र अर्थानुवाद एवाश्रीयते। यथा—

'यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।

इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता॥'   श्रीमद्भगवद्गीता–2.58

शब्दानुवादः — जिस तरह कछुआ अपने अंगों को सब ओर से समेट लेता है, ऐसे ही जिस काल में यह (योगी) इन्द्रियों के विषयों से इन्द्रियों को सब प्रकार से हटा लेता है, तब उसकी बुद्धि स्थिर हो जाती है।

अर्थानुवादः—आत्मा हमेशा स्थिर रहती है, और शरीर निरन्तर परिवर्तनशील होता है। इन दोनों के स्वभाव में कोई अन्तर नहीं पड़ता। परन्तु जब आत्मा शरीर के साथ मैं–मेरे का सम्बन्ध मान लेती है, तब बुद्धि में शरीर और संसार का असर पड़ने से अन्तर पड़ने लगता है। जैसे कछुआ अपने अंगों को बाहर से हटाकर अपने शरीर में समेट लेता है वैसे ही योगी योगाभ्यास से अपनी इन्द्रियों को विषयों से हटाकर बुद्धि में समेट लेता है। तब उसकी बुद्धि स्थिर होकर स्वयं अपने आप में प्रतिष्ठित हो जाती है।

एवमर्थानुवादः शब्दानुवादात् विशिष्यते। परन्तु अर्थानुवादोऽपि सर्वथा श्लाघ्यो न भवति। अनेकेषां विचाराणां, भावानां, रसानाञ्च प्रतिपादनम् अर्थानुवादेऽपि यथोचितं न सम्भवति। तथापि सरलया भाषया मूलग्रन्थस्य आशयस्य ज्ञानाय अर्थानुवादः उपकारको भवति।

3. भावानुवादः—

मूलग्रन्थकर्तुः मुख्योद्देश्यं ज्ञात्वा अनुवादकः स्वतन्त्रः सन् शब्दार्थौ गौणीकृत्य भावानामनुवादं स्वेच्छया करोति। अनुवादकः भावानुवादे पात्राणामुदात्ततां संरक्षितुं, घटनानां वर्णनं रसानुकूलं विधातुं, देशकालसमाजप्रयोजनानुसारं कथाविषयमपि परिवर्तयति। अतः वस्त्वलङ्कारादीनां यथेष्टं परिवर्तनेन अनुवादकः रससम्पुष्टं भावानुवादं सम्पादयति। अयमनुवादग्रन्थः स्वतन्त्रग्रन्थ इव लोके आद्रियते। कदाचित् मूलग्रन्थादपि प्रथितो भवति।

यथा तुलसीदासस्य रामचरितमानसम् आदिकाव्यात् वाल्मीकेः रामायणादपि जनमानसे प्रतिष्ठितम् अभूत्। वाल्मीकेः रामायणे कैकेयी दास्याः मन्थरायाः प्रेरणया दशरथं वरमयाचत रामस्य वनवासं, भरतस्य राज्याभिषेकञ्च। परन्तु रामचरितमानसे सरस्वती कैकेय्याः रसनां प्रविष्टा तथा वाचयति देवकार्यं सम्पादयितुम्।

भारते अनेकाभिः प्रादेशिकभाषाभिः विभिन्नेषु कालेषु रचितानि अनेकानि

रामायणानि उपलभ्यन्ते। एवं महाभारतस्यापि भावानुवादाः सन्त्यनेके। श्रीमद्भागवतस्य तेलुगुभाषानुवादः पोतनमहाकविविरचितः मूलभागवतादपि रसवत्तरः आन्ध्रलोके महीयते।

यद्यपि भावानुवादः जनानां मनोरञ्जको भवति, तथापि तत्र मूलग्रन्थस्य परिवर्तनेन यथार्थता, प्रामाणिकता च न भवति।

4. मर्मानुवादः—

व्यासरचितं महाभारतं लक्षश्लोकात्मकं वर्तते। वाल्मीकिरामायणं चतुर्विंशतिसहस्रश्लोकपरिमितमस्ति। एवमेव वेदाः पुराणानि, काव्यानि, शास्त्रग्रन्थाश्च विशालकायाः सन्ति। कार्यान्तरव्यग्राः जनाः स्वभाषया अनूदितानपि एतान् ग्रन्थान् समयाभावात् पठितुं न शक्नुवन्ति। अतः बालकानां कृते, कार्यान्तरव्यासक्तानाञ्च कृते मूलग्रन्थस्य मुख्यपात्राणां प्रमुखघटनानाञ्च सङ्ग्रहेण संक्षिप्तानुवादः प्रस्तूयते कैश्चित् अनुवादकुशलैः पण्डितैः। अयमेव मर्मानुवाद इत्यभिधीयते।

प्राचीनकालेऽपि कालिदासादिभिः महाकविभिः रघुवंशादिकाव्यनिर्माणे मर्मानुवाद एवाश्रितः। भोजस्य चम्पूरामायणमप्युदाहरणं भवति। आधुनिककाले प्रादेशिकभाषाभिः अनूदिताः सरलाः संक्षिप्ताः बालानामप्याकर्षकाः कथाग्रन्थाः बहवः उपलभ्यन्ते।

5. छायानुवादः—

अनुवादः मूलग्रन्थं त्रिधा अनुकरोति। क्वचित् अनुकृतिः मूलग्रन्थस्य प्रतिबिम्बवत् सर्वथा सादृश्यं भजते। कुत्रचित् आलेख्याकृतिवत् कृत्रिमं सादृश्यं भजते। अन्यत्र अनुकृतिः तुल्यशरीरिवत् भासते। एवं स्वतन्त्ररचनास्वपि सादृश्यं भवत्येव।

छायाशब्दस्य अर्थाः अमरकोशे निर्दिष्टास्तावत् 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इति। छायाशब्दस्य कान्तिः = शोभा, प्रतिबिम्बम्, अनातपः = वृक्षस्य छाया इत्येतेऽर्थाः अत्र युज्यन्ते।

ध्वन्यालोके चतुर्थे उद्द्योते आनन्दवर्धनः भाषाभेदेन काव्यानामानन्त्यं प्रतिपादयति। यथा—'भणितिश्च स्वभाषाभेदेन व्यवस्थिता सती प्रतिनियतभाषा-गोचरार्थवैचित्र्यनिबन्धनं पुनरपरं काव्यार्थानामानन्त्यमापादयति' इति।

अनन्तभेदेषु काव्यार्थेषु भाषाभेदेन प्राप्तेष्वपि सादृश्यं त्रिधा सम्भवतीति

ध्वनिकारो निरूपयति तत्रैव। यथा—"संवादो ह्यन्यसादृश्यं यत् पुनः प्रतिबिम्बवत्। आलेख्याकारवत् तुल्यदेहिवच्च शरीरिणाम्॥" (4-12) इति। स एव च व्याख्याति—"तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम्। तृतीयन्तु प्रसिद्धात्म नान्यसाम्यं त्यजेत् कविः॥" (4-13) तत्र पूर्वं प्रतिबिम्बकल्पं काव्यवस्तु परिहर्तव्यं सुमतिना। यतः तदनन्यात्म = तात्त्विकशरीरशून्यम्। तदनन्तरम् आलेख्यप्रख्यम् = अन्यसाम्यं शरीरान्तरयुक्तमपि तुच्छात्मत्वेन त्यक्तव्यम्। तृतीयन्तु विभिन्नकमनीयशरीरसद्भावे सति ससंवादमपि काव्यवस्तु न त्यक्तव्यं कविना। न हि शरीरी शरीरिणान्येन सदृशोऽप्येक एवेति शक्यते वक्तुम् इति। ध्वनिकाव्यदृशा प्रतिपादितमिदं सादृश्यम् भाषान्तरेण प्रतिपादितेषु अनुवादग्रन्थेषु समन्वेति।

एवञ्च छायानुवादः मूलग्रन्थस्य प्रतिबिम्बकल्पः शब्दार्थानुवादरूपः, जीवरहितः = रसभावादिरहितश्चेत् रमणीयो न भवति। तथैव चित्रवत् प्रतिकृतिर्भवति चेदपि छायानुवादः कृत्रिममेव सौन्दर्यं वहेत्। मूलग्रन्थतुल्यं कमनीयं शरीरं छायानुवादस्यापि भवति चेत् सर्वोत्तमोऽनुवादः स्यात्। पूर्वं वर्णिताः भेदाः एतेष्वेव अन्तर्भवन्ति।

एवम् अनुवादप्रक्रियाणां वर्गीकरणं सर्वथा निश्चप्रचं न भवति। प्रायः सर्वत्र साङ्कर्यमपि दृश्यते।

अनुवादशिक्षणम्

भारते माध्यमिकस्तरे त्रिभाषासूत्रस्य अनुसरणमपि सर्वेषु राज्येषु समानरूपेण नास्ति। उत्तरभारते हिन्दीभाषिराज्येषु हिन्दी, आङ्गलभाषा, संस्कृतमिति भाषात्रयं पाठ्यते। दक्षिणभारते तमिलनाडुराज्ये तमिल्, आङ्गलभाषा इति भाषाद्वयमेव पाठ्यते। केरलेषु पञ्चमकक्ष्यातः दशमकक्ष्यापर्यन्तं मलयालं, हिन्दी, आङ्गलभाषा इति तिस्रः भाषाः बोध्यन्ते। केषुचित् विद्यालयेषु मातृभाषया साकं सहभाषात्वेन वैकल्पिकरूपेण संस्कृतं पाठ्यते। आन्ध्रप्रदेशेऽपि षष्ठकक्ष्यातः केषुचित् विद्यालयेषु संस्कृतं वैकल्पिकरूपेण, मातृभाषया सह पाठ्यते।

औत्तराहभाषाः संस्कृतात् जाताः, दाक्षिणात्याश्च संस्कृतेन पोषितास्सन्ति। अतः मिथः संवादः स्वाभाविकः। द्वयोः ज्ञानस्य, कौशलानाञ्च द्वैपार्श्विकं स्थानान्तरणं (Bilateral Transfer) भवितुमर्हति।

मातृभाषायाः, संस्कृतस्य च वाक्यानां परस्परं परिवर्तनेन द्वयोः भाषयोः भाव-

ग्रहणं, भावाभिव्यक्तिः, शब्दव्युत्पत्तिः, वाक्यनिर्माणञ्च कथं भवतीति ज्ञायते। अनुवादशिक्षणेन लब्धं कौशलम् अन्यासामप्यधीतानां भाषाणाम् अनुवादे सहायकं स्यात्।

अनुवादशिक्षणस्य उद्देश्यानि—

1. द्वयोः भाषयोः श्रवण-भाषण-वाचन-लेखन-कौशलानां तुलनात्मकं ज्ञानम्।
2. मातृभाषातः संस्कृतेन अनुवादस्य सामर्थ्यम्।
3. संस्कृतात् मातृभाषया अनुवादस्य क्षमता।
4. शब्दार्थभावानां सूक्ष्मज्ञानेन परिवर्तनस्य दक्षता।
5. प्रादेशिकभाषया रचितस्य साहित्यस्य संस्कृतेन अनुवादेन संस्कृतस्य विकासः, आधुनिककार्येषु उपयोगश्च।
6. संस्कृतेन रचितस्य साहित्यस्य मातृभाषया अनुवादेन प्राचीनभारतीयसाहित्यस्य, विज्ञानस्य च प्रचारः, उपयोगश्च।

संस्कृतशिक्षणे अनुवादशिक्षणेन एतानि उद्देश्यानि स्तरानुगुणं साधनीयानि भवन्ति।

I. मौखिकानुवादविधिः

संस्कृताध्यापकः संस्कृतपाठ्यपुस्तकस्य बोधने प्रायः अनुवादविधिमेव आश्रयति। कठिनशब्दानामर्थं मातृभाषया अनुवदति। गद्यं, पद्यं, व्याकरणं वा मातृभाषया विशदयति। सारांशं मातृभाषया वदति।

अस्मिन् सन्दर्भे संस्कृतशिक्षकः अनुवादस्य विषये विशेषश्रद्धां प्रदर्शयेत्। विषयबोधनानन्तरं पाठ्यभागे विद्यमानानां संस्कृतवाक्यानां मातृभाषया स्पष्टैः वाक्यैः मौखिकरूपेण अनुवादं कारयेत्। पठितविषयस्य सारांशं मातृभाषया, सरलसंस्कृतेन च वक्तुं छात्रान् प्रेरयेत्। छात्रैः कृतानां दोषाणां संशोधनेन स्वयम् अनुवादं प्रस्तूयात्।

अधीतानां नूतनसंस्कृतशब्दानां, व्याकरणनियमानाञ्च प्रयोगाय अध्यापकः अभ्यासं कारयेत्। मातृभाषायाः पञ्चषाणि वाक्यानि संस्कृतेन अनुवादाय दद्यात् यत्र अधीतानां शब्दानां, नियमानाञ्च प्रयोगाय अवसरः स्यात्। कक्षाकार्ये, गृहकार्ये च अनुवादस्य अभ्यासेन छात्राणाम् अनुवादकौशलं वर्धेत।

II. चित्रानुवादविधिः

कस्याश्चित् कथायाः, घटनायाः वा चित्राणि प्रदर्शयति संस्कृतशिक्षकः। ततः कथां, घटनां वा मातृभाषया, ततः संस्कृतेन च वक्तुं छात्रान् प्रेरयति। अपेक्षितानि संशोधनानि करोति। ततः परं मातृभाषया, संस्कृतेन च लेखितुं छात्रान् निर्दिशति। वस्तूनां, क्रियाणाञ्च बोधकानि संस्कृतपदानि श्यामफलके लिखति। छात्राः मातृभाषया प्रथमं लिखन्ति। सरलैः, लघुभिः संस्कृतवाक्यैः तस्य अनुवादं कुर्वन्ति। अध्यापकः छात्राणामनुवादं परिशील्य उचितनिर्देशान् बोधयति।

एवं क्रमेणः छात्राः द्वयोरपि भाषयोः विषयप्रतिपादनकौशलं सम्पादयन्ति।

III. लिपिपरिवर्तनविधिः (Transliteration Method)

अद्यत्वे हिन्दीभाषायाः, संस्कृतस्य च लेखनाय देवनागरीलिपिः उपयुज्यते। परन्तु अन्यासां प्रादेशिकभाषाणां लेखनाय विभिन्नाः लिपयः उपयुज्यन्ते। एतेषु प्रदेशेषु पूर्वं संस्कृतस्य लेखनार्थं (मुद्रणेऽपि) आन्ध्र-कन्नड-मलयाल-ग्रन्थ (तमिल) उत्कल-बङ्ग-कश्मीरादिलिपयः उपयुक्ता आसन्। यदि सर्वासां भारतीयभाषाणां काचित् समाना लिपिः स्यात् तर्हि भाषाभेदे सत्यपि विषयस्य वाचनेन सप्ततिः प्रतिशतं ग्रहणं भविष्यति। क्रमशः अभ्यासेन अनुवादं विना अन्यभाषया रचितानां सरलानां ग्रन्थानामध्ययनं सुकरं भविष्यति। भारतस्य राष्ट्रगानं 'जनगणमन', 'वन्दे मातरम्' इत्येतादृशानि गानानि प्रादेशिकभाषासु मुद्रितानि भाषाज्ञानं विनापि जनाः अवगच्छन्ति। सङ्गणकयन्त्रे लिपिपरिवर्तनस्य सौकर्यमस्ति। तथा आङ्ग्लाक्षरेषु केषाञ्चन चिह्नानां संयोजनेन कस्या अपि भाषायाः मुद्रणस्य सौकर्यमप्यस्ति। साङ्केतिकलिपिरियं सङ्गणकयन्त्रे Diacritical Script इति निर्दिश्यते। भारतीयभाषाणां मुद्रणाय देवनागरीलिप्यामपि विभिन्नवर्णसङ्केताः योजिताः सन्ति। जिस्ट (GIST) इत्यादिषु तन्त्रांशेषु (Software) एतादृशं सौकर्यमस्ति।

मातृभाषालिप्या लिखितस्य अनुच्छेदस्य देवनागरीलिप्या परिवर्तनं शिक्षणीयम्। तेन अनुवादस्य पञ्चाशत् प्रतिशतं कार्यं सिद्धं भवति।

तेलुगुभाषया पाणिनेः विषये रचितस्य निबन्धस्य कश्चन परिच्छेदः देवनागरीलिप्या लिखित्वा प्रदर्श्यते। यथा—

पाणिनि संस्कृतवैयाकरणुललोने गाक प्रपञ्चमुनन्दलि सर्वभाषावैयाकरणुललो

अत्युन्नतमगु गौरवार्हस्थानमुनु आक्रमिञ्चियुन्नाडु। ईतडु रचिञ्चिन व्याकरणमुतो पोल्चदगिन व्याकरणमु प्रपञ्चमुनन्दलि प्राचीनभाषलकुगानि, अर्वाचीन-भाषलकु गानि नाटिनुण्डि नेटिवरकु रचिम्पबडलेदनु विषयमु सर्वपण्डितलोकाङ्गीकृतमु। ई वैयाकरणमूर्धन्युडु अनेकग्रन्थमुलन्दु पाणिन, पाणिनि, दाक्षीपुत्र, शालङ्कि, शालातुरीय, आहिक, पाणिनेय, पणिपुत्र अनु एनिमिदि नामधेयमुलतो प्रसिद्धि पोन्दियुन्नाडु। ईतडु सङ्ग्रहकारुडगु व्याडिकि मेनल्लुडु। छन्दश्शास्त्रप्रवक्तयगु पिङ्गलुडु ईतनि तम्मुडु। ईतनि गुरुवु उपवर्षुडनि लोकप्रतीति।

संस्कृतेन अनुवादः—पाणिनिः संस्कृतवैयाकरणेष्वेव न, प्रपञ्चस्थेषु सर्वभाषावैयाकरणेषु अत्युन्नतं गौरवार्हस्थानम् आक्रान्तवान्। अनेन रचितेन व्याकरणेन सदृशं व्याकरणं प्रपञ्चे प्राचीनभाषाणां वा, अर्वाचीनभाषाणां वा तदा आरभ्य अद्यपर्यन्तं न रचितमिति विषयः सर्वपण्डितलोकाङ्गीकृतः। अयं वैयाकरणमूर्धन्यः अनेकग्रन्थेषु पाणिनः, पाणिनिः, दाक्षीपुत्रः, शालङ्किः, शालातुरीयः, आहिकः, पाणिनेयः, पणिपुत्रः इति अष्टभिः नामधेयैः प्रसिद्धिं प्राप्तवान्। अयं सङ्ग्रहकारस्य व्याडेः भागिनेयः। छन्दश्शास्त्र प्रवक्ता पिङ्गलः अस्य अनुजः। अस्य गुरुः उपवर्ष इति लोकप्रतीतिः।

एवं लिपिपरिवर्तनम् अनुवादशिक्षणे छात्रान् उपकरोति। द्वयोः भाषयोः उच्चार्यमाणानां वर्णानां लेखने लिपेः सादृश्यं, वैषम्यञ्च ज्ञायते। तथा समानार्थकशब्दानां प्रत्यभिज्ञानञ्च सम्भवति।

IV. पुनरनुवादविधिः

संस्कृतात् मातृभाषया, मातृभाषायाः संस्कृतेन च अनुवादस्य शिक्षणार्थं शिक्षकः एतं विधिमनुसरेत्। अत्र संस्कृते विद्यमानस्य कस्यचित् परिच्छेदस्य शिक्षकः मातृभाषया अनुवादं कारयति छात्रैः। अन्यस्मिन् सप्ताहे छात्रैः मातृभाषया कृतस्य अनुवादस्य पुनः संस्कृतेन अनुवादं कारयति। ततः परं मूलसंस्कृतपरिच्छेदं प्रस्तूय तुलनां कर्तुं निर्दिशति।

मूलसंस्कृतपरिच्छेदस्य, पुनरनूदितस्य परिच्छेदस्य च तुलनेन छात्राः स्वकीयम् अनुवादसामर्थ्यम् अवगच्छन्ति। अनुवादे जायमानानि शब्दार्थभावपरिवर्तनानि च अवबुध्यन्ते। शिक्षकः समीक्षां कृत्वा उत्तमानुवादं प्रस्तूयात्। अत्रैकमुदाहरणं प्रस्तूयते।

संस्कृतपरिच्छेदः—इन्द्रद्युम्नः कश्चन जनप्रियः उत्कलानां राजा आसीत्। प्रजानां विषये तस्य विशेषप्रीतिः आसीत्। सः सर्वैः राजभिः पूज्यते स्म। तस्य वैभवस्मारकाणि अनेकानि गीतानि श्रूयन्ते स्म। सः कलाभिमानी, पण्डितप्रियः, कलापोषकश्च आसीत्। स एव पुर्यां जगन्नाथस्य सुन्दरं मन्दिरं निर्मापितवान्। समुद्रतीरे नीलाचले स्थितमिदं मन्दिरं द्रष्टुं लक्षशः भक्ताः आगच्छन्ति। भगवतो जगन्नाथस्य दर्शनेन धन्याः भवन्ति।

हिन्दीभाषया अनुवाद—इन्द्रद्युम्न उत्कलदेश का एक जनप्रिय राजा था। अपनी प्रजा के विषय में उसको विशेष प्रेम था। वह सभी राजाओं के द्वारा पूजा जाता था। उसके वैभव को अनेक गीतों द्वारा सुनते थे। वह कलाभिमानी, पण्डितप्रिय, और कलापोषक था। उसी ने ही पुरी में जगन्नाथ का सुन्दर मन्दिर बनवाया। समुद्र के किनारे नीलाचल पर स्थित इस मन्दिर को देखने लाखों में भक्त आते हैं। भगवान जगन्नाथ के दर्शन से धन्य हो जाते हैं।

पुनरनुवादः—इन्द्रद्युम्नः उत्कलदेशस्य एकः जनप्रियः राजा आसीत्। स्वप्रजानां विषये तस्य विशेषप्रेम आसीत्। सर्वे राजानः तस्य पूजां कुर्वन्ति स्म। तस्य वैभवं गीतैः श्रावयन्ति स्म। सः कलाभिमानी, पण्डितप्रियः, कलापोषकश्च आसीत्। सः पुर्यां जगन्नाथस्य सुन्दरं मन्दिरं निर्मापितवान्। समुद्रतीरे नीलाचले एतं मन्दिरं द्रष्टुं लक्षशः भक्ताः आगच्छन्ति। भगवतः जगन्नाथस्य दर्शनेन धन्याः भवन्ति।

V. व्याकरणानुवादविधिः—

आङ्गलेयानां शासनकाले आधुनिकधारायां संस्कृतशिक्षणाय व्याकरणानुवादविधिः आश्रितोऽभवत्। भण्डार्कर्महोदयेन व्याकरणनियमानां शिक्षणेन संस्कृतात् आङ्गलभाषया, आङ्गलभाषायाः संस्कृतेन च अनुवादशिक्षणमेव प्रधानतया उद्दिष्टमस्ति।

ततः परमनेकैः पण्डितैः प्रादेशिकभाषामाध्यमेन व्याकरणानुवादशिक्षणाय अनेके ग्रन्थाः रचिताः। विद्यालयेषु पाठ्यपुस्तकेन साकम् अनुवादशिक्षणाय एतादृशाः ग्रन्थाः पाठ्यक्रमे संयोजिताः संस्कृतशिक्षकैः पाठ्यन्ते विभिन्नस्तरेषु।

चक्रधरहंसमहाशयेन अनुवादचन्द्रिका, कपिलदेवद्विवेदिमहोदयेन रचनानुवादकौमुदी, प्रौढरचनानुवादकौमुदी च हिन्दीमाध्यमेन रचिताः प्रसिद्धाः सन्ति।

आन्ध्रभाषया काशी कृष्णाचार्येण भागत्रयत्वेन रचिता बालबोधिनी इति ग्रन्थः, मलयालभाषया भरतपिषारटिमहोदयेन रचितः कामधेनुः इति ग्रन्थः, ब्रह्मश्री परमेश्वरशास्त्रिणा रचितः व्याकरणलघुबोधिनी इति ग्रन्थश्च तत्र तत्र व्याकरणानुवादबोधनेन संस्कृतशिक्षणाय उपयुज्यन्ते।

एतादृशानां ग्रन्थानामुपयोगेन लघुनिबन्धानां, सरलपद्यानाञ्च अनुवादशिक्षणं विभिन्नस्तरेषु अध्यापकैः क्रियते। अयमेव व्याकरणानुवादविधिरिति उच्यते।

VI. भावानुवादविधिः

मातृभाषया, संस्कृतेन च रचनायाम् अनुवादे च यदा छात्राणां किञ्चित् कौशलं सिध्यति तदा उन्नतस्तरे भावानुवादविधिः प्रयोक्तुं शक्यते।

कस्यचित् निबन्धस्य, पद्यस्य, कथायाः वा आशयं, भावञ्च सम्यक् ज्ञात्वा छात्राः मातृभाषातः संस्कृतेन अनुवादं गद्यरूपेण, पद्यरूपेण वा कर्तुम् अभ्यासं कुर्युः। तथैव संस्कृतात् मातृभाषया अनुवादं कुर्युः। छात्राणां स्तरानुसारं शिक्षकः उचितान् गद्यपद्यादीन् उपस्थापयेत्। स्वयमनुवादं कृत्वा उदाहरणं प्रदर्शयेत्। आवश्यकानां शब्दानां बोधनेन मार्गदर्शनं, साह्यञ्च कुर्यात्।

उदाहरणार्थमत्र हिन्दीपद्यस्य संस्कृतानुवादः प्रदर्श्यते।

एक कौआ प्यासा था
ज़ग में थोड़ा पानी था
कौआ लाया पत्थर
पानी आया ऊपर
कौआ पिया पानी
हो गयी कहानी॥

पिपासितः किल काकः कश्चित्
कलशे चासीत् सलिलं किञ्चित्
काकोऽपातयदश्मनो यदा
उपरिष्टाज्जलमागतं तदा
काकः सलिलं पीत्वा यातः
वृत्तान्तश्च समाप्तो जातः॥

'बिल्ली चली प्रयाग नहाने' इति हिन्दीपद्यस्य संस्कृतानुवादोऽत्र प्रस्तूयते—

'गतो बिडालो गङ्गां स्नातुम्'

लब्धा काचित् तुलसीमाला
स्थापितवान् तां गले बिडालः
देहे भस्म च काषायपटम्
धृत्वा विरागिवेषं कपटम्
पूर्वं विहितं पापं हर्तुम्
गतो बिडालो गङ्गां स्नातुम्॥
सोऽवादीदयि! मूषकाः प्रियाः।
हिंसा बहुधा कृता खलु मया
ज्ञात्वा धर्मं विहाय पापम्
कृतवान् दैवे भक्तिं श्रद्धाम्
विस्मृतवैराः पुण्यं कर्तुम्
चलत मया सह गङ्गां स्नातुम्॥
विचारहीना मूषकमूर्खाः
अनुगतवन्तो बिडालधूर्तम्
मार्गे सेतुं तर्तुमुद्यतान्
मूषकानसौ सुष्ठु भुक्तवान्
न हि विश्वास्याः कदापि धूर्ताः
वञ्चयन्ति ते विश्वस्तान्॥

एवमुच्चस्तरे अनुवादशिक्षणाय शिक्षकः संस्कृतात् मातृभाषया अनूदितान् ग्रन्थान्, मातृभाषायाः संस्कृतेन अनूदितांश्च ग्रन्थान् पठितुं निर्दिशेत्। हरिवंशराय बच्चन् महोदयस्य 'मधुशाला' इति हिन्दी-पद्यग्रन्थः डॉ. जगन्नाथपाठकमहोदयेन 'कापिशायनी' इति नाम्ना संस्कृतेन अनूदिता वर्तते। एवमनेके सरलाः प्रसिद्धाश्च अनुवादग्रन्थाः छात्रैः पठ्यन्ते चेत् अनुवादकौशलं वर्धते।

पाठयोजना

अनुवादपाठः (चित्रानुवादविधिः)

कक्ष्या — सप्तमी।

छात्राणां मध्यायुः — 12 +

विषयः — संस्कृतम्। उपविषयः—अनुवादः।

पाठ्यविषयः — सरोवरस्य वर्णनम्।

1. सामान्योद्देश्यानि—

1. मातृभाषया वाक्यानां रचना।
2. तेषां वाक्यानां संस्कृतेन अनुवादः।
3. नूतनशब्दानां प्रयोगस्य अभ्यासः।
4. संस्कृतेन वाक्यरचनायाः कौशलम्।
5. हिन्दीसंस्कृतभाषयोः भावाभिव्यक्तौ व्यत्यासस्य ज्ञानम्।

2. विशिष्टोद्देश्यानि—

1. चित्रे दृश्यमानानां वस्तूनां घटनानाञ्च मातृभाषया वर्णनम्।
2. तेषां वस्तूनां, क्रियाणाञ्च संस्कृतेन अनुवादाय अपेक्षितानां शब्दानां ज्ञानम्।
3. संस्कृतेन अनुवादस्य अभ्यासः।
4. हिन्दीसंस्कृताभ्यां विषयस्य समानतया प्रतिपादनम्।
5. वाक्यरचनाभेदस्य ज्ञानन्।

3. बोधनोपकरणानि—

सामान्यानि — श्यामफलकं, सुधाखण्डः, मार्जनी, सूचिकादण्डः।

विशिष्टानि — सूर्योदयसमये सरोवरस्य चित्रम्।

4. पूर्वज्ञानम्—

छात्राः मातृभाषया निबन्धस्य रचनां जानन्ति। संस्कृतेन वाक्यानि रचयितुं जानन्ति। सरलवाक्यानामनुवादं जानन्ति।

सोपानानि Steps	अध्यापनबिन्दवः। Teaching Points	अधिगमविशेषाः Learning outcome	अध्यापकच्छात्रक्रियाः। Teacher - pupil activities	मूल्याङ्कनम् Evaluation
1. प्रस्तावना	चित्रे स्थितानां वस्तूनां ज्ञानम्।	चित्रमाध्यमेन अनुवादाय छात्राणां प्रेरणम्	अध्यापकः – छात्राः! एतत् चित्रं पश्यन्तु। अत्र कानि कानि वस्तूनि दृश्यन्ते तानि हिन्दीभाषया वदन्तु। छात्रः 1. सूरज, सरोवर, वटवृक्ष छात्रः 2. पानी, कमल, मछली छात्रः 3. बगला, पुरुष, औरत, घड़े	
2. उद्देश्यकथनम्	अनुवादकौशलम्	मातृभाषया सरोवरस्य वर्णनम्	अध्यापकः – अस्य चित्रस्य आधारेण हिन्दीभाषया कानिचित् वाक्यानि लिखामः। ततः तेषां संस्कृतेन अनुवादं करिष्यामः। छात्राणां साह्येन अध्यापकः श्यामफलके लिखति। **सरोवर का वर्णन**	
3. प्रस्तुतीकरणम्	मातृभाषया वाक्यानां रचना		इस चित्र में एक सरोवर है। पूरब में सूरज उग रहा है। सरोवर में कमल के फूल खिल रहे हैं। पानी में मछलियाँ उछल रही हैं। सरोवर के किनारे पर बगलाएँ उनको देख रहे हैं। बगल में एक महान वटवृक्ष है। उस पर अनेक तरह की चिड़ियाँ घोंसले बना कर वास कर रही हैं। उसकी छाया पानी में	

			दीखती है। कुछ लोग पानी में नहा रहे हैं। गाँव की औरतें घड़ों में पानी लेकर जा रहीं हैं।	
काठिन्य-निवारणम्	वस्तूनां क्रियाणाञ्च संस्कृतेन कथनम् वर्तमानकाले लटः प्रयोगस्य बोधनम्	कठिनशब्दानां संस्कृतेन अनुवादः	पूरब में = पूर्वस्यां दिशि, खिल रहे हैं = विकसन्ति, चिडियाँ = पक्षिणः, घोंसले = नीडानि, छाया = प्रतिबिम्बम्, दीखता है = दृश्यते, नहा रहे हैं = स्नान्ति।	सूरज = सूर्यः बगला = बलाका घड़ा = घटः कुछ लोग = केचित् जनाः
संस्कृतानुवादः	कर्तरि, कर्मणि च वाक्यानां रचना	संस्कृतेन वाक्यानुवादः	अध्यापकः छात्रान् प्रेरयति। छात्राः प्रथमं मौखिकरूपेण एकैकं वाक्यं संस्कृतेन अनुवदन्ति। अध्यापकस्य संशोधनानन्तरं पुस्तके लिखन्ति। **सरोवरस्य वर्णनम्** अस्मिन् चित्रे एकः सरोवरः अस्ति। पूर्वस्यां दिशि सूर्यः उदयते। सरोवरे कमलानि विकसन्ति। जले मत्स्याः कूर्दन्ति। सरोवरस्य तीरे बलाकाः तान् पश्यन्ति। पार्श्वे एकः महान् वटवृक्षः अस्ति। तस्मिन् अनेकविधाः पक्षिणः नीडानि निर्माय वसन्ति। तस्य छाया जले दृश्यते। केचन जनाः जले स्नान्ति। ग्रामस्य महिलाः घटैः जलं नयन्ति।	

अनुवाद- विश्लेषणम्	कर्तरि, भावे, कर्मणि च प्रयोगस्य ज्ञानम्	वाक्यस्वरूपविश्लेषणम्	पूर्वस्यां दिशि सूर्यः उदयते। कर्तरि प्रयोगः कर्ता अकर्मकक्रिया पूर्वस्यां दिशि सूर्येण उदय्यते। – भावे प्रयोगः कर्ता भावे क्रिया सरोवरे कमलानि विकसन्ति। – कर्तरि प्रयोगः सरोवरे कमलैः विकस्यते। – भावे प्रयोगः महिलाः घटैः जलं नयन्ति। – कर्तरि प्रयोग कर्तृपदं कर्मपदं सकर्मकक्रिया महिलाभिः घटैः जलं नीयते। – कर्मणि प्रयोगः बलाकाः मत्स्यान् पश्यन्ति। – कर्तरि प्रयोगः बलाकैः मत्स्याः दृश्यन्ते। – कर्मणि प्रयोगः	क्रियापदम् (1) अकर्मकम् **कर्तरि भावे** अस्ति भूयते विकसति विकस्यते स्नाति स्नायते वसति उष्यते (2) सकर्मकम् **कर्तरि कर्मणि** पश्यति दृश्यते नयति नीयते लिखति लिख्यते
4. पुनरावृत्तिः	अभ्यासः	संशयनिवारणेन स्मरणशक्तेः विकासः	वट वृक्ष पर चिडियाँ वास कर रही हैं। वटवृक्षे पक्षिणः वसन्ति। – कर्तरि प्रयोगः वटवृक्षे पक्षिभिः उष्यते। – भावे प्रयोगः वटवृक्ष पर चिडियों से वास किया जा रहा है।	

			चिडियाँ घोंसले बनाती हैं। पक्षिण: नीडानि निर्मान्ति। - कर्तरि प्रयोग: पक्षिभि: नीडानि निर्मीयन्ते। - कर्मणि प्रयोग: चिडियाओं द्वारा घोंसले बनाये जाते हैं।	
5. कक्षाकार्यम्	शब्दानुवाद:	मौखिकानुवादस्य अभ्यास: गृहकार्यस्य भूमिकानिर्माणम्	सुबह = प्रात:, बाला: प्रात: विद्यालयं गच्छन्ति। रोटी = रोटिका, माता रोटिकां ददाति। किसान = कृषीवल:, कृषीवल: क्षेत्रं गच्छति।	
गृहकार्यम्	मातृभाषया वाक्यानि लिखित्वा संस्कृतेन अनुवाद:	अनुवादकौशलस्य वर्धनम्	मातृभाषया प्रात:कालस्य विषये दश वाक्यानि लिखन्तु। तानि वाक्यानि संस्कृतेन अनुवदन्तु।	

सप्तदशोऽध्यायः

दृश्यश्रव्यसाधनानि

प्राचीनकालादेव शिक्षकस्यैषा कामना आसीद् यदध्यापनं प्रभावपूर्णं स्यादिति। एतच्च मनोवैज्ञानिकं तथ्यं भवति यदस्माकमनुभूतिः स्थूलतायाः सूक्ष्मतां प्रति गच्छति। अतः सूक्ष्मानुभूतेरुत्पादनाय स्थूलानुभूतेः उपयोजनमावश्यकम्। शिक्षातत्वज्ञः पेस्टालाजी शिक्षायां पदार्थानां प्रत्यक्षानुभवं प्रबलं मन्यते। फ्रोबेलः, माण्टसरी च नवीनशिक्षणपद्धतिषु दृश्यश्रव्यसाधनानाम् उपयोगस्य सर्वाधिकं महत्त्वपूर्णं स्थानं प्रददतुः। पोलेण्ड् देशस्य शिक्षाशास्त्रज्ञः कोमेनियसः कथयति यत् 'समस्तस्याप्यधिगमस्य आधारः इन्द्रियाणां द्वारा साक्षात्कारः। इन्द्रियाणां द्वारा मूर्तरूपस्य ग्रहणेन अधिगमः सुगमो भवति' इति। दृश्यश्रव्यसाधनानां प्रयोगेण अध्ययनं प्रभावशालि, रोचकञ्च भवति। निम्नोक्तकारणैः दृश्यश्रव्यसाधनानि महत्त्वं भजन्ते।

1. अध्ययनसमये श्रवणेन्द्रियस्य, दर्शनेन्द्रियस्य च आकर्षणम्।
2. पाठ्यवस्तु सार्थकं, सुग्रहञ्च कर्तव्यम्।
3. पाठ्यविषयः रोचकः, आकर्षणीयश्च स्यात्।
4. लब्धं ज्ञानं परिपुष्टं स्यात्।
5. अधीतं स्थिरं स्यात्।
6. निष्क्रियता न स्यात्, छात्राः भाषाध्ययने सक्रियाः स्युः।
7. अनुभवस्य सीमा विस्तृता स्यात्।
8. शिक्षणं प्रभावपूर्णं स्यात्।
9. भाषायाः व्यावहारिकप्रयोगदर्शनेन छात्राः अनुकरणे तत्पराः स्युः।

उपर्युक्तकारणैः कस्यापि विषयस्य शिक्षणे दृश्यश्रव्यसाधनानां महत्त्वं स्पष्टीभवति। अतः संस्कृतशिक्षणेऽपि दृश्यश्रव्यसाधनानां प्रयोगः कर्तव्यः। एतेषां

साधनानां प्रयोगेण संस्कृतशिक्षणं रोचकं भवति। छात्राः संस्कृतं प्रति अत्यधिकमाकृष्टाः भवन्ति।

संस्कृतशिक्षणे उपयुक्तानि दृश्यश्रव्यसाधनानि

1. दृश्यसाधनानि—

वर्णानां, पदार्थानाञ्च स्वरूपं प्रदर्शयितुम् उपयुज्यमानानि साधनानि दृश्यसाधनानि भवन्ति। श्यामपट्टः, चित्राणि, रेखाचित्राणि, मानचित्राणि, प्रतिकृतयः, प्रदर्शिनी (Projector) इत्यादीनि दृश्यसाधनानि सन्ति।

2. श्रव्यसाधनानि—

विभिन्नान् ध्वनीन्, शब्दान् च श्रोतुमुपयुक्तानि साधनानि श्रव्यसाधनानि भवन्ति। रेडियो, ग्रामोफोन्, टेप्रिकार्डर् इत्यादीनि श्रव्यसाधनानि सन्ति।

3. दृश्यश्रव्यसाधनानि—

द्रष्टुं, श्रोतुञ्च उपयुक्तानि साधनानि दृश्यश्रव्यसाधनानि भवन्ति। यथा— नाटकम्, चलचित्राणि, दूरदर्शनम् (Television)।

संस्कृतशिक्षणे दृश्यश्रव्यसाधनानां प्रयोगः

1. श्यामपट्टः—

श्यामपट्टः भित्तौ निर्मितः श्यामवर्णः विद्यालयेषु अधिकतया उपलभ्यते। अयमेव श्यामफलकं, लेखनफलकमित्यप्युच्यते। श्यामपट्टः हरितवर्णः, पीतवर्णः, नीलवर्णोऽपि भवितुमर्हति। दारुनिर्मितः श्यामपट्टः स्थानपरिवर्तनयोग्योऽपि भवति। आकुञ्चनश्यामपटोऽपि लेखनार्थमुपयुज्यते।

संस्कृतशिक्षणे श्यामपट्टस्य महत्त्वमन्यसाधनेभ्योऽधिकं भवति। यतः श्यामपट्टकार्यं विना संस्कृतशिक्षणं सफलं न स्यात्। श्यामपट्टस्याभावे छात्राणां समक्षं विषयस्य स्पष्टीकरणं कठिनं भवति। अध्यापने प्रत्येकं सोपानेषु श्यामपट्टस्य प्रयोगः आवश्यको भवति। संस्कृतशिक्षणे अक्षरविन्यासस्य व्याख्या, कठिनशब्दानां व्याख्या, सन्धिच्छेदः, समासविग्रहः, व्याकरणनियमानां व्याख्या, पाठ्यविषयस्य स्पष्टीकरणं, निबन्धस्य रूपरेखा, कविताशिक्षणे समानार्थकपद्येन तुलना, सारांशलेखनम् इत्यादीनां विषयाणां बोधनाय श्यामपट्टस्य साह्यमनिवार्यं भवति। श्यामपट्टे लेखनाय श्वेतवर्णस्य. विभिन्नवर्णानाञ्च सुधाखण्डानामुपयोगः आवश्यकतानुसारं कर्तव्यः।

चित्राणि, रेखाचित्राणि, मानचित्राणि च श्यामपट्टे विरच्य अध्यापकः शिक्षणं फलवत्तरं कर्तुमर्हति। अध्यापकस्य लेखनं स्पष्टं, शुद्धं, सुन्दरञ्च स्यात्।

प्रायः संस्कृताध्यापकाः श्यामपट्टे लेखनस्य उपेक्षां कुर्वन्ति। अतः छात्राणां संस्कृताध्ययने काठिन्यं भवति। बहुवारं पाठनेऽपि विषयः अस्पष्टो भवति। अतः श्यामपट्टस्य उपयोगः श्रद्धया कर्तव्यः। आवश्यकतानुसारं छात्राणामपि श्यामपट्टे लेखनाय अवसरो दातव्यः।

2. चित्राणि—

अध्यापनं रुचिकरम्, आकर्षकञ्च विधातुं चित्राणां प्रयोगः क्रियते। रेखाणां, वर्णानाञ्च संयोजनेन वस्तूनां, भावानां तथ्यानाञ्च अभिव्यञ्जकानि चित्राणि भवन्ति। चित्रेषु विषयाणां चित्रणं भवति। कलाप्रदर्शनं, मनोरञ्जनं, भावाभिव्यक्तिः, सौन्दर्याभिव्यक्तिः, विषयवर्णनं, सूचना, शिक्षा, धार्मिकभावना, अध्यात्मभावना इत्यादीनि चित्रकलायाः विभिन्नानि उद्देश्यानि भवन्ति।

संस्कृतशिक्षणे प्रस्तावनायां, विषयबोधने च प्रधानतया चित्राणां प्रयोगः कर्तुं शक्यते। महापुरुषाणां, नेतॄणां, पशुपक्षिणां, वस्तूनां, प्राकृतिकदृश्यानाम्, ऐतिहासिक-भावनानाञ्च चित्राणि उपयुक्तानि स्युः। प्रारम्भिककक्ष्यासु बालानां शब्दभण्डारस्य वर्धनाय चित्राणां प्रयोगोऽतीव प्रयोजनकरो भवति। मूल्यवत्, कलाकृतिश्च चित्रं स्यादिति नास्ति निर्बन्धः। अध्यापकेन स्वयं निर्मितं साधारणं चित्रमपि पर्याप्तं भवति। चित्रं स्पष्टं, विषयानुकूलञ्च स्यात्। शिक्षणप्रक्रियायां सहायकं स्यात्। अनावश्यकानि, अश्लीलानि च चित्राणि न प्रदर्शनीयानि। चित्राणां प्रयोगः उचितरूपेण कर्तव्यः।

3. रेखाचित्राणि (Charts)—

रेखाचित्रेषु तथ्यानां, चित्राणाञ्च समन्वयो भवति। संस्कृतशिक्षणे मौखिककार्यस्य, पाठ्यविषयस्य, व्याकरणकार्यस्य च बोधनाय एतेषामुपयोगः कर्तुं शक्यते। कथाशिक्षणे, रचनाशिक्षणे च एषामुपयोगो भवति। यदि मुद्रितानि रेखाचित्राणि आपणे नोपलभ्यन्ते तर्हि संस्कृताध्यापकेन स्वयं निर्मेयाणि भवेयुः। रेखाचित्राणि विषयानुसारं, स्तरानुरूपञ्च भवेयुः।

4. मानचित्राणि (Maps)—

मानचित्राणामत्यन्तावश्यकता इतिहासे, भूगोले च भवति। किन्तु संस्कृतेऽपि

प्रसङ्गवशात् ऐतिहासिकान् भौगोलिकान् च विषयान् स्पष्टीकर्तुं मानचित्राणि उपयुक्तानि स्युः। मानचित्राणां व्याख्याने यदि संस्कृताध्यापकः समर्थो भवति, तदा तेषां प्रयोगो लाभदायकः स्यात्।

5. प्रक्षेपकयन्त्रम् (Projector)—

विज्ञानस्यायमाविष्कारः शिक्षणस्य विभिन्नक्षेत्रेषु, विशेषतः विज्ञानशिक्षणे प्रयुज्यते। स्थिरचित्राणि (Slides), चलचित्राणि च (Film Strips) अनेन यवनिकायां प्रदर्शयितुं शक्यन्ते। संस्कृतपाठ्यविषयसम्बद्धानि स्थिरचित्राणि, ह्रस्वचलचित्राणि च यदि शैक्षिकसंस्थाभिः निर्मीयन्ते तर्हि संस्कृताध्यापकेन अस्य प्रयोगः कर्तुं शक्यते। संस्कृतशिक्षणे प्राकृतिकदृश्यानि, यात्रावर्णनम्, उत्सवाश्च प्रदर्शयितुं शक्यन्ते। भाषायाः, साहित्यस्य च शिक्षणे एतदत्यन्तमुपकारकं भवति।

6. प्रतिकृतयः (Models)—

बृहदाकारस्य प्राकृतिकवस्तुनः केनचिद् द्रव्येण निर्मितं, ह्रस्वाकारकं कृत्रिमं वस्तु प्रतिकृतिर्भवति। पाठ्यविषयस्य बोधने प्रतिकृतीनां प्रयोगः चित्राणामपेक्षया अधिकः प्रभावोत्पादको भवति, यतः प्रतिकृतयः यथार्थतायाः सामीप्यं भजन्ते। प्रतिकृतीनां प्रयोगे मितव्ययता, दर्शनीयता, स्पष्टता, आकर्षकता इत्यादिविषयाः श्रद्धेयाः भवन्ति। यदि कस्यचित् पाठ्यविषयस्य बोधनाय प्राकृतिकवस्तुनः प्रदर्शनमशक्यं स्यात्, तदा प्रतिकृतेः प्रयोगः कर्तव्यः। नागार्जुनसागरबन्धः इत्यादिपरियोजनाः, कर्मागाराः, भवनानि, यन्त्राणि, अस्त्रशस्त्रादीनि, जन्तवः, फलपुष्पवृक्षादयः–इत्येतादृशानां प्रतिकृतयः उपयोक्तुं शक्यन्ते। प्रतिकृतिनिर्माणे यदि छात्राणामपि भागः स्यात् तर्हि तेषां ज्ञानं वर्धेत।

7. आकाशवाणी (Radio)—

विभिन्नविषयाणां शिक्षणाय आकाशवाण्याः उपयोगः क्रियते। यदि सर्वेषु विद्यालयेषु एतत्साधनं सुलभं भवति, तर्हि भाषाविषयकान् कार्यक्रमान् पूर्वमेव ज्ञात्वा अध्यापकः भाषाशिक्षणे एतस्योपयोगं कर्तुं शक्नुयात्। भाषाविशेषज्ञाः विद्वांसः प्रत्येकं विद्यालयान् गन्तुं न प्रभवन्ति। अतः तेषां प्रभाषणानि आकाशवाण्या प्रसार्यन्ते। संस्कृतवार्तानां, साहित्यिककार्यक्रमाणां, संस्कृतपाठानाञ्च आकाशवाण्या प्रसारितानां श्रवणस्य प्रवृत्तिः अध्यापकेन छात्रेषु उत्पादनीया। तथैव आकाशवाण्या संस्कृतच्छात्राणां कृते विशेषकार्यक्रमाः प्रसारणीयाः। एवञ्चेत् संस्कृतशिक्षणे आकाशवाण्याः उपयोगः सार्थकः स्यात्।

8. ग्रामोफोन्—

श्रव्योपकरणेषु ग्रामोफोनस्य स्वकीयं महत्त्वमस्ति। केनचिद् द्रव्येण निर्मिते चक्रे रेखारूपेण ध्वनीनां मुद्रणं क्रियते। ततः लिङ्ग्वाफोन् यन्त्रस्य साह्येन मुद्रितं सर्वं श्रोतुं शक्यते। कवितावाचने, वार्तालापे, संवादे, भाषणशिक्षणे चास्य उपयोगः कर्तुं शक्यते। सस्वरवाचनं, शब्दोच्चारणम्, आदर्शवाचनमित्यादीनाम् अभ्यासाय ग्रामोफोन् उपकारकं भवति। संस्कृतपद्यानि, गानानि, विदुषां व्याख्यानानि च अस्य यन्त्रस्य द्वारा श्रोतुं शक्यन्ते। अत्र मुद्रितं स्थिरं भवति।

9. टेप् रिकार्डर्—

विद्युच्छक्त्या, बेट्टरीद्वारा वा यन्त्रमेतत् प्रवर्तते। टेप्मध्ये पूर्वं मुद्रितानां ध्वनीनां प्रसारणं करोति। ग्रामोफोन् रिकार्ड् स्थायी भवति। किन्तु टेप् अस्थायी भवति। टेप्मध्ये पूर्वमुद्रितानां ध्वनीनां सम्मार्जनेन नूतनध्वनयः मुद्रयितुं शक्यन्ते। शुद्धोच्चारणसम्पादनाय समीचीनं साधनमेतत्। बालकः अस्य साह्येन स्वीयमुच्चारणं स्वयं श्रुत्वा अशुद्धीः निवारयितुं प्रभवति। पाठस्य पुनरावृत्तौ, स्मृत्युत्पादने च एतत्सहायकं भवति। शिक्षणे अस्य योगदानं महत्त्वपूर्णमस्ति। सामान्यजनानां कृते साधनमिदं दुर्लभं वर्तते। दरिद्राः अस्य उपयोगे असमर्थाः सन्ति।

10. नाटकम्—

संस्कृतशिक्षणे नाटकस्यापि महत्त्वमस्ति। मुद्राराक्षसम्, अभिज्ञानशाकुन्तलम् इत्यादीनि अनेकानि नाटकानि रङ्गमञ्चे अभिनेतुं शक्यन्ते। वाचिकः, आङ्गिकः, सात्विकः, आहार्यश्चेति चतुर्विधोऽभिनयो वर्तते। अभिनयस्य दर्शनेन, आरोहावरोहपूर्वकभाषणस्य श्रवणेन च छात्राः भाषायाः प्रयोगं जानन्ति। स्वयमभिनयनेन बालकाः स्वाभाविकगत्या संस्कृतभाषणमभ्यस्यन्ति। ते मौखिकाभिव्यक्तौ, व्यावहारिकप्रयोगे च कुशलाः भविष्यन्ति।

11. टेलीविषन् (दूरदर्शनम्)—

रेडियोयन्त्रस्य विकसितं रूपं भवति टेलीविषन् यन्त्रं यत्र शब्देन साकं चित्रमपि द्रष्टुं शक्यते। एतत् अत्युत्तमं दृश्यश्रव्यसाधनं भवति। यदि उचिताः संस्कृतकार्यक्रमाः दूरदर्शनेन प्रसार्यन्ते तर्हि संस्कृतशिक्षणेऽस्य उपयोगो भवति।

12. सङ्गणकयन्त्रम् (Computer)—

अयं सङ्गणकयुगः इति प्रख्यापयन्ति विज्ञाः। अनेन एकेनैव यन्त्रेण पूर्वोक्तानां

सर्वेषां दृश्यश्रव्योपकरणानां कार्यं सम्पादयितुं शक्यते। अस्मिन् प्रक्षेपकयन्त्रस्य (Power Point) संयोजनेन अपेक्षितं सर्वं कक्ष्यायां, यवनिकायां बृहद्रूपेण प्रदर्शयितुं शक्यते।

संस्कृतभाषाशिक्षणाय, संस्कृतशिक्षकाणां प्रशिक्षणाय च निर्मिताः सान्द्रमुद्रिकाः (Compact Disks) अत्र उपयोक्तुं शक्यन्ते। अभिक्रमितशिक्षणे, भाषा-प्रयोगशालायाञ्च सङ्गणकस्य कार्यम् आश्चर्यकरं भवति।

13. अन्तर्जालम् (Internet)—

सर्वत्र विश्वे प्राज्ञैः समार्जितम् अतिप्राचीनम्, अतिनवीनं वा सर्वविधं विज्ञानं स्वप्रकोष्ठे उपविश्य अन्तर्जालद्वारा प्राप्तुं शक्यते। विश्वस्य विविधकोणेषु स्थितेषु ग्रन्थालयेषु विद्यमानाः ग्रन्थाः अन्तर्जालद्वारा प्राप्तुं शक्यन्ते। प्रविधिविज्ञानस्य विस्मयकरोऽयमाविष्कारः।

सङ्गणकयन्त्रे मोडेम् (Modem) इति घटकस्य, दूरवाण्याश्च संयोजनेन अन्तर्जालेषु विद्यमानः सर्वोऽपि समाचारः उपलभ्यते। वैद्युतसम्प्रेषणद्वारा (E-mail) विचारविनिमयः लिखितरूपेण सम्भवति। शिरस्पट्टिकायाः (Head set), ध्वनिश्रावकस्य च (Speaker) संयोजनेन परस्परं दर्शनं, सम्भाषणं, शिक्षणञ्च सुसाधमस्ति। दृश्यसमावेशद्वारा (Vedeo Conference) दूरस्थानाम् छात्राणाम्, अध्यापकनाञ्च मिथः दर्शनेन, श्रवणेन, भाषणेन च कक्ष्याशिक्षणं सुलभमस्ति। एतादृशं शिक्षणं वैद्युतशिक्षणम् (E-learning) इति व्यवह्रियते।

संस्कृतशिक्षणे दृश्यश्रव्यसाधनानां प्रयोगस्य लाभाः—

1. सूक्ष्मचिन्तने प्रवृत्तेः पूर्वं चिन्तनाय अपेक्षिता सामग्री उपलभ्यते।
2. साहित्ये विद्यमानानां काल्पनिकदृश्यानां स्थूलः आधारः लभ्यते।
3. विषयः रोचकः, आकर्षकश्च भवति।
4. अधीतं स्थिरं भवति।
5. कैश्चित् साधनैः क्रमबद्धचिन्तनस्य प्रेरणा भवति। यथा चलचित्रे, दूरदर्शने च पाठ्यवस्तु व्यवस्थितरूपेण, तार्किकविधिना च संयोज्यते।
6. बालके निष्क्रियता न भवति। सः भाषाध्ययनाय सक्रियो भवति।

7. सार्थकशब्दभण्डारस्य वृद्धिर्भवति।
8. शिक्षणं प्रभावपूर्णं भवति।
9. अध्यापने वैविध्यं सम्भवति।
10. भाषायाः व्यावहारिकप्रयोगः ज्ञायते। छात्राः तस्य अनुकरणे तत्पराः भवन्ति।

संस्कृतशिक्षणे दृश्यश्रव्यसाधनानां प्रयोगे उपयोगिनः प्रस्तावाः—

1. दृश्यश्रव्योपकरणानि शिक्षणस्य साधनानि भवन्ति, न तु साध्यानि। अतः संस्कृतशिक्षणे एतेषां सदुपयोगः कर्तव्यः।
2. कस्यापि साधनस्य उपयोगात्पूर्वं तस्य साधनस्य महत्त्वमवश्यं ज्ञातव्यम्। अतः संस्कृताध्यापकः दृश्यश्रव्यसाधनानामुपयोगात्पूर्वं तेषां महत्त्वं ज्ञात्वा, उद्देश्यानुसारं प्रयोगं कुर्यात्।
3. अध्यापकस्य उपकरणानां सञ्चालनस्य, प्रयोगस्य च ज्ञानं सम्यक् भवेत्।
4. चित्रस्य मानचित्रस्य वा सम्पूर्णकक्ष्यायाः दर्शने सौविध्यं स्यात्।
5. यदि अन्यच्चित्रं नोपलभ्यते तर्हि पाठ्यपुस्तके विद्यमानं चित्रमेव दृश्यसामग्रीरूपेण उपयोजयेत्।
6. संस्कृतशिक्षणाय अपेक्षितानि चित्राणि विविधपत्रेभ्यः, पत्रिकाभ्यश्च समाहरणीयानि।
7. चित्राणां, दृश्यसामग्र्याश्च प्रदर्शनमात्रेण प्रयोजनं न सिद्ध्यति। किन्तु तेषां व्याख्यानं, स्पष्टीकरणञ्च आवश्यकं भवति। तच्च छात्राणां साह्येन कर्तव्यम्। ततश्च छात्राः पाठं प्रति जागरूकाः भवन्ति।
8. एतेषां प्रयोगस्य पूर्वयोजना रचनीया।
9. रेडियो अथवा टेप्रिकार्डर् द्वारा विषयसामग्र्याः श्रावणात् पूर्वं, पश्चाच्च संस्कृताध्यापकः विषयसम्बन्धिनं प्रस्तावं कुर्यात्। विषयस्पष्टीकरणाय, विषयग्रहणस्य परीक्षणाय च अध्यापकः प्रश्नान् पृच्छेत्।
10. दृश्यश्रव्यसाधनानाम् उपयोगिता तेषां समुचितप्रयोगेण सिद्ध्यति, न तु तेषां मूल्याधिक्येन।

11. यदि बहुमूल्यानि साधनानि नोपलभ्यन्ते तर्हि उपलभ्यमानैः अल्पमूल्यैः साधनैरेव कार्यं साधनीयम्।
12. आवश्यकतानुसारमेव साधनानां प्रयोगः कर्तव्यः।
13. श्यामपट्टस्य प्रयोगः सरलः, सुलभश्च। अस्य प्रयोगः अत्यन्तावश्यकः, महत्त्वपूर्णश्च। अतः संस्कृतशिक्षणेऽस्य प्रयोगः अनिवार्यः स्यात्।
14. बहूनि साधनानि युगपत् न प्रयोज्यानि। विषयानुकूलम् एकमेव समुचितं साधनं प्रयोक्तव्यम्।

एतेन विवरणेन ज्ञायते यत् संस्कृतशिक्षणे दृश्यश्रव्यसाधनानां प्रयोगः लाभप्रदो भवतीति।

***

अष्टादशोऽध्यायः

पाठ्यपुस्तकम्

अद्यतनशिक्षाप्रणाल्यां पाठ्यपुस्तकस्य स्थानमत्यन्तं महत्वपूर्णं वर्तते। पाठ्यपुस्तकं शिक्षणस्य केन्द्रबिन्दुरस्ति। प्राचीनकाले सर्वं शिक्षणं मौखिकपरम्परया आसीत्। यतः तस्मिन् काले लिपेर्विकासो न जातः, न वा मुद्रणकलाया आविष्कारोऽभूत्। पाठयपुस्तकस्य मुख्योद्देश्यानि वाचनं, लेखनं, व्याकरणशिक्षणं, गहनाध्ययनञ्च भवन्ति। एतदतिरिक्ततया द्रुतपाठ्यपुस्तकान्यपि पाठ्यक्रमे निर्धारितानि भवन्ति। एतेषामुद्देश्यं विस्तृताध्ययनं भवति।

भाषाशिक्षणे पाठ्यपुस्तकानामवलम्बनम् आवश्यकं भवति, यतः छात्राणां विषयवस्तुना साकं भाषायाः स्वरूपमपि बोधनीयं भवति। यतः संस्कृतं प्रायः छात्राणां मातृभाषा न भवति। अतस्तत्र पाठ्यपुस्तकस्य अवलम्बनमत्यन्तमावश्यकं भवति। संस्कृतभाषा छात्राणामपरिचिता वर्तते, अतः प्रारम्भस्तरादेव पाठ्यपुस्तकमवलम्बनीयं भवति। पाठ्यविषयस्य क्रमबद्धतया उत्तरोत्तरं शिक्षयितुं, शैक्षणिकस्तरे सर्वत्र समरूपतां सम्पादयितुञ्च पाठ्यपुस्तकस्य प्रयोगः आवश्यकः।

पाठ्यपुस्तकं पाठ्यविषयाणां, व्याकरणस्य च अध्ययनेन, अभ्यासैश्च अर्जितस्य ज्ञानस्य स्थायित्वं विधातुं प्रमुखं साधनं भवति। पूर्वनिर्धारितस्य, सुनिश्चितस्य पाठ्यक्रमस्य अनुसरणे अत्यन्तमुपयोगि भवति। अत एव पाठ्यपुस्तकं वर्तमानशिक्षायाः आधारशिला अथवा मेरुदण्डो वर्तते। संक्षेपतः अद्यतनशिक्षादीक्षा पाठ्यपुस्तकस्याधारेण भवति।

यद्यपि अध्यापकः योग्यः, कुशलः, प्रशिक्षितश्च स्यात् तथापि तस्य शिक्षणात् छात्राणां तादृशी प्रेरणा न लभ्यते, यादृशी प्रेरणा पाठ्यपुस्तकात् लभ्यते। शिक्षकस्तु किञ्चित्कालमेव अध्यापयति, पाठ्यपुस्तकन्तु सर्वदा छात्रस्य सकाशे भवति।

पाठ्यपुस्तकानामावश्यकता—

भाषाशिक्षणे पाठ्यपुस्तकस्य महत्त्वपूर्णं स्थानमस्ति। पाठ्यपुस्तकानामावश्यकतायाः विषये निम्नलिखिताः विषयाः श्रद्धेयाः भवन्ति।

1. पाठ्यपुस्तकानां प्रयोगेण पाठानां पठने, पाठने च सहायता भवति।
2. पाठ्यपुस्तके अनेकप्रकाराः सूचनाः समाहृताः भवन्ति। अतः सूचनानां समाहरणस्य प्रयासो न भवति।
3. अधीतानां पाठानां स्मरणाय प्रबलं साधनं भवति।
4. ज्ञानोपार्जनाय पाठ्यपुस्तकस्य साह्यमपेक्षितं भवति।
5. छात्राणां गृहकार्यकरणे सौविध्यं भवति।
6. उत्तमपाठ्यपुस्तकानि पाठ्यक्रमस्य निर्धारणेऽपि साह्यमाचरन्ति।
7. भाषाशिक्षणस्य विशिष्टोद्देश्यानां प्राप्तौ सहायकं भवति।
8. भाषायां पूर्णाधिकारं प्राप्तुं पाठ्यपुस्तकानामावश्यकता भवति। छात्राणामध्यापकानाञ्च सौकर्यं भवति।
9. सम्पूर्णकक्ष्याया अध्यापने पाठ्यपुस्तकमुपयुक्तं भवति। एवञ्च समयस्य, शक्तेश्च अपव्ययो न भवति।
10. पाठ्यपुस्तकं भाषाशिक्षणस्य साधनं भवति, न तु साध्यम्।

पाठ्यपुस्तकस्य उद्देश्यानि—

पाठ्यपुस्तकं शिक्षणस्य साधनमेव, न तु साध्यम्। पाठ्यपुस्तकस्य साध्यत्वेन स्वीकारे शिक्षणं सर्वं पुस्तकीयं भविष्यति। अतः पाठ्यपुस्तकस्य रचनाया उद्देश्यानि विशदीक्रियन्ते।

1. छात्राणां ज्ञानस्य सीमायाः विस्तारः।
2. व्याहारिकज्ञानस्य सम्पादनाय प्रेरणा।
3. बालकानां कल्पनाशक्तेः विकासः।
4. विविधविषयाणां, विभिन्नशैलीनाञ्च परिचयः।
5. छात्रेषु स्वाध्यायं प्रति रुच्युत्पादनम्।
6. संस्कृतपाठ्यपुस्तकस्य मुख्योद्देश्यं तावत् सांस्कृतिकलक्ष्याणां पूरणम्।

संस्कृतपाठ्यपुस्तकानां प्रकारा:—

1. सूक्ष्माध्ययनस्य पुस्तकानि।

2. विस्तृताध्ययनस्य पुस्तकानि।

1. **सूक्ष्माध्ययनस्य पुस्तकानि**—सूक्ष्माध्ययनस्य पुस्तकानामध्ययनं गम्भीररूपेण भवति। एतेषामुद्देश्यं बालकानां शब्दभण्डारस्य वर्धनं, भाषाज्ञानस्य वर्धनं, सूक्तीनां लोकोक्तीनाञ्च परिचय:, विभिन्नप्रसङ्गानां स्पष्टज्ञानञ्च भवति। एतानि पाठ्यपुस्तकानि गहनाध्ययनस्य पुस्तकानीत्यपि कथ्यन्ते। एतेषामध्ययनेन छात्राणां ज्ञानं वर्धते। लेखकानां, कवीनाञ्च विचारा: ज्ञायन्ते। विभिन्नस्तराणां कृते विभिन्नप्रकाराणि पाठ्यपुस्तकानि भवन्ति। यथा—

(1) संस्कृतपाठ्यपुस्तकानि—1. संस्कृतप्रवेशिका (प्रारम्भिकस्तरे) 2. संस्कृत-सङ्ग्रह:। (निश्चितगद्यपद्यांशा:-माध्यमिकस्तरे) 3. संस्कृतसङ्ग्रह:। (गद्यपद्यादि मौलिकं साहित्यम्-उच्चस्तरे)।

(2) संस्कृतव्याकरणपुस्तकानि।

(3) संस्कृतानुवादपुस्तकानि।

2. **विस्तृताध्ययनस्य पुस्तकानि**—विस्तृताध्ययनस्य पाठ्यपुस्तकानां प्रयोग: द्रुतपाठस्य कृते भवति। अत्र सरलभाषाया: प्रयोगो भवति। एतेषामुद्देश्यं बालकानां शीघ्रवाचनस्य अभ्यासो भवति। छात्रा: शीघ्रगत्या पुस्तकं पठित्वा अर्थमपि जानीयु:। शब्दार्थस्य बोधनं, व्याख्यानञ्च अत्र न भवति। छात्रा: आवश्यकतानुसारं कोशानामुपयोगं कुर्यु:।

पाठ्यपुस्तकनिर्माणस्य सिद्धान्ता:

सत्पाठ्यपुस्तकस्य केचन विशेषा: भवन्ति। एते विशेषा: पाठ्यपुस्तकनिर्माणे सहायका: भवन्ति। त एव सिद्धान्तत्वेन व्यवह्रियन्ते। तेषां पक्षद्वयं दृश्यते

(क) आन्तरिकपक्ष:, (ख) बाह्यपक्ष इति।

(क) आन्तरिकपक्षस्य सिद्धान्ता:

1. सोद्देश्यता—

प्रत्येकं पाठ्यपुस्तकं कैश्चित् निश्चितै: उद्देश्यै: निर्मीयते। तेषामुद्देश्यानां सम्पादनं तत्र स्यात्।

2. स्तरानुगुणता—

पाठ्यपुस्तके सञ्चिता सामग्री छात्राणां शारीरिकमानसिकस्तरानुगुणं भवेत्। बालकानां कथासु रुचिरधिका भवति। अतः तेषां पाठ्यपुस्तके कथानां संख्या अधिका स्यात्। किशोरावस्थायां छात्राः प्रकृतिवर्णने, यात्रावर्णने, जीवितचरित्रेषु च आसक्ताः भवन्ति। अतः तादृशविषयाः तेषां पाठ्यपुस्तके भवेयुः।

3. व्यावहारिकता—

पाठ्यविषयाः बालकानां परिसरेण, जीवनेन च सम्बद्धाः स्युः। परिचितविषयाणामध्ययने बालानां रुचिर्भवति।

4. रोचकता—

पाठ्यसामग्री छात्राणां रुच्यनुसारं भवेत्। प्राकृतिकदृश्यानि, क्रीडाः, गीतानि च बालकानामाह्लादकराणि भवन्ति। उच्चस्तरे सामाजिकाः, वैज्ञानिकाश्च विषयाः स्युः। हास्यकथाः छात्राणां मनोविनोदाय भवेयुः।

5. विषयवैविध्यम्—

पाठ्यपुस्तके विषयाणां वैविध्यं सम्पादनीयम्। गद्यं, पद्यं, नाटकं, निबन्धः, सम्भाषणम् इत्यादिसाहित्यप्रकाराः भवेयुः। लघुकथाः, प्रकृतिवर्णनं, साहसिकयात्रा, जीवनचरित्रमित्यादिविषयवैविध्येन छात्राणामध्ययनासक्तिः वर्धते।

6. आदर्शवादः—

छात्राणां जीवने उन्नतादर्शानां नैतिकतायाश्च उत्पादनाय अनुकूलाः विषयाः भवेयुः। धार्मिकविषयाः, सुभाषितानि, महात्मनां चरित्राणि च छात्राणां नैतिकविकासमुपकुर्वन्ति।

7. आधुनिकविषयाणां समावेशः—

संस्कृतं प्राचीनभाषा। अतः संस्कृतपाठ्यपुस्तकेषु पुराणकथा एव भवेयुः, यतस्ता अस्माकं संस्कृतेः प्रतिपादिकाः इति केचिदभिप्रयन्ति। परन्तु आधुनिककाले नवीनविषयेषु संस्कृतस्य उपयोगं ज्ञापयितुम् आधुनिकविषयाणामपि समावेशः आवश्यकः। वैज्ञानिकाविष्काराः, प्रजातन्त्रं, पञ्चायतनम्, नगरपालिका, वर्तमाननेतॄणां जीवितचरित्राणि च पाठ्यपुस्तके समाविशेयुः।

8. उपयुक्तता—

पाठ्यपुस्तके समाविष्टाः विषयाः छात्राणां दैनिकव्यवहारे, जीवने च उपयुक्ताः

स्युः। विभिन्नप्रकरणेषु प्रतिपादिताः विषयाः छात्राणां मानसिकस्तरानुसारं भवेयुः। विषयाणां निरूपणप्रकारः, शैली च उपयोगानुसारं स्यात्।

9. व्यवस्थितक्रमः—

पाठ्यपुस्तकस्य सामग्री व्यवस्थिता स्यात्। यदि सर्वे गद्यपाठाः एकस्मिन् क्रमे भवन्ति तर्हि छात्राणां नीरसता भवेत्। अतः मध्ये-मध्ये पद्यपाठाः स्युः। पाठ्यपुस्तके ऋतुभिः, उत्सवैश्च सम्बद्धाः पाठाः तत्तत्समये पाठिताः भवेयुः। ग्रीष्मर्तोः वर्णनं पुस्तकस्य प्रारम्भे स्यात्। होलिकोत्सवस्य पाठः अन्ते स्यात्।

10. अभ्यासः—

पाठ्यपुस्तके प्रत्येकं पाठानाम् अन्ते अभ्यासकार्यम् अवश्यं दातव्यम्। अभ्यासार्थं निम्नोक्ताः विषयाः स्युः।

1. शब्दार्थः।
2. शब्दानां वाक्यप्रयोगः।
3. अर्थग्रहणम्।
4. व्याकरणकार्यम्-सन्धिसमासादयः।
5. रिक्तस्थानानां पूरणम्।
6. गद्यांशानां, पद्यांशानाञ्च व्याख्या।
7. अनुवादः-मातृभाषातः संस्कृतेन, संस्कृतात् मातृभाषया च।
8. अन्यप्रश्नाः-आवश्यकतानुसारम्।

11. भाषाधिकारवर्धनम्—

पाठ्यपुस्तकस्य भाषा छात्राणां योग्यतानुसारं स्यात्। शब्दानां चयनं, वाक्यानां योजना, सूक्तीनां सङ्ग्रहश्च छात्राणां भाषाधिकारं वर्धयन्ति।

नवीनशब्दानां पुनरावृत्तिः स्यात्। मातृभाषाशब्दानां संस्कृते तत्समशब्दाः बहुलं प्रयोक्तव्याः। यथा—रुचिः, कन्या, सागरः, गतिः, भ्रमरः, नृत्यं, गृहं, क्षेत्रमित्यादयः। प्रारम्भिकस्तरे सन्धिसमासादीनामभाव एव वरम्। प्रत्येकं पाठे द्वित्राणामेव व्याकरणांशानां परिचयः स्यात्। नवीनरूपाणां परिचयः परिमितः स्यात्। व्याकरणनियमानामभ्यासार्थम् आवृत्तिरधिका स्यात्। धातूनां लकाराणाञ्च प्रयोगः

क्रमिकः स्यात्। एवञ्च संस्कृतपाठ्यपुस्तकस्य भाषा छात्राणां कठिना भारावहा च न भवति। सरलतया भाषायामधिकारश्च सिध्यति।

(ख) बाह्यपक्षः—

संस्कृतपाठ्यपुस्तकस्य बाह्यपक्षे निम्नवर्णिताः सिद्धान्ताः श्रद्धेयाः भवन्ति।

1. आकारः—

पाठ्यपुस्तकानामाकारः आवश्यकतानुसारम् अल्पो वा अधिको वा स्यात्। पाठानामाकारोऽपि नात्यल्पः, नात्यधिकः स्यात्। निम्नकक्ष्यासु पृष्ठसंख्या न्यूना स्यात्, उच्चकक्ष्यासु पृष्ठसंख्या क्रमशो वर्धेत।

2. सम्पादनम्—

प्रारम्भिकस्तरे, माध्यमिकस्तरे, उच्चस्तरे च संस्कृतशिक्षणाय प्रायः संस्कृतसङ्ग्रहाणां प्रयोगः क्रियते। अतः एतेषां सम्पादनं सश्रद्धं कर्तव्यम्। कक्ष्याणां स्तरानुगुणं पाठानामाकारः, शैली च स्याताम्। अवाञ्छनीयाः, प्रसङ्गविरुद्धाश्च विषयाः परिहरणीयाः। विषयाणां क्रमभङ्गो न स्यात्।

3. चित्राणि—

चित्राणि विषयाणां स्पष्टीकरणे सहायकानि भवन्ति। पाठ्यपुस्तकानामुपयोगस्य वर्धनाय चित्राणि भवेयुः। प्रारम्भिककक्ष्यासु पाठ्यपुस्तकेषु आकर्षकाणि, वर्णरञ्जितानि चित्राणि स्युः। क्रमशः चित्राणां संख्या न्यूना स्यात्। उच्चकक्ष्यासु चित्राणां विशेषावश्यकता न भवति।

4. मुद्रणम्—

पाठ्यपुस्तकस्य मुद्रणं शुद्धं स्यात्। प्रारम्भिककक्ष्यासु बृहदक्षराणि, उच्चकक्षासु अल्पाकाराणि च अक्षराणि भवेयुः। अभ्यासार्थं दीयमानानां प्रश्नानामक्षराणि मूलपाठाक्षरेभ्यः भिन्नाकाराणि स्युः। शीर्षकाणां कृते भिन्नप्रकाराणि मुद्राक्षराणि उपयुज्येरन्। पदानां, वाक्यानाञ्च मध्ये उचितं व्यवधानं स्यात्।

5. नाम—

पाठ्यपुस्तकस्य बाह्यगुणेषु नाम्नोऽपि प्रभावो वर्धते। पाठ्यपुस्तकस्य नाम सरलं, संक्षिप्तं, स्पष्टम्, आकर्षकञ्च भवेत्। पुस्तकान्तर्गतविषयस्य निर्देशकं स्यान्नाम।

6. आवरणम्—

पुस्तकस्य बन्धनं सुदृढं, बाह्यावरणमाकर्षकञ्च स्यात्। मुखपुटे रागरञ्जितानि चित्राणि बालकानां प्रसादकानि स्युः। उच्चस्तरे कलात्मकानि चित्राणि भवेयुः।

7. मूल्यम्—

पाठ्यपुस्तकस्य मूल्यमुचितं स्यात्। पाठ्यपुस्तकस्य क्रयणमभिभावकानां भारो न स्यात्।

संस्कृतपाठ्यपुस्तकस्य प्रयोगे उपयोगिनः केचन प्रस्तावाः—

1. संस्कृताध्यापकाः पाठ्यपुस्तकस्योपयोगं संस्कृतशिक्षणे मार्गदर्शकरूपेण कुर्वन्तु। पाठ्यपुस्तकस्य दिशानिर्देशानुसारं छात्रान् संस्कृतं पाठयन्तु।
2. पाठ्यपुस्तकस्थान् विषयान् स्वयोग्यतानुसारं व्याख्यान्तु।
3. अध्यापकेन गृहकार्यं दातव्यं, यतश्छात्राः गृहे पाठ्यपुस्तकमवश्यं पठेयुः।
4. अध्यापकाः अधीतानां विषयाणां दृढीकरणाय पाठ्यपुस्तकं पठितुं छात्रान् प्रेरयेयुः।
5. पाठ्यपुस्तकस्य प्रयोगः आसक्तिकरः स्यात्। तेन छात्राः अन्यानि सहायकपुस्तकान्यपि पठेयुः।
6. अध्यापकः पाठ्यपुस्तकस्य पुनः पुनः पठनाय छात्रेषु औत्सुक्यमुत्पादयेत्।
7. पाठ्यपुस्तकस्य समुचितप्रयोगेण संस्कृतशिक्षणस्य उद्देश्यानि साधयितुम् अध्यापकः समर्थः स्यात्।

✤✤✤

एकोनविंशोऽध्यायः

मूल्याङ्कनम्

शिक्षायाः परीक्षायाश्च अविनाभावसम्बन्धो वर्तते। प्राचीनकालादेव परीक्षाक्रमः केनचिद्रूपेण प्रचलति। परीक्षाणां द्वारा छात्राणां ज्ञानस्य स्तरः, बुद्धिकौशलं, कार्यशक्तिश्च निश्चीयते। सर्वेषु देशेषु छात्राणां योग्यतां निर्णेतुं या काचित् परीक्षाप्रणाली प्रचलिता अस्ति।

गतवर्षेषु मनोवैज्ञानिकाः, शिक्षाशास्त्रिणश्च परीक्षाप्रणालीं समीकर्तुं प्रयत्नमकुर्वन्। फलतः मूल्याङ्कनस्य नवीनदृष्टिकोणस्य आविष्कारोऽभवत्। मूल्याङ्कनेन छात्राणां योग्यतायाः परीक्षणेन साकं छात्राणां प्रगतेः निर्धारणमपि क्रियते। अवनतेः, असफलताया वा कारणानि विमृश्यन्ते। शिक्षाया उद्देश्यानां साफल्यमपि निर्णीयते।

मूल्याङ्कनस्यावश्यकता—

किमपि कार्यं क्रियते चेत् तत् कियत्पर्यन्तं सफलं जातमित्यपि ज्ञातव्यम्। यदुद्देश्येन कार्यं कृतं तदुद्देश्यं सम्पन्नं वेति चिन्तनीयम्। अध्यापकानां शिक्षणं कियत्सफलम्? छात्राणां विषयग्रहणं कियत्? इत्यादिविषयान् परम्परागतपरीक्षाणां द्वारा ज्ञातुमशक्यत्वात् मूल्याङ्कनस्य अवलम्बनम् आवश्यकं भवति। शिक्षणविधीनां समीकरणे, शिक्षास्तरस्य उन्नतीकरणे च मूल्याङ्कनं सहायकं भवति।

मूल्याङ्कनस्य प्रकाराः—

मूल्याङ्कनं द्विविधं भवति।

1. आन्तरिकमूल्याङ्कनम्—

छात्राणां द्वारा शैक्षणिकसत्रे कृतानां सर्वेषां कार्याणां दैनिकगतिविधीनाञ्च परीक्षणम् आन्तरिकमूल्याङ्कनं भवति। एतादृशं मूल्याङ्कनमत्युत्तमं भवति। सम्पूर्णे वर्षे कृतानां कार्याणां फलं केवलमेकया परीक्षया ज्ञातुं न शक्यते। आन्तरिकं

मूल्याङ्कनं छात्राणां दैनिकप्रगतिं, गृहकार्यं, विभिन्नसाहित्यिककार्यक्रमेषु प्रदर्शितं कौशलं, सामयिकपरीक्षाणां परिणामञ्चाश्रित्य भवेत्।

2. बाह्यमूल्याङ्कनम्—

बाह्यमूल्याङ्कनं विद्यालयैः, शैक्षिकसंस्थाभिः, विश्वविद्यालयैश्च आयोजितानां परीक्षाणां द्वारा भवति। एतासु परीक्षासु छात्रैः लिखितानामुत्तराणां, कृतस्य कार्यस्य चाधारेण अङ्कानां वितरणं क्रियते।

वर्तमानसंस्कृतपरीक्षाप्रणाल्याः दोषाः—

आधुनिकविद्यालयेषु प्रायः वार्षिकपरीक्षाणामाधारेण छात्राणाम् उत्तीर्णता, अनुत्तीर्णता वा उद्घुष्यते। किन्तु अस्यां परीक्षाप्रणाल्यां बहवो दोषास्सन्ति।

1. भाषाशिक्षणे चत्वारि प्रधानकौशलानि सन्ति। 1. श्रवणम्, 2. भाषणम्, 3. वाचनम्, 4. लेखनमिति। संस्कृताध्ययनस्य परीक्षणमेतेषां चतुर्णां कौशलानां परीक्षणेनैव स्यात्। परन्तु लिखितपरीक्षणं प्रधानतया दृश्यते।
2. अधुना वार्षिकपरीक्षाः न साधनत्वेन, किन्तु साध्यत्वेन परिणताः सन्ति। सम्पूर्णा शिक्षा परीक्षाकेन्द्रिता जाता। छात्राः परीक्षायै सन्नद्धीक्रियन्ते, न तु ज्ञानार्जनाय।
3. वर्तमानपरीक्षाप्रणाल्या छात्राणां वास्तविकयोग्यतायाः निर्णयो न भवति। पञ्चषाणां प्रश्नानामाधारेण छात्राणामुत्तीर्णता, अनुत्तीर्णता वा निर्णीयते।
4. वर्तमानपरीक्षाप्रणाली कण्ठस्थीकरणस्य प्रोत्साहनं करोति। छात्राः विषयज्ञानापेक्षया कण्ठस्थीकरणाय प्राधान्यं ददति। परीक्षया छात्राणां स्मरणशक्तेः, कण्ठस्थीकरणशक्तेश्च मूल्याङ्कनं सम्भवति, न तु तैरार्जितस्य ज्ञानस्य।
5. वर्तमानप्रणाल्यां परीक्षाफलं भाग्यायत्तं भवति। सम्पूर्णे वर्षे अधीयानश्छात्रः कदाचिदनुत्तीर्णो भवति। निश्चितान् प्रश्नान् कण्ठस्थीकुर्वाणश्छात्रः उत्तमैरङ्कैः उत्तीर्णो भवति।
6. वर्तमानपरीक्षाप्रणाली विश्वसनीया नास्ति। यद्येकस्यैव छात्रस्योत्तरपुस्तिकां द्वौ परीक्षकौ निरीक्षेतां तर्हि द्वयोरपि मूल्यनिर्णये

(अङ्केषु) महान् भेदः स्यात्। कदाचिदेकः परीक्षकः तं छात्रमुत्तीर्णमकरिष्यत्, अन्यश्च अनुत्तीर्णम्।

7. परीक्षायामुत्तीर्णता, प्रमाणपत्रप्राप्तिश्च छात्राणां प्रधानं लक्ष्यं सञ्जातमिति हेतोः छात्राः परीक्षासु प्रतिलिपीकरणाद्यनुचितकार्येषु प्रवर्तन्ते, चरित्रहीनाश्च भवन्ति।

8. निबन्धात्मकपरीक्षासु निश्चिताः मुख्याः प्रश्नाः भवन्ति। अतः छात्राः सम्पूर्णं पाठ्यक्रममपठित्वा प्रधानांशानेव पठन्ति।

नवीनपरीक्षाप्रणाली—

शिक्षणस्तरः प्रायः परीक्षाप्रणाल्यामाधारितो भवति। यदि परीक्षाप्रणाली दोषमुक्ता स्यात् तर्हि शिक्षणस्तरः उन्नतः स्यात्। अतः संस्कृतशिक्षणेऽपि मूल्याङ्कनस्य नवीनदृष्टिकोणः अनुसरणीयः। यदि परीक्षाप्रणाल्यां परिवर्तनं भवति, तर्हि शिक्षणविधानेऽपि परिवर्तनं स्यात्। तथा च परीक्षाप्रणाली निर्दुष्टा स्यात्। सामान्यतः परीक्षणविधयः त्रयस्सन्ति।

1. निबन्धात्मकविधिः।
2. वस्तुनिष्ठविधिः।
3. मौखिकविधिः।

एतेषां त्रयाणामपि विधीनां संस्कृतपरीक्षाप्रणाल्यां प्रयोगः स्यात्। संस्कृतस्य नवीनपरीक्षाप्रणाल्याः स्वरूपमेवं भवेत्।

1. निबन्धात्मकपरीक्षा—

वर्तमानपरीक्षा निबन्धात्मिका वर्तते। अत्र प्रश्नानामुत्तरं विस्तृतं, शैली विवरणात्मिका च भवति। अनेन विधिना ज्ञानोपलब्धेः, वास्तविकं परीक्षणं न भवति। छात्राः विषयं ज्ञात्वापि भाषायामधिकाराभावात्, शीघ्रलेखनस्य अभ्यासाभावाद्वा परीक्षायां पराजिताः भवन्ति। तथापि निबन्धपरीक्षा बहिष्कर्तुं न शक्यते। निबन्धपरीक्षया अधोनिर्दिष्टानामंशानां परीक्षणं कर्तुं शक्यते।

1. लिखिताभिव्यक्तिः।
2. पाठ्यपुस्तकाल्लब्धं विषयज्ञानम्।
3. अक्षरविन्यासः।

4. सारलेखनं, भावाभिव्यक्तिः।

5. कवितानां रसानुभूतिः।

6. घटनानां वर्णनम्।

7. पत्रलेखनं, निबन्धरचना।

2. वस्तुनिष्ठपरीक्षा—

निबन्धात्मकपरीक्षाणां दोषाणां निवारणाय मूल्याङ्कने वस्तुनिष्ठपरीक्षाविधानमाद्रियते। अत्रैतादृशानां प्रश्नानां रचना क्रियते येषामुत्तरं निश्चितं भवति। तेन च परीक्षा विषयनिष्ठा भवति, मूल्याङ्कनञ्च निष्पक्षम्। एषु प्रश्नेषु परीक्षकाणां भेदेऽपि मूल्यनिर्णये भेदो न भवति। अतोऽत्र वैधता, विश्वसनीयता च वर्तते। सम्पूर्णपाठ्यक्रमात् प्रश्नाः चिताः भवन्ति। परन्त्वस्यां प्रणाल्यामयं महान् दोषो वर्तते, यत् अत्र लिखिताभिव्यक्तेः परीक्षणं न शक्यते। तथापि निम्नलिखितानां विषयाणां परीक्षणाय इयं प्रणाली उपयुज्यते।

1. विषयग्रहणकौशलम्।

2. शब्दज्ञानम्।

3. शुद्धप्रयोगः।

4. सैद्धान्तिकव्याकरणम्।

5. अक्षरविन्यासः।

6. प्रयोगात्मकव्याकरणम्।

7. अलङ्कारः, छन्दश्च।

अस्यां प्रणाल्यां निम्नोक्तप्रकाराः प्रश्नाः निर्मिताः भवन्ति—

1. बहुविकल्पप्रश्नाः—एतेषां प्रश्नानां शुद्धोत्तरेण साकं द्वित्राण्यशुद्धोत्तराणि दीयन्ते। तत्र छात्रैः शुद्धमुत्तरं चित्वा सूचनीयम्। यथा—

1. शुद्धोत्तरस्य संख्यां कोष्ठके लिखत।

बालशब्दस्य प्रथमाविभक्तेः एकवचनम्—

1. बालम्   2. बालः   3. बालाः।   ( )

2. उचितेन पदेन रिक्तस्थानं पूरयत—

अहम् — ।

1. गच्छति 2. गच्छसि 3. गच्छामि। ( )

3. रामायणस्य कर्ता कः?

1. वाल्मीकिः 2. व्यासः 3. भासः 4. कालिदासः( )

2. रिक्तस्थानानां पूरणम्। सूचनानुसारं छात्रैः वर्णैः, पदैर्वा रिक्तस्थानं पूरणीयम्।

1. उचितैः वर्णैः पूरयत—

1. क — लम्। 2. — दी। 3. स — द्रः।

4. रा — य — म्। 5. महा — — तम्।

2. उचितेन विभक्त्यन्तेन रिक्तस्थानं पूरयत।

1. एतत् फलं — रोचते। (युष्मद्)

2. तत् — पुस्तकम्। (तद्)

3. पुत्रः — साकं गच्छति। (पितृ)

4. लक्ष्मणः — विना न तिष्ठति। (राम)

3. विशेषणशब्दैः पूरयत।

1. — कालिदासः शाकुन्तलमरचयत्।

2. संस्कृतसाहित्ये — रामायणं भवति।

3. प्रत्यभिज्ञाप्रश्नाः (शुद्धाशुद्धपरीक्षा)

(1) दत्तं वाक्यं शुद्धं चेत् (√) चिह्नम्, अशुद्धं चेत् (×) चिह्नञ्च कुण्डल्यां लिखत।

1. सः ब्राह्मणाय गां ददाति। ( )

2. बालः कन्दुकं क्रीडति। ( )

3. बाला पुष्पाणि स्पृहयति। ( )

4. अध्यापकः छात्रं संस्कृतं पाठयति। ( )

(2) सत्यासत्यपरीक्षा—

उक्तः विषयः सत्यञ्चेत् (√) चिह्नम्, असत्यञ्चेत् (×) चिह्नञ्च कुण्डल्यां लिखत।

1. विष्णुशर्मा पञ्चतन्त्रं रचयामास। ( )
2. आर्यभटः व्याकरणमरचयत्। ( )
3. शिशुपालवधस्य कर्ता माघः। ( )
4. रावणः सीतामपाहरत्। ( )
5. पठधातोः लटि उत्तमपुरुषैकवचनम्-पठसि। ( )

4. प्रत्याह्वानप्रश्नाः—

छात्राः प्रश्नानामुत्तरं स्मृत्वा लिखन्ति

1. उचितमुत्तरं कोष्ठके लिखत—

1. हरिशब्दस्य तृतीयाबहुवचनम्। ( )
2. रमाशब्दस्य षष्ठीद्विवचनम्। ( )
3. भूधातोः लृटि प्रथमपुरुषबहुवचनम्। ( )
4. कृधातोः लटि प्रथमपुरुषैकवचनम्। ( )

5. तुलनात्मकप्रश्नः—

परस्परं सम्बद्धाः विषयाः वर्गद्वये भिन्नक्रमेण स्थाप्यन्ते। छात्रैः तेषां योजनं कर्तव्यम्।

1. योजयत। सम्बद्धस्य वर्णं कुण्डल्यां लिखत।

1. कमलानि	( )	अ.	प्रकाशते।
2. कविकुलगुरुः	( )	आ.	पुष्पाणि।
3. चन्द्रः	( )	इ.	दशरथस्य पुत्रः।
4. लक्ष्मी	( )	ई.	कालिदासः।
5. श्रीरामः	( )	उ.	चञ्चला।

6. क्रमीकरणम् अथवा व्यवस्थापनम्।

1. विभक्तीनां क्रमानुसारं क्रमेण लिखत।

सरित्, सरिता, सरिति, सरिते, सरितः, सरितम्, सरितः।

7. विषयग्रहणपरीक्षा।

1. एकेन पदेन उत्तरं दीयताम्।

   1. सीतायाः पतिः कः?
   2. पाण्डवाः कति सन्ति?

2. एकेन वाक्येन उत्तरं लिखत।

   1. अयोध्या कुत्र वर्तते?
   2. भारतदेशः कदा स्वतन्त्रोऽभवत्?

3. दत्तानि पदानि उपयुज्य कथां पूरयत।

   (स्वरः, अपूर्वम्, अतीव, मांसखण्डं, आगच्छम्, मुखे, गृहीत्वा)

कश्चन काकः — बुभुक्षितः आसीत्। सः भूमौ एकं — अपश्यत्। सः तं मांसखण्डं — वृक्षस्य शाखायाम् उपाविशत्। तदा कश्चित् श्रृगालः काकस्य — मांसखण्डं दृष्टवा लुब्धः अभवत्। धूर्तः श्रृगालः शाठ्येन काकम् अवदत्। 'भो विहगराज। — तव लावण्यम्। मधुरः तव — । अहं तव गीतस्य श्रवणाय — ।

2. कथामेतां पठित्वा अधो दत्तानां प्रश्नानामुत्तरं लिखत—

कदाचित् सिद्धार्थः भ्रमणाय उपवनम् अगच्छत्। सः पक्षिणां कलरवं श्रुत्वा अतुष्यत्। ततः तस्य भ्राता देवदत्तः अपि उपवनम् आगच्छत्। सः शरेण एकं हंसम् अविध्यत्। शरेण विद्धः हंसः भूमौ अपतत्। सिद्धार्थः पतितं हंसं दृष्टवा करुणया पर्यचरत्। देवदत्तः तं हंसं ग्रहीतुं तत्र आगच्छत्। सिद्धार्थः देवदत्तम् अवदत् — 'त्वमस्य हंसस्य घातकः, अहमस्य रक्षकः। अतोऽयं मम हंसः।' इति।

1. सिद्धार्थः किमर्थम् उपवनमगच्छत्?
2. सिद्धार्थः कुतः अतुष्यत् ?
3. कः हंसम् अविध्यत् ?
4. हंसः कुत्र अपतत् ?

5. कः हंसं पर्यचरत् ?

6. सिद्धार्थः देवदत्तं किमवदत्?

अत्रोदाहरणरूपेण केचनैव प्रश्नाः प्रदर्शिताः। एतादृशाः बहुविधाः प्रश्नाः निर्मातुं शक्यन्ते।

3. मौखिकपरीक्षा—

मौखिकपरीक्षायां लेखनकार्यं न भवति। मौखिकाभिव्यक्तेः क्षमतायाः परीक्षणायैषा उपयुज्यते। अत्र श्रवणकौशलं, ग्रहणकौशालम्, अभिव्यक्तिकौशलञ्च अन्तर्भवन्ति। विषयग्रहणं स्मरणशक्तिः, उच्चारणस्फुटता, भाषणकौशलञ्च अत्र परीक्षितुं शक्यन्ते।

प्रारम्भिकस्तरे परिचितान् विषयान्, दैनिकव्यवहारांश्च आदाय कृतानां पञ्चषाणां प्रश्नानामुत्तरं छात्रैः वक्तव्यम्। यथा—

1. तव नाम किम् ?

2. तव गृहं कुत्र अस्ति ?

3. तव विद्यालयस्य नाम किम् ?

4. तव पितुः नाम किम् ?

माध्यमिकस्तरे मौखिकनिबन्धप्रश्नाः स्युः। यथा—चित्राणां वर्णनम्, कथाकथनम्। उच्चस्तरे पञ्चनिमेषपर्यन्तं निश्चितविषये धाराप्रवाहरूपेण भाषणञ्च अन्तर्भवेयुः।

4. शलाकापरीक्षा—

प्राचीनकाले छात्राणां ज्ञानस्य परीक्षणार्थम् अनेकविधाः परीक्षा आसन्। कण्ठस्थीकृतानां वेदभागानाम्, अधीतग्रन्थानाञ्च परीक्षणं विद्वत्सभासु, राजसभायां वा शलाकापरीक्षयापि क्रियते स्म। केनचित् मध्यस्थेन पुरुषेण काचिदयश्शलाका तालपत्रग्रन्थस्य पत्राणां मध्ये यत्र कुत्रापि निक्षिप्यते। ततः ग्रन्थमुद्घाट्य तस्मिन् पत्रे स्थितः विषयः छात्रेण व्याख्यातव्यः। एवं विषयाणां परीक्षा भवति स्म। अस्यां पद्धतौ परीक्षकाणां विषयनिर्धारणे पक्षपातो न भवति। छात्रैरपि सम्पूर्णः ग्रन्थः सम्यगध्येतव्यो भवति।

अत्र दोषस्तु कदाचित् छात्राणां भाग्यवशात् तैः सम्यगधीताः सरलाः विषयाः सूचिकावशङ्गताः विजयं साधयेयुः। कदाचित् कठिनाः विषयाः छात्राणां मनसि

खेदमुत्पाद्य तान् पराजितान् कुर्युः। एषा छात्राणां व्याख्यानरूपा मौखिकी परीक्षा भवति। वेदानां विषये तु कण्ठस्थीकृतानां वेदभागानां पठनं भवति।

अस्याः परीक्षायाः मौखिकत्वात् स्मरणशक्तेरभावे छात्राः पराजिताः स्युः। किञ्च धैर्यहीनाः, लज्जालवः, सभाकम्पयुक्ताश्च छात्राः सभासु अधीतानां विषयाणां कथनेऽसमर्थाः सन्तः पराजिताः भवेयुः। अतः एतादृशी परीक्षा आधुनिकशिक्षाविधाने बालकानां कृते नोपयुज्यते।

मूल्याङ्कने उपयुक्ताः केचन प्रस्तावाः—

1. प्रश्नपत्रमेतादृशं निर्मातव्यं यत् छात्राः अधीतविषयज्ञानं, स्मरणशक्तिं, चिन्तनशक्तिं, कल्पनाशक्तिञ्च उपयुज्य प्रश्नानामुत्तरं दद्युः। तथा चेत् छात्राः कण्ठस्थीकृत्य लेखनं, प्रतिलिपीकरणाद्यनुचितमार्गाणाम् आश्रयणञ्च परित्यजेयुः।
2. अध्यापकाः पारम्परिकप्रणालीमुपेक्ष्य, सप्रमाणं, विश्वसनीयं, वैविध्यपूर्णं, प्रायोगिकञ्च आधुनिकमूल्याङ्कनविधिमाश्रयेयुः। तेन छात्राणां योग्यता सुस्पष्टं निरूपिता स्यात्।
3. मूल्याङ्कने निबन्ध-वस्तुनिष्ठ-मौखिकपरीक्षाभिस्साकं गृहकार्यस्य, पाठ्यसहगामिक्रियाणाञ्च महत्त्वं स्यात्। एवञ्च बाह्यमूल्याङ्कनेन साकम् आन्तरिकमूल्याङ्कनस्यापि परिगणनं स्यात्।
4. मूल्याङ्कनेन संस्कृतशिक्षणस्य उद्देश्यानां पूर्तिरपि ज्ञातव्या।
5. मूल्याङ्कने परीक्षकैः निष्पक्षदृष्टिकोणः आश्रयणीयः।
6. यदि शैक्षिकपरिषद्भिः प्रारम्भिकस्तरे, माध्यमिकस्तरे च मौखिकपरीक्षाः नायोज्यन्ते, तदा विद्यालयेषु अध्यापकैः छात्राणाम् उच्चारणस्फुटतां, वाचनकौशलं, भाषणकौशलञ्च परीक्षितुं मौखिकपरीक्षाः आयोजनीयाः।
7. परीक्षायां सम्पूर्णं पाठ्यक्रममाश्रित्य प्रश्नाः भवेयुः।
8. भाषाशिक्षणस्य चतुर्णामपि कौशलानां परीक्षणाय परीक्षायां व्यवस्था स्यात्।

आदर्शप्रश्नपत्रम्

कक्षा : दशमी

विषय : संस्कृतम्

समयः - घण्टात्रयम्　　　　　　　　　　　　　　　　　　　पूर्णाङ्काः - 100

निर्देशाः

(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(क) अनुप्रयुक्तव्याकरणम्	-	30 अङ्काः
(ख) लेखनम्	-	20 अङ्काः
(ग) वाचनम्	-	40 अङ्काः
(घ) अपठितवाचनम्	-	10 अङ्काः

(2) उत्तराणि अस्याम् एव पुस्तिकायां निर्दिष्टस्थाने लेखितव्यानि।

(3) अन्यत्र कुत्रापि लिखितेभ्यः उत्तरेभ्यः अङ्काः न प्रदास्यन्ते।

(4) समस्ताः प्रश्नाः अनिवार्याः।

केवलं परीक्षकस्य कृते

(क)		(ख)		(ग)		(घ)	
○	+	○	+	○	+	○	=
30		20		40		10	

= ☐
100

कक्ष-निरीक्षक-हस्ताक्षरम्　　　　　　　　　　　　　　　　परीक्षक-हस्ताक्षरम्

संस्कृतम्

समयः - घंटात्रयम् **आदर्शप्रश्नपत्रम्** **पूर्णाङ्काः - 100**

कक्षा - 10

क' खण्डः - अनुप्रयुक्तव्याकरणम् **अङ्का : 30**

1. अधोलिखितेषु वाक्येषु रेखांकितपदेषु सन्धिच्छेदम् अथवा सन्धिं कृत्वा समक्षं प्रदत्तस्थाने लिखत। (4)

(1) हे हरेऽत्र तिष्ठ, ...।

(2) प्रवाति मन्दः पवनः ....।

(3) एतच्छ्रुत्वा सर्वे अतुष्यन्, ...।

(4) उपायेन यत् शक्यं न तत् शक्यं पराक्रमैः ....।

2. निम्नलिखितप्रश्नानाम् उत्तराणि लिखितानि। एतेषु उत्तरेषु समासम् अथवा विग्रहं कृत्वा समक्षं प्रदत्तस्थाने लिखत। (4)

(क) प्र. कस्य सम्मानो न भवति?

उ. विद्याहीनस्य सम्मानो न भवति। ....

(ख) प्र. कौ पुत्रं रक्षतः?

उ. मातापितरौ पुत्रं रक्षतः। ....

(ग) प्र. लक्ष्मीः कं प्राप्नोति।

उ. उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः। ....

(घ) प्र. मनुष्याः कथं कार्यं कुर्वन्ति?

उ. मनुष्याः यथाशक्ति कार्यं कुर्वन्ति। ....

3. निम्नलिखितवाक्येषु रिक्तस्थानानां पूर्तिम् उचितेन शब्देन (समस्तपदेन) कुरुत। शुद्धं पदं कोष्ठकात् चित्वा समक्षं प्रदत्तस्थाने लिखत। (4)

(1) त्वम् .... प्रक्षालय। (पाणिपादौ/पाणिपादम्)

(2) .... गावः भवितव्याः। (गृहं गृहं/प्रतिगृहं)

(3) मुनिना वने .... खादितानि। (कन्दफलमूलम्/कन्दफलमूलानि)

(4) सः .... आसीत्। (कार्येचतुरः/कार्यचतुरः)

4. अधोलिखितेषु अंशे रेखाङ्कितपदानां प्रकृतिं प्रत्ययं च पृथक्-पृथक् कृत्वा प्रदत्तसमक्षस्थाने लिख्येताम्। (5)

(1) मया पाठः <u>पठितव्यः</u> ....।

(2) <u>सेवमानः</u> शिष्यः विद्यां लभते ....।

(3) <u>बुद्धिमान्</u> सफलतां लभते ....।

(4) परिश्रमस्य <u>महत्त्वं</u> सर्वे जानन्ति ....।

(5) सर्वशून्या <u>दरिद्रता,</u> ....।

5. उचितैः अव्ययपदैः रिक्तस्थानानि पूरयत। (4)

(अव्ययानां सूची अधः प्रदत्ता)

(1) कथं त्वम् .... वदसि।


(2) अहं .... गृहं गमिष्यामि।

(3) .... विदधीत न क्रियाम्।

(4) अहम् .... न वदामि।

(अव्ययशब्दाः- मिथ्या, श्वः, शनैः शनैः, सहसा।)

6. घटिकां दृष्ट्वा लिखत सुधा कतिवादने स्वकार्यं करोति। (2)



(क) (ख) (ग) (घ) (ङ)

(क) सुधा <u>पञ्चवादने</u> उत्तिष्ठति।


(ख) सा प्रातः .... वादने समये विद्यालयं गच्छति।

(ग) विद्यालयात् सायं .... समये आगच्छति।

(घ) सा सायं .... समये गृहकार्यं करोति।

(ङ) सुधा .... वादने शयनाय गच्छति।

7. अस्यां मञ्जूषायां कति कति वस्तूनि सन्ति? (2)



....

....

....

....

....

....

8. रिक्तस्थानेषु वाच्यपरिवर्तनं क्रियताम्। (5)

	कर्तृवाच्यवाक्यानि	कर्मवाच्यवाक्यानि
(1)	सः वेदं पठति	....
(2)	....	कविभिः कविता क्रियते।
(3)	अयं ओदनं भुङ्क्ते	....
(4)	....	तैः वार्ता कथ्यते।
(5)	गोपालः गाः चारयिष्यति	..............................।

'ख' – खण्डः – लेखानकार्यम्

9. पत्रं – स्वविद्यालये समायोजितं क्रीड़ादिवसं वर्णयन् एकं पत्रं स्वमित्राय लिखत। (5)

दिनाङ्कः ....

प्रिय मित्र!

.... गतमासे अस्माकं विद्यालये .... आसीत्। विद्यार्थिनः ...., अभिभावकाश्च.................... एकत्रिता आसन्। धावन प्रतियोगितायाम् .... सर्वेषाम् .... अतिष्ठत् .... विवेकानन्द-विद्यालयः .... विद्यालयश्च द्वितीयः अतिष्ठताम्।

ततः सायम् .... वयं स्वगृहं प्रति निवृत्ताः।


भवदीयो मित्रम्

....

10. इदं चित्रं दृष्ट्वा चित्रम् आधृत्य पञ्च संस्कृतवाक्यानि लिख्यन्ताम्। (10)

शब्दसूची- (व्याधः, तण्डुलान्, मूषकः पाशम्, उदपतन्)

चित्रम्



(1) ....

(2) ....

(3) ....

(4) ....

(5) ....

अथवा 'परोपकारः' इति विषयम् अधिकृत्य एकम् अनुच्छेदं लिखत।

....

....

....

....

11. 'चित्रम्' अथवा अनुच्छेदम् अधिकृत्य प्रश्नद्वयस्य निर्माणं क्रियताम्। (5)

(1) ....

(2) ....

'ग' – खण्डः – वाचनम् **अङ्काः : 40**

12. अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि प्रदत्तस्थानेषु लिखत।

राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुम् अवदत् – हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि।

देवः रवि–शशि–तारा–मण्डलभूषितं जगदेतत् कथमिव पश्येयम् चक्षुर्हीनः।

(1) अस्मिन् गद्यांशे कः राज्ञः दानशीलतां परीक्षितुम् आगतः?
(एकेन पदेन लिखत) ....। (1)

(2) कस्य रूपं धृत्वा शक्रः बोधिसत्वम् अवदत्?
(एकवाक्येन लिखत) ....। (1)

(3) अस्मिन् गद्यांशे 'तस्य' इति पदं 'कस्मै' प्रयुक्तम् अस्ति।
.... (1)

(4) उचितेन पदेन रिक्तस्थानं पूरयतः– (1)
भवतः .... आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि।

(5) 'चक्षुर्हीनः' अत्र समासस्य नाम लिख। (1)

(6) 'शक्रः' देवाधिपतिः इन्द्रः आसीत् इदं वाक्यं शुद्धम्/अशुद्धम् वा। .... (1)

(7) 'आकर्ण्य' अत्र कः प्रत्ययः अस्ति। (1)

(8) 'नेत्रहीन–याचकस्य' अनयोः पदयोः विशेषणपदं किम्? (1)

13. इमं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

हिमांशुः– "अहं चिन्तयामि यत् "अरुणः" तु सूर्यस्य पर्यायः। अस्य प्रकाशः सर्वप्रथमं तं प्रदेशं स्पृशति। अतः अरूणस्य प्रदेशः अरुणाचलः।

पर्यटनाधिकारी – शोभनम्! उचितम् उक्तम् हिमाद्रितुङ्गशृङ्गैः सुशोभिता सूर्योदयभूमिः इयम्। अतः अरुणाचलः।

प्रश्नाः (1) '<u>अरुणः</u>' कस्य पर्यायः? (एकपदेन लिखत) (1)

(2) 'सूर्योदयभूमिः' इतिपदम् 'कस्मै' प्रयुक्तम्?
(एकवाक्येन) .... (1)

(3) 'अस्य प्रकाशः सर्वप्रथमं प्रदेशं स्पृशति। अत्र 'अस्य' पदं 'कस्मै' प्रयुक्तम् अस्ति।

.... (1)

(4) 'इयम्' पदं कस्य शब्दस्य रूपम् अस्ति?

.... (1)

(5) .... प्रदेशस्य अस्ति हिमाद्रितुङ्गशृङ्गैः सुशोभिता भूमिः।
(अस्य वाक्यस्य पूर्तिम् उचितपदेन कुरुत।) (1)

14. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत।

ध्यायतः विषयान् पुंसः संगस्तेषूपजायते।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥

प्रश्ना (1) सङ्गात् कः जायते? .... (1)
(एकपदेन लिखत)

(2) यदा कामस्य पूर्तिः न भवति तदा कस्य भावस्य उत्पत्तिः भवति?
(एकवाक्येन)

.... (2)

(3) '<u>तेषु</u>' <u>संगः</u> उपजायते। अत्र 'तेषु' कस्मै प्रयुक्तम्? (1)

(4) 'सङ्गात्' अत्र का विभक्तिः? .... (1)

15. समुचितपदेन कथानां भावः स्पष्टीक्रियताम्। (रिक्तस्थाने) (4)

(क) य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च
न कुर्यादहितं कर्म स परेभ्यः कदापि च।

उ. यः आत्मनः .... सुखानि च इच्छति, सः परेभ्यः अहितं .... कदापि च न ....।

(ख) हंसः श्वेतः बकः श्वेतः, को भेदः बकहंसयोः।
नीरक्षीरविवेके तु हंसो हंसः बको बकः॥

उ. हंसः श्वेतवर्णः, बकस्य अपि च वर्णः ....। अतः

बकहंसयोः वर्णदृष्टया कोऽपि न भेदः। परं .... एव विवेकशीलः मन्यते न तु ....।

(ग) सर्वव्यसनविनाशे को दक्षः ? सर्वथा त्यागी।

उ. त्यागी एव सर्वेषाम् .... विनाशं कर्तुम् .... भवति।

(घ) समा द्वादश पर्जन्यस्तद्राष्ट्रं नाभिवर्षति।

उ. एतेषाम् अस्त्राणां प्रयोगे सति .... पर्यन्तं तस्मिन् देशे .... न भवेत्।

16. अधोलिखितस्य श्लोकस्य अन्वयं सम्पूरयत। (4)

अचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।
कालेन पादमादत्तें पादं सब्रह्मचारिभिः॥

अन्वयः–

शिष्यः आचार्यात् ....

17. अधोलिखितकथनेषु रेखाङ्कितपदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं क्रियताम्। (4)

उदाहरणम्ः– उ. – राजा <u>वैद्यान्</u> आहूय अश्वरक्षार्थम् अपृच्छत्।

प्र. – राजा कम् आहूय अश्व–रक्षार्थम् अपृच्छत्?

(क) <u>अभीष्टं</u> वस्तुजातं प्राप्य याचकाः तुष्टाः आसन्। (i) ....

(ख) <u>कामः</u> एव अस्माकं शत्रुः (ii) ....

(ग) नरः <u>साधुवृत्तिं</u> समाचरेत् (iii) ....

(घ) संवत्सरे <u>द्वादश</u> मासाः भवन्ति (iv) ....

18. घटनाक्रमानुसारम् अधोलिखितानि वाक्यानि पुनः लिखत। (4)

(क) प्रछन्नभागधेयस्तु समुपजातविवेकः स्वगृहं प्रतिनिवृत्तः।

(ख) गुरूपदेशेन एव अनेन बालवचसा मम चक्षुषी समुन्मीलिते।

(ग) सखे यदि मां मित्रस्थाने परिगणयसि तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्।

(घ) दुष्टबुद्धिस्तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखम् प्राचलत्।

(ङ) कुमार्गमाश्रितस्य मम कीदृशीयं क्लेशपरम्परा।

(च) अद्यप्रभृति पापपथं त्यजामि इति विचिन्त्य मित्रं दुष्टबुद्धिमवदत्।

(छ) अनेन वचसा प्रतिहतान्तःकरणः प्रच्छन्नभाग्यः अचिन्तयत्। किमिदं वचनं विशेषेण मामेव लक्ष्यीकरोति।

(ज) गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत्।

(क) ....।

(ख) ....।

(ग) ....।

(घ) ....।

(ङ) ....।

(च) ....।

(छ) ....।

(ज) ....।

19. अवधीरिताः अस्माभिः गुरुजनोपदेशाः उक्तम् हि मित्ररूपाः हि रिपवः सम्भाष्यन्ते विचक्षणैः ये हितं वाक्यमुत्सृत्य विपरीतोपसेविनः। (4)



चित्रानुसारं-

श्लोकात् समुचितप्रश्नोत्तरं चित्वा अत्र रिक्त स्थाने लिखत्।

प्र. ....

उ. .... (2)

उल्लिखितपाठात् निम्नलिखितं वाक्यं सम्पूरयतः-

वानराः पश्चात्तापं कुर्वन्ति .... स्वगुरुजनस्य यूथपतेः .... अस्माभिः .... कृता, अतः वयं.............। (2)

'घ' - खण्डः

अपठितवाचनम् अङ्का : 10

20. अधोलिखितगद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

अद्य वयं बाष्पयानेन देशदेशान्तरेषु परिभ्रमामः पोतेन अनायासं नदीः समुद्राश्च तरामः विमानेन वियति स्वच्छन्दं विहरामः तडित्तारकेण नचिरादेव दूरतोऽपि संदेशं प्राप्नुमः रेडियो इत्युपकरणेन नगानां सागराणां द्वीपद्वीपान्तराणां च व्यवधानं तृणीकृत्य शब्दान् शृणुमः, दूरदर्शनेन दविष्ठमपि दृश्यमवलोकयाम् इत्यहो आधुनिकविज्ञानस्य विस्मयावहो गरिमा।

(1) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (2)

....

(2) केन साधनेन वयम् नदीः, समुद्राश्च तरामः? एकपदेन उत्तरं लिखत। (1)

....

(3) 'रेडियो' इत्युपकरणेन किं क्रियते? (एकवाक्येन) (2)

....

(4) दूरतोऽपि दृश्यं केनोपकरणेन अवलोक्यते। (1)

....

(5) गद्यांशात् उपयुक्तानि पदानि विचित्य अधोलिखितं वाक्यं पूरयत- (2)

.... नचिरात् एव दूरतोऽपि.................. वयं प्राप्नुमः।

(6) 'इत्युपकरणेन' अस्य सन्धिविच्छेदः कर्त्तव्यः ....(1)

(7) 'तडित्तारकेण' (चिरादेव/न चिरादेव) सन्देशं (1)

प्राप्नुमः .... शुद्धं कृत्वा लिखत................।

***

विंशोऽध्यायः

पाठयोजना

निश्चितलक्ष्यस्य प्राप्तये, निश्चितानामुद्देश्यानां साधनाय च कार्यप्रणाली सुनिश्चिता स्यात्। एषैव योजना इति कथ्यते। गृहनिर्माणाय पूर्वं यथा योजना निर्मीयते, तदनुसारं कार्यं क्रियते तथैव अध्यापकेन कक्ष्यायां पाठस्य बोधनात् पूर्वं बोधनकार्यस्य योजना निर्मेया भवति। एषा योजना विषयानुगुणं, छात्राणां स्तरानुसारञ्च स्यात्। मनोवैज्ञानिकैः मानवमस्तिष्कस्य त्रेधा विभागः क्रियते - ज्ञानविभागः, कौशलविभागः, सौन्दर्यविभागश्चेति। एतद्दृष्ट्या अध्याप्यविषयाणामपि त्रिधा विभागः सिध्यति - ज्ञानपाठाः, कौशलपाठाः, सौन्दर्यपाठाश्चेति। परन्तु भाषाविषये प्रायः त्रयाणामपि सम्मेलनमेव दृश्यते। तथापि प्राधान्याद्व्यपदेश इति न्यायेन मल्लग्रामवत् अयं व्यवहारः समर्थ्यते।

1. ज्ञानपाठप्रकाराः।

   नूतनशब्दज्ञानम्, गद्यपाठाः, व्याकरणम्, रचना, अनुवादः, इत्यादयः।

2. कौशलपाठप्रकाराः।

   उच्चारणं, मौखिकनिबन्धः, भाषणं, दृष्टलेखनं, श्रुतलेखनं, वाचनम् इत्यादयः।

3. सौन्दर्यपाठप्रकाराः।

   पद्यपाठाः, वर्णनं, नाटकम् इत्यादयः।

पाठयोजनानिर्माणस्य उद्देश्यानि—

1. समयानुसारं पाठनीयस्य विषयस्य निर्धारणम्।
2. पाठनीये विषये सामान्यांशानां, विशिष्टांशानाञ्च विवेचनम्।
3. विभिन्नानामंशानां पाठनाय अपेक्षितानां पद्धतीनां, शिक्षणयुक्तीनाञ्च निर्णयः।

4. विशेषांशानां समर्थनाय न्यायानाम्, उदाहरणानाञ्च सङ्ग्रहणम्।
5. शिक्षणोपकरणानां, दृश्यश्रव्योपकरणानाञ्च सञ्चयः।
6. मूल्याङ्कनप्रविधीनामुपयोगः।
7. छात्राणां स्तरानुसारं मनोवैज्ञानिकरीत्या अध्यापनाय सन्नाहः।

एतानि उद्देश्यानि मनसि निधाय पाठयोजनायाः निर्माणं कर्तव्यम्। प्रशिक्षणार्थिनः छात्राध्यापकाः विस्तृतपाठयोजनां निर्मान्ति। अनुभवशालिनः अध्यापकास्तु संक्षिप्तां योजनां लिखन्ति। विषयाध्यापनाय अपेक्षितानां पद्धतीनां, सोपानानाञ्च विवरणं पूर्वाध्यायेषु उल्लिखितम्।

लक्ष्यं विना कार्यस्य प्रारम्भः, गम्यं विना यात्रा च वृथा भवतीति कथनस्य आवश्यकता नास्ति। लक्ष्यस्य स्वरूपं ज्ञात्वा, उद्देश्यानि निश्चित्य, विचिन्त्य कृतं कार्यं निश्चितफलप्राप्त्या सार्थकं भवति। शिक्षणकार्यनिरतेन अध्यापकेन सुनिश्चितपद्धत्या योजनाबद्धतया कृतं कार्यं सफलं भवति। अतः शिक्षकः कक्ष्यायां पाठस्य पाठनात् पूर्वं तदर्थं योजनानिर्माणे कुशलः स्यात्।

1. पाठयोजनायाः निर्वचनम्—

पाठयोजनाविषये बहवः बहुधा व्याख्यान्ति। केचन पाठयोजना शिक्षणस्य निश्चिताकृतिः (Blue Print) इति कथयन्ति। अन्ये तु पाठयोजनानिर्माणं किञ्चित् सर्जनात्मकं कार्यम् (Creative work) इति ब्रुवन्ति। शिक्षणाध्ययनपरिष्ठितौ करिष्यमाणस्य कार्यस्य योजना, मार्गदर्शिका वा भवति पाठयोजनेति अभिप्रयन्ति केचित्।

बोसिंग (Bossing)—"पाठयोजना नाम निश्चितानाम् उद्देश्यानां प्राप्तये विशिष्टसाधनानां वर्णनं भवति, यया निश्चितसमये कृतस्य कार्यस्य परिणाामत्वेन उद्दिष्टफलस्य सिद्धिर्भवति।"

बिनिंग् तथा बिनिंग् (Bining & Bining)—"दैनिकपाठयोजनानिर्माणे उद्देश्यानां विवरणं, पाठ्यविषयस्य चयनं, क्रमीकरणं, प्रस्तुतीकरणस्य विधेः प्रक्रिया च प्रधानविषयाः भवन्ति।"

वैज्ञानिकः, क्रमबद्धश्च शिक्षणस्य पूर्वसन्नाहः पाठयोजना भवितुमर्हति। पाठयोजनायां छात्रस्य पूर्वार्जितं ज्ञानं, बोधनीयं नूतनज्ञानं, बोधनस्य उद्देश्यानि, बोधनस्य विधयः, सहायकानि उपकरणानि, अध्ययनार्थं छात्राणां प्रेरणस्य उपायाः,

चिन्तनस्य, स्मरणस्य, अनुभवस्य च उत्पादनाय प्रयुज्यमानाः युक्तयः, अधिगमस्य परीक्षणाय उपयुक्ताः मूल्याङ्कनप्रकाराश्च सुष्ठु निरूपिताः स्युः। पाठयोजनायाः स्वरूपविषये विद्वत्सु मतभेदाः स्युः, परन्तु तस्याः आवश्यकताविषये मतभेदो नास्ति।

शिक्षकेण निश्चिते कालांशे, छात्राणां वयः, ग्रहणशक्तिम्, आसक्तिञ्च आश्रित्य बोधनीयानां पाठ्यांशानां, अनुष्ठातव्यानां क्रियाणाञ्च काचित् सूची भवति पाठयोजना। एवं निर्मिता पाठयोजना अध्यापकेन रेखामात्रमपि अनुल्लङ्घ्य अनुसरणीयेति निर्बन्धो नास्ति। स्वयं निर्मितायां पाठयोजनायां यथोचितं परिवर्तनं कर्तुं शिक्षकस्य स्वातन्त्र्यं वर्तते। अन्यथा स्वसेवार्थं कल्पितः सेवकः स्वामिनमेव नियन्त्रयेत्। अतः शिक्षकस्य उपयोगाय पाठयोजना भवेत्, न तु पाठयोजनायाः उपयोगाय शिक्षको भवेत्।

प्रतिदिनं शिक्षणकार्यं निर्वहन् अध्यापकः अनुभवेन लब्धान् नूतनांशान् पाठयोजनायां संयोजनेन आवश्यकतानुसारं पाठयोजनायाः परिवर्तनं, परिवर्द्धनञ्च कुर्यात्। पाठ्यविषयस्य स्वभावानुसारं, स्तरानुसारञ्च पाठयोजनास्वरूपे भेदो भवत्येव।

2. पाठयोजनानिर्माणस्य लाभाः (Advantages of Lesson Planning)—

1. पाठयोजना शिक्षकं सुव्यवस्थितरूपेण चिन्तनार्थं प्रेरयति।
2. पाठयोजनाद्वारा शिक्षकः पाठस्य उद्देश्यानि सम्यगवगच्छति।
3. पाठयोजना छात्रेषु पाठं प्रति रुचिं वर्द्धयितुं सहायिका भवति।
4. पूर्वपाठेन साकं नूतनपाठस्य सम्बन्धं स्थापयति।
5. पाठयोजना 'कः पाठः, कथं पाठनीय' इति शिक्षकस्य मार्गदर्शनं करोति।
6. पाठयोजना शिक्षणोपकरणानां विषये चिन्तयितुं, तानि उपयोक्तुञ्च शिक्षकं नियोजयति।
7. उत्तमं शिक्षणविधिं विचेतुं शिक्षकं सहायति।
8. पाठयोजनाद्वारा अध्यापकः उचितान्, महत्त्वपूर्णान् प्रश्नान् प्रष्टुं समर्थो भवति।
9. छात्राणां व्यक्तिगतविभिन्नतासु श्रद्धातुं शिक्षकं प्रेरयति।

10. बोधनकालांशमाश्रित्य शिक्षणप्रक्रिया व्यवस्थिता भवति।
11. बालकानां स्तरं, पूर्वज्ञानञ्च आधारीकृत्य प्रवर्तते।
12. अध्यापके आत्मविश्वासमुत्पादयति।
13. स्वकार्यस्य मूल्याङ्कनाय अध्यापकं सहायति।
14. शिक्षकस्य स्वभावं, सामर्थ्यञ्च व्यञ्जयति।
15. अमूर्तानाम् आशयानां स्पष्टीकरणाय शिक्षकं सहायति।
16. समये समये छात्रेभ्यो दातव्यान् निर्देशान् स्पष्टीकरोति।
17. अध्यापकस्य चिन्तनरीत्यां निश्चितत्वं, नियमितत्वञ्च सम्पादयति।
18. अनन्तरपाठेषु दोषाणां निवारणेन, गुणानां स्वीकारेण च पाठयोजनायां शिक्षकः गुणवत्तां सम्पादयति।

3. उत्तमपाठयोजनायाः लक्षणानि (Characteristics of good lesson plan)—

1. निश्चितसमयें बोधनीयस्य ज्ञानस्य प्रारूपं सावधानं निर्मितं स्यात्।
2. कः विषयः, केन विधिना अध्यापितः इत्यस्य प्रमाणं भवति पाठयोजना।
3. पाठयोजना परिवर्तनयोग्या स्यात्, येन नूतनपरिष्ठितिष्वपि सा उपयोज्या भवेत्।
4. पाठयोजनायां सर्वेऽप्यंशाः स्पष्टैः शब्दैः लिखिताः स्युः।

4. पाठयोजनानिर्माणे श्रद्धेयाः विषयाः—

1. बोधनीयस्य पाठस्य विषये, तत्सम्बन्धिव्यावहारिकविषये च अध्यापकस्य पूर्णं ज्ञानं स्यात्।
2. शिक्षकः मनोविज्ञानं जानीयात्। बालकानां मनोविज्ञानमाश्रित्य शिक्षणकार्यं सम्पादयेत्। बोधनविधीन् चिनुयात्।
3. शिक्षकः शिक्षायाः दार्शनिकान्, सामाजिकांश्च आधारान् जानीयात्। तदनुसारं पाठस्य उद्देश्यानि निर्धारयेत्।
4. छात्राणां वैयक्तिकभेदान् ज्ञात्वा पाठयोजनां निर्मेयात्।

5. पाठनार्थमुपयुक्तानि वस्तूनि, दृश्यश्रव्योपकरणानि च सम्पाद्य, तेषामुपयोगप्रकारं पाठयोजनायां निर्दिशेत्।
6. पाठनार्थं निश्चितस्य समयस्य पूर्णतया, सफलतया च उपयोगाय पाठयोजना समर्था स्यात्।
7. पाठ्यविषयसम्बद्धं छात्राणां पूर्वज्ञानं निर्दिश्य, तेन साकं नूतनज्ञानस्य सम्बन्धः स्थापनीयः।
8. मनोविज्ञानस्य नियमाः, शिक्षणसूत्राणि च उपयुक्तानि भवेयुः।
9. बोधितानां सर्वेषामंशानां समुचितं मूल्याङ्कनं भवेत्।
10. पाठयोजनायाः विभिन्नेषु सोपानेषु परस्परं सम्बन्धः स्यात्।
11. पाठ्यविषयानुसारं पाठयोजनायाः स्वरूपं भवेत्।
12. पाठयोजना नातिविस्तृता स्यात्।

5. पाठयोजनायाः अङ्गानि—

सम्प्रति प्रशिक्षणमहाविद्यालयेषु पाठयोजनानिर्माणाय हर्बार्टमहोदयस्य पञ्च-सोपानानि प्रयुज्यन्ते—

1. सन्नाहः, अभिप्रेरणं वा (Preparation or Motivation)
2. उपस्थापनम् (Presentation)
3. तुलना, भावप्रतिपादनम् वा (Comparison or Abstraction)
4. सामान्यीकरणम् (Generalisation)
5. उपयोजनम् (Application)

विषयानुसारम् एतेषां सोपानानां परिवर्तनेन, उपसोपानानाञ्च संयोजनेन पाठयोजनाः निर्मीयन्ते।

1. पाठयोजनायां प्रारम्भिकं विवरणमेवं लिख्यते—

पाठयोजनायाः क्रमसंख्या

अध्यापकस्य नाम

योग्यता (Qualification)

विद्यालयस्य नाम, स्थानञ्च

कक्षा वर्गः

छात्रसंख्या बालकाः / बालिकाः मध्यायुः –

दिनाङ्कः वासरः

अन्तरम् (Period) **कालांशः** (duration)

विषयः

उपविषयः

प्रकरणम् / पाठः

पाठ्यविषयः

विद्यालयेषु प्रतिदिनम् अध्यापनं कुर्वाणानां शिक्षकाणां कृते एतादृशविवरणस्य आवश्यकता नास्ति। परन्तु प्रशिक्षणमहाविद्यालयेषु ये छात्राध्यापकाः अभ्यासार्थं विभिन्नेषु विद्यालयेषु विभिन्नान् छात्रान् पाठयन्ति, तैः एतत्सर्वं लेखनीयं भवति। शिक्षणविषये शोधकार्ये प्रवृत्तानां शोधच्छात्राणां कृतेऽपि एतादृशं विवरणम् उपकारकं भवति।

पाठ्यपुस्तके विद्यमानः विस्तृतः पाठः एकस्मिन्नन्तरे पूर्णतया पाठयितुं न शक्यते। अतः समयानुसारं पाठस्य विभजनं कृत्वा एकं परिच्छेदम् एकस्मिन्नन्तरे पाठयितुं पाठयोजना विरच्यते। तथा च पाठस्य शीर्षकाद्भिन्नं, पाठ्यविषयस्य उपशीर्षकं निर्दिश्यते। यथा—विषयः—संस्कृतम्

उपविषयः—गद्यम्

प्रकरणम् / पाठः—महात्मनः गान्धेः सत्यनिष्ठा

पाठ्यविषयः—विद्यालयस्य पर्यवेक्षणम्

2. उद्देश्यानां विवरणम्—

कस्यचिद्विषयस्य अध्ययनेन छात्राणां के के लाभाः भवन्ति, काः शक्तयः विकसिताः भवन्ति, कानि कौशलानि प्राप्यन्ते इत्येते विषयाः उद्देश्येषु स्पष्टीक्रियन्ते। उद्देश्यानां निर्धारणं विना अध्यापनं सार्थकं न स्यात्। यतः—

1. उद्देश्यानि पाठ्यविषयं स्पष्टीकर्तुम् उपयुज्यन्ते।
2. उद्देश्यानां प्राप्तये शिक्षणोपकरणानि प्रयुज्यन्ते।
3. उद्देश्यानां प्राप्तये विधीनां, प्रविधीनां, युक्तीनाञ्च प्रयोगः क्रियते।

4. उद्देश्यानां प्राप्तिः मूल्याङ्कनेन परीक्षितुं शक्यते।

5. उद्देश्यानां ज्ञानेन अध्यापकस्य कार्यसामर्थ्यं, साफल्यञ्च वर्धते।

एवञ्च पाठयोजनायाम् उद्देश्यानां लेखनस्य महत्त्वपूर्णं स्थानमस्ति। पाठ्यविषयस्य अध्ययनेन छात्राणां व्यवहारे कीदृशानि परिवर्तनानि भवितुमर्हन्तीति स्पष्टीकर्तव्यम्। यथा—

1. केनचिद्विषयेण सम्बद्धानां तथ्यानां, विचाराणाञ्च ज्ञानम्।
2. कस्यचित् सिद्धान्तस्य अवगमनम्।
3. कस्मिंश्चित् विषये आसक्तेः वर्धनम्।
4. केषाञ्चित् कौशलानां प्राप्तिः।
5. लब्धस्य ज्ञानस्य जीवने उपयोगः।

एतानि उद्देश्यानि द्विधा विभज्यन्ते सामान्योद्देश्यानि, विशिष्टोद्देश्यानि चेति।

(क) सामान्योद्देश्यानि—

विषयस्य प्रकृतिमाश्रित्य कानिचित् उद्देश्यानि सम्पूर्णस्य पाठस्य समानानि, निश्चितानि च भवन्ति। यथा—भाषाबोधने गद्यपाठस्य एतान्युद्देश्यानि भवितुमर्हन्ति—

1. पदानां वर्णक्रमस्य ज्ञानं, स्पष्टोच्चारणञ्च।
2. शब्दार्थज्ञानं, शब्दभण्डारस्य (Vocabulary) वृद्धिः।
3. वाक्यस्वरूपज्ञानम्।
4. वाक्यनिर्माणकौशलम्।
5. विषयग्रहणसामर्थ्यं, मातृभाषया अनुवादः।
6. श्रवण-भाषण-वाचन-लेखनकौशलानि।

(ख) विशिष्टोद्देश्यानि—

प्रतिपाठम् अध्यापकेन बोधनीयाः विशेषांशाः, साधनीयानि विशेषव्यवहार-परिवर्तनानि च अत्र अन्तर्भवन्ति। यथा भाषाबोधनविषये—

1. शब्दगतानि—1. नूतनशब्दानामर्थः, व्युत्पत्तिः, पर्यायाः, नानार्थाः, विलोमशब्दाः, प्रयोगज्ञानम्।
2. व्याकरणगतानि—प्रातिपदिक-लिङ्ग-विभक्तिवचनानि, धातुलकार-पुरुषवचनानि, समासाः, सन्धयः कारकाणि च।

3. विषयगतानि—विषयस्य विश्लेषणं, प्रतिपादनं, निरूपणं, समीक्षा च।
4. विचारगतानि—तत्त्वस्य अवगमनं, भावानुभूतिः, जीवनमूल्यानां निर्णयः।
5. उपयोजनात्मकानि—लब्धस्य ज्ञानस्य, कौशलानाञ्च दैनिककार्येषु उपयोगः।

3. सहायकोपकरणानि—

एतान्यपि द्विविधानि भवन्ति सामान्यानि, विशिष्टानि चेति।

(क) सामान्यानि—श्यामफलकम्, मार्जनी, सुधाखण्डः, सूचिकादण्डः, पाठ्यपुस्तकञ्च।

(ख) विशिष्टानि—रेखाचित्राणि, वर्णचित्राणि, मानचित्राणि, प्रतिकृतयः, यथार्थवस्तूनि, दृश्यश्रव्योपकरणानि च।

4. पूर्वज्ञानम्—

ज्ञातः विषयः सरलः, अज्ञातः नूतनः विषयश्च कठिनः भवति। नूतनविषयस्य बोधने ज्ञातादज्ञातं प्रति, सरलात् कठिनं प्रति इत्यादीनां शिक्षणनियमानां प्रयोगाय पाठ्यविषये छात्रैः ज्ञातचराः अंशाः के के सन्तीति स्पष्टं निरूपणीयं भवति। पूर्वकक्ष्यासु, पाठ्यपुस्तकस्य पूर्वपाठेषु वा अधीतानां विषयाणाम् आधारेण पूर्वज्ञानं लेखितुं शक्यते। छात्राणां सामान्यं लोकज्ञानमपि अत्र अन्तर्भवति।

एतावता शिक्षणकार्यस्य पूर्वरङ्गं सिद्धं भवति। इतः परम् अध्यापकः कक्ष्यायां शिक्षणकार्यं कथं सम्पादयेदिति पाठयोजनायां निरूप्यते।

1. प्रस्तावना—

अध्यापकः पाठस्य बोधनात्पूर्वं छात्रान् अध्ययनार्थं सन्नद्धान् कुर्यात्। यदि छात्राणां मनः अध्ययने नासक्तं, तर्हि अध्यापनं व्यर्थं स्यात्। यतः अध्यापकेन बोधिताः विषयाः छात्राणां बुद्धौ न प्रविशन्ति। अतः अध्ययनार्थं छात्राणाम् उन्मुखीकरणम्, पाठ्यविषये आसक्त्युत्पादनञ्च कर्तव्यम्। किञ्च असम्बद्धः विषयः बुद्ध्या न गृह्यत इति हेतोः पाठनीयस्य नूतनविषयस्य छात्राणां पूर्वज्ञानेन सह सम्बन्धः स्थापनीयः।

एवञ्च अध्यापकः छात्रैः ज्ञातचरम्, आसक्तिकरं, जिज्ञासोत्पादकं कञ्चन विषयमादाय पाठ्यविषयस्य प्रस्तावनां कुर्यात्। यदा कश्चन दीर्घपाठः खण्डशः

पाठ्यते तदा पूर्वखण्डे पाठितानां विषयाणां स्मारणेन प्रस्तुतखण्डस्य प्रस्तावना क्रियते।

एषा प्रस्तावना प्रश्नोत्तररूपेण, कथाकथनेन, गीतगानेन वा भवितुमर्हति। एतेन छात्राणाम् अन्यत्रासक्तं मनः ततो निवर्त्य प्रस्तुतपाठस्य अध्ययने आसज्यते।

2. उद्देश्यकथनम्—

यदा छात्राणां मनः अध्ययनार्थं सन्नद्धं भवति तदा विषयगतं, विचारगतं वा पाठस्य प्रधानमुद्देश्यं छात्राणां पुरः उपस्थाप्यते। एतत् उद्देश्यकथनं पाठ्यविषयस्य केन्द्रबिन्दुं बोधयति। अध्ययनस्य दिग्दर्शनञ्च करोति।

3. विषयबोधनम्—

अध्यापकः पूर्वनिश्चितानि उद्देश्यानि साधयितुं पाठ्यांशान् क्रमशः पाठयति। तत्र मुख्यांशाः श्यामफलके लेखनीयाः। अन्येषां दृश्यश्रव्योपकरणानां प्रयोगः यथासम्भवं कर्तव्यः। छात्राणां विचाराः ग्रहीतव्याः, तेषां संशयाः निवारणीयाः। एवं वस्तुनिष्ठैः मूल्याङ्कनप्रश्नैः छात्राणामधिगमः परीक्षणीयः। इत्थं सर्वमध्यापनं छात्राणामध्यापकस्य च क्रियासु प्रतिक्रियासु च अधिष्ठितं स्यात्।

(a) श्यामपट्टकार्यम्—

विषयस्य स्पष्टीकरणाय अध्यापकेन श्यामपट्टे लेखनीयानि चित्राणि, मुख्यांशाश्च पूर्वनिश्चिताः पाठयोजनायामुल्लिखिताः स्युः।

(b) सारांशकथनम्—

विस्तृतरूपेण विषयस्य व्याख्यानानन्तरम् अध्यापकः पाठस्य सारांशं संक्षेपेण कथयेत्। छात्रानपि सारांशं वक्तुं निर्दिशेत्। तेन च छात्राणां ग्रहणशक्तिः, संश्लेषणसामर्थ्यञ्च वर्द्धेत।

(c) मूल्याङ्कनप्रश्नाः—

छात्राणां ग्रहणशक्तिं, स्मरणशक्तिञ्च वर्द्धयितुम् अध्यापकः पाठ्यांशानां बोधनसमये विभिन्नप्रकारान् मूल्याङ्कनप्रश्नान् पृच्छेत्। तेन छात्राः अध्ययने सावधानाः स्युः।

4. पुनरावृत्तिः—

पाठितानां पाठ्यांशानां पुनरेकवारं पाठनमवश्यं छात्राणाम् उपकाराय कल्पते। सामान्यैः, मन्दैश्च छात्रैः अज्ञाताः विषयाः ज्ञाताः स्युः। संशयग्रस्ताः, अस्पष्टाश्च

विषयाः स्पष्टीकृताः भवेयुः। छात्राणां विषयज्ञानस्य दृढत्वं, स्थायित्वञ्च सम्पादितं स्यात्।

5. अभ्यासकार्यम्—

अत्र कक्ष्याकार्यं, गृहकार्यञ्च अन्तर्भवति।

कक्षाकार्यम्—अध्ययनेन लब्धं ज्ञानमाश्रित्य छात्राः किञ्चित् प्रायोगिकं कार्यं कुर्युः। तदर्थमध्यापकः किञ्चित् मौखिकं, लिखितं वा कार्यं छात्रैः कक्ष्यायां कारयति। गृहकार्यं कर्तुं एतत् ज्ञानं भूमिकायते।

गृहकार्यम्—अधीतस्य विषयस्य अभ्यासार्थं, जीवने दैनिककार्येषु उपयोगार्थञ्च किञ्चित् निर्माणात्मकं कार्यं गृहे कर्तुमध्यापकः छात्रान् नियोजयति। एवञ्च छात्राः विरामसमये अध्येतुम्, अधिकं ज्ञानमार्जयितुञ्च प्रेरिताः भवन्ति। छात्राणां समयं, शक्तिञ्च ज्ञात्वा परिमितमेव गृहकार्यं दातव्यम्।

6. आत्मपरीक्षणम् (Self Evaluation)—

पाठयोजनायाः अन्ते किञ्चित् रिक्तं स्थलमेतदर्थं स्यात्। पाठस्य बोधनात्परमध्यापकः बोधने प्रवृत्तान् दोषान्, परिवर्तनीयान्, योजनीयान् वा अंशान् लिखेत्। भविष्ये पुनः पाठनाय एतेऽंशाः उपकारकाः भवन्ति।

पाठयोजनासंख्या – 1

विद्यालयस्य नाम — श्रीरामचन्द्रगुरुकुलविद्यालयः।

अध्यापकस्य नाम — रामकृष्णः।

दिनाङ्कः	—	5.8.07	वासरः	—	सोमवासरः।
अन्तरम्	—	द्वितीयम्।	अवधिः	—	चत्वारिंशत् निमेषाः।
कक्ष्या	—	षष्ठी।	विभागः	—	'क'।
छात्रसंख्या	—	पञ्चत्रिंशत्।	छात्राणां मध्यायुः	—	एकादशवर्षाणि।
विषयः	—	संस्कृतम्।	उपविषयः	—	कथा।
पाठ्यविषयः	—	शुनकस्य मूर्खता।			

मूर्खः शुनकः

बुभुक्षितः एकः शुनकः वने भ्रमति। तत्र एकं मांसखण्डं लभते। मांसखण्डं

मुखे स्थापयित्वा गच्छति। मार्गे एका कुल्या अस्ति। तत्र क्रमणाय एकः सेतुः अस्ति। सेतौ गच्छन् शुनकः जले स्वप्रतिबिम्बं पश्यति। तम् अपरं शुनकं मत्वा उच्चैः भषति। शुनकस्य मुखे विद्यमानः मांसखण्डः जले पतति। विषण्णः शुनकः पुनः आहारस्य अन्वेषणाय भ्रमति।

1. सामान्योद्देश्यानि—

1. श्रवण-वाचन-भाषण-लेखनकौशलानामुत्पादनम्।
2. स्पष्टोच्चारणस्य अभ्यासः।
3. संस्कृतकथानां पठने आसक्त्युत्पादनम्।
4. छात्राणां कल्पनाशक्तेः जागरणम्।
5. कथारचनाशैल्याः परिचयः।

2. विशिष्टोद्देश्यानि—

1. नूतनशब्दानां परिचयः — बुभुक्षितः, कुल्या, क्रमणं, प्रतिबिम्बं, विषण्णः, भ्रमति, भषति।
2. व्याकरणांशानां ज्ञानम्

   धातूनां लटि प्रयोगः — भ्रमति, पश्यति इत्यादयः।

   क्त्वाप्रत्ययस्य प्रयोगः — स्थापयित्वा, मत्वा।
3. विचारज्ञानम्

   शुनकस्य मूर्खतायाः विश्लेषणम्।

3. बोधनोपकरणानि—

सामान्यानि — पाठ्यपुस्तकं, श्यामफलकं, सुधाखण्डः, मार्जनी, सूचिकादण्डः।

विशिष्टानि — कथाविषयप्रतिपादकं चित्रम्।
दर्पणः - प्रतिबिम्बमिति पदस्यार्थबोधनाय।

4. पूर्वज्ञानम्—

छात्राः पशुपक्ष्यादीनां कथाः जानन्ति। शुनकः, मांसखण्डः, वनम् इत्यादिशब्दानामर्थं जानन्ति। गच्छति, अस्ति इत्यादिक्रियापदानि परिचितानि।

सोपानानि (Steps)	अध्यापनबिन्दवः। (Teaching points)	अधिगमविशेषाः (Learning outcome)	अध्यापकच्छात्रक्रियाः। (Teacher - pupil activities)	मूल्याङ्कनम् (Evaluation)
1. **प्रस्तावना** Introduction	शुनकस्य उपयोगः।	कथापठने छात्राणाम् आसक्तिकल्पनम्।	अ- के के जन्तवः गृहे पाल्यन्ते? छा- मार्जारः, शुनकः, गौः, अजा, कुक्कुटः। अ- शुनकः किमर्थं पाल्यते? छा- शुनकः गृहं संरक्षति। छा- शुनकः स्नेहशीलः भवति। छा- शुनकः विश्वासपात्रं भवति। छा- शुनकः चोरान् भाययति। अ- शुनकः बुद्धिमान् वा? मूर्खो वा? छा- शुनकः बुद्धिमान्।	
2. **उद्देश्यकथनम्** Statement of aim	शुनकस्य मूर्खता।	प्रस्तुतकथापठने जिज्ञासोत्पादनम्।	अ- कश्चन शुनकः मूर्खः अस्ति। तस्य मूर्खतामधिकृत्य पठिष्यामः।	
3. **प्रस्तुतीकरणम्** Presentation				
1. **आदर्शवाचनम्**	कथावाचनम्।	छात्राणां श्रवणकौशलस्य सम्पादनम्	अध्यापकः द्विवारं कथां स्पष्टं वाचयति। छात्राः पाठ्यपुस्तकं पश्यन्तः श्रद्धया शृण्वन्ति।	

2. **अनुवाचनम्**	छात्राः कथां वाचयन्ति।	वाचनकौशलस्य सम्पादनम्।	अध्यापकेन निर्दिष्टाः छात्राः कथां वाचयन्ति।	स्पष्टमुच्चारयत।
3. **अशुद्धिसंशोधनम्**	बुभुक्षितः, भ्रमति, मांसखण्डं, स्थापयित्वा।	स्पष्टोच्चारणस्य सम्पादनम्।	बुबुक्षितः × बुभुक्षितः √ ब्रमति × भ्रमति √ मांसगण्डं × मांसखण्डं √ मांसकण्टं × स्तापयित्वा × स्थापयित्वा √	सुभिक्षम्, भ्रमः खण्डनम् स्थानम् अशुद्धिं शोधयत। लबते, भमति, भुबुक्षितः
4. **काठिन्यनिवारणम्**	बुभुक्षितः, कुल्या, क्रमणम्, प्रतिबिम्बम्, विषण्णः, भ्रमति, भषति।	पदार्थज्ञानम्।	बुभुक्षितः बालकः अन्नं खादति। व्रीहिक्षेत्रे जलं कुल्याद्वारा गच्छति। नद्याः क्रमणाय नौका उपयुज्यते। दर्पणे प्रतिबिम्बं दृश्यते। (प्रत्यक्षविधिना दर्पणं प्रदर्श्यते।) विषण्णः = दुःखितः। व्याघ्रः वने भ्रमति। शुनकः चोरं दृष्ट्वा भषति।	अर्थं वदत। बुभुक्षितः, कुल्या, क्रमणम्, भ्रमति, भषति।

5. **विषयबोधनम्**	कथा।	कथाज्ञानम्।	अध्यापकः अनुवादविधिना, चित्रस्य साह्येन कथां बोधयति। अ- बुभुक्षितः शुनकः कुत्र भ्रमति? छा- बुभुक्षितः शुनकः वने भ्रमति। अ- स किं लभते? छा- सः मांसखण्डं लभते। अ- सः जले किं पश्यति ? छा- सः जले स्वप्रतिबिम्बं पश्यति। अ- सः किमर्थं भषति ? छा- स्वप्रतिबिम्बम् अपरं शुनकं मत्वा भषति। अ- सः कुतः विषण्णः ? छा- मांसखण्डः नष्टः इति विषण्णः।	पूरयत— शुनकः — मार्गे — अस्ति। कुल्यायाः उपरि — अस्ति। शुनकः मांसखण्डं —स्थापयति। मांसखण्डः — पतति। सः आहारार्थं पुनः — ।

6. सारांशकथनम्	कथासंक्षेपः	सारांशज्ञानम्।	बुभुक्षितः शुनकः वने मांसखण्डं लभते। जले स्वप्रतिबिम्बं दृष्टवा भषति। मांसखण्डः जले पतति। विषण्णः सः पुनः आहारार्थं भ्रमति।	कथां संक्षेपतः वदत।
7. विचारविश्लेषणम्।	कथाविचारः।	समीक्षाज्ञानम्, ज्ञानस्य विकासः।	अ– शुनकः अपरं शुनकं दृष्टवा किमर्थं भषति ? छा– शुनकः अपरं शुनकं शत्रुं मत्वा भषति। छा– अपरः शुनकः मांसखण्डम् अपहरति इति मत्वा भषति। छा– अयं शुनकस्य स्वभावः। अ– शुनकः जले स्वप्रतिबिम्बं दृष्टवा किमर्थं भषति? छा– स्वप्रतिबिम्बं दृष्टवा अपरः शुनकः अस्तीति चिन्तयति। छा– प्रतिबिम्बं सत्यमिति चिन्तयति।	

			अ– प्रतिबिम्बं सत्यं वा? असत्यं वा? छा– प्रतिबिम्बम् असत्यं भवति। अ– मूर्खाः असत्यं सत्यमिति चिन्तयन्ति। अतः अयं शुनकः मूर्खः।	
8. **मौनवाचनम्।**	कथायाः अवगमनम्।	मौनवाचनस्य अभ्यासः।	अध्यापकः छात्रान् मौनवाचनाय निर्दिशति। मौनवाचनात् परम् अज्ञातांशान् प्रष्टुं सूचनां ददाति।	
IV. **पुनरावृत्तिः।** Recapitulation	मुख्यांशाः।	संशयनिवारणम्। अधिगमस्य दृढीकरणम्।	अ– अर्थं वदत। कुल्यायाः क्रमणाय सेतुः अस्ति। शुनकः मांसखण्डं मुखे स्थापयित्वा गच्छति। सेतौ गच्छन् शुनकः जले स्वप्रतिबिम्बं पश्यति। तम् अपरं शुनकं मत्वा उच्चैः भषति। मांसखण्डः	

			जले पतति। विषण्णः शुनकः पुनः आहाराय भ्रमति।	
V. **कक्षाकार्यम्।**	वाक्यप्रयोगः।	मौखिकं कार्यम्।	वाक्ये प्रयोजयत — भ्रमति, भषति, पश्यति, गच्छति।	
गृहकार्यम् Assignment	कथालेखनम्। काकजम्बुकयोः कथा।	लब्धस्य ज्ञानस्य उपयोगः, रचनाकौशलम्	एतानि पदानि उपयुज्य काकजम्बुकयोः कथां लिखत। गानं, गीतं, मनोहरं, वञ्चयितुं, श्रोतुं, इच्छामि, श्रावय।	

पाठयोजनासंख्या - 2

(पूर्वपाठयोजनायामिव सामान्यपरिचयः लेखनीयः।)

कक्ष्या — सप्तमी।

मध्यायुः — द्वादशवर्षाणि।

विषयः — संस्कृतम्। उपविषयः — पद्यम्।

पाठ्यविषयः — आश्रयहीनस्य कवेः विरसता।

पद्यम्

तावत् कोकिल! विरसान् यापय दिवसान् वनान्तरे।
यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति॥

1. सामान्योद्देश्यानि—

1. श्रवण-वाचन-भाषण-लेखनकौशलानामुत्पादनम्।
2. संस्कृतपद्यानां वाचने आसक्त्युत्पादनम्।
3. संस्कृतपद्यानां भावग्रहणे सामर्थ्योत्पादनम्।

2. विशिष्टोद्देश्यानि—

1. नूतनशब्दानां परिचयः — यावत् - तावत्,
   विरसः, अन्तरम्, अलिः, समुल्लसति।
2. व्याकरणांशानां ज्ञानम् — सन्धिः — यावत् + मिलत्
   समासः — वनान्तरम्, मिलदलिमालः।
3. विचारविश्लेषणम्—कोकिलव्याजेन कविना स्वदुर्दशायाः प्रतिपादनम्।

3. बोधनोपकरणानि—

सामान्यानि— श्यामफलकं, सुधाखण्डः, मार्जनी, सूचिकादण्डः, पाठ्यपुस्तकम्।

विशिष्टानि— 1. वनान्तरे कस्मिंश्चिद् वृक्षे स्थितस्य विरसस्य कोकिलस्य चित्रम्।
2. भ्रमरपङ्क्तिभिर्युते पुष्पिते आम्रवृक्षे विराजमानस्य कोकिलस्य चित्रम्।

4. पूर्वज्ञानम्—

वसन्तर्तौ आम्रवृक्षेषु मधुरं कूजतः कोकिलान् छात्राः जानन्ति। भ्रमराः पुष्पेषु विद्यमानं मधु पिबन्तीति च जानन्ति।

सोपानानि Steps	अध्यापनबिन्दवः। Teaching Points	अधिगमविशेषाः Learning outcome	अध्यापकच्छात्रक्रियाः। Teacher - pupil activities	मूल्याङ्कनम् Evaluation
1. **प्रस्तावना** Introduction	वसन्ते कोकिलस्य सरसता।	पद्यपठनाय छात्राणामभिमुखीकारणम्।	(सरसस्य कोकिलस्य चित्रं प्रदर्श्य) अ- कोकिलः कदा मधुरं कूजति? छा- वसन्ततौं कोकिलः मधुरं कूजति। अ- वसन्ततौं आम्रवृक्षः कथं विलसति? छा- वसन्ततौं आम्रवृक्षः नवपल्लवैः, कुसुममञ्जरीभिश्च विलसति। छा- भ्रमराः कुसुमेषु मधु पिबन्ति। अतः आम्रवृक्षः भ्रमरैः विलसति। अ- कोकिलः आम्रपल्लवान्	

			खादित्वा मधुरं कूजति। आम्र-पल्लवानामभावे कोकिलः कीदृशो भवति? छा– कोकिलः विषण्णो भवति।	
2. **उद्देश्यकथनम्** Statement of aim	विषण्णस्य कोकिलस्य सम्बोधनम्।		अ– विषण्णस्य कोकिलस्य विषये पण्डितराजेन जगन्नाथेन रचितं पद्यं पठिष्यामः।	एतत् पद्यं केन रचितम्? पण्डितराजेन जगन्नाथेन रचितम्।

3. प्रस्तुतीकरणम्। Presentation 1. आदर्शवाचनम्	पद्यवाचनम्।	श्रवणकौशलम्।	अध्यापकः छात्रान् पुस्तकं द्रष्टुं, श्रद्धया श्रोतुञ्च निर्दिशति। द्विवारं पद्यं स्पष्टं वाचयति। छात्राः शृण्वन्ति।	
2. अनुवाचनम्	छात्राणां पद्यवाचनम्।	पद्यवाचनकौशलम्।	अध्यापकेन निर्दिष्टाः छात्राः पद्यं वाचयन्ति।	
3. अशुद्धिसंशोधनम्।	यावन्मिलददलिमालः।	स्पष्टोच्चारणम्।	यावन् -मिलद् - अलि - मालः	
4. काठिन्यनिवारणम्	यावत् - तावत्	पदार्थज्ञानम्।	यावत् अध्यापकः आगच्छति तावत् छात्राः कोलाहलं कुर्वन्ति। यावत् वसन्तः नागच्छति तावत् कोकिलः मधुरं न कूजति।	वाक्ये प्रयोजयत। यावत्-तावत् अन्तरम्.

	विरसः अन्तरम्		सरसः × विरसः सिंहः गुहान्तरे वसति। वनान्तरे क्रूरमृगाः भवन्ति।	
	अलिः	पर्यायज्ञानम्।	भ्रमरः षट्पदः, मधुपः, अलिः, मधुव्रतः इत्येते समानार्थकाः।	अर्थं वदत। अलिः।
	रसालः यावत् + मिलदलिमालः	सन्धिज्ञानम्।	रसालः = आम्रः। तत् + मम = तन्मम। तावत् +, मधुरं = तावन्मधुरम्।	रसालः। सन्धत्त। जगत् + माता
	मिलदलिमालः	समासविग्रहज्ञानम्।	मिलन्तः अलयः – मिलदलयः। मिलदलीनां माला यस्मिन् सः (आम्रः) मिलदलिमालः।	जगत् + नाथः यावत् + मिलति
5. **पदच्छेदः**	पद्यम्	पदविभागज्ञानम्।	तावत्, कोकिल, विरसान्, यापय, दिवसान्, वनान्तरे। यावत्, मिलदलिमालः, कः, अपि, रसालः, समुल्लसति।	पदविभागं वदत।

6. **अन्वयः**	वाक्यरूपम्	अन्वयज्ञानम्	हे कोकिल! यावत् मिलदलिमालः कोऽपि रसालः समुल्लसति, तावत् वनान्तरे विरसान् दिवसान् यापय।	अन्वयं वदत।
7. **विषयबोधनम्**	विषण्णस्य कोकिलस्य वर्णनम्।	पद्यार्थज्ञानम्	(विरसस्य कोकिलस्य चित्रं प्रदर्श्यते) कविः कोकिलं सम्बोधयति। हे कोकिल! यावत् मिलद्भिः भ्रमर-पङ्क्तिभिः कोऽपि आम्रवृक्षः विराजते, तावत् वनमध्ये विरसान् दिवसान् यापय। यदा कोऽपि आम्रवृक्षः तव पोषकः मिलिष्यति तदा तव जीवितं सरसं भविष्यतीत्यर्थः।	पद्यस्य अर्थं वदत।
8. **सारांशकथनम्**	पद्यस्य सारांशः	सारांशज्ञानम्	अधुना तव पोषकः पल्लवैः कुसुमैश्च युक्तः आम्रवृक्षः नास्ति। अतः	सारांशं वदत।

			हे कोकिल! त्वं वनमध्ये अज्ञातस्सन् विरसान् दिवसान् यापय। यदा आम्रपल्लवानां खादनेन तव कण्ठस्य माधुर्यं भवति। तदा जनाः त्वां प्रशंसन्ति। तव जीवितं सरसं भविष्यति।	
9. **भावविश्लेषणम्।** (Analysis of central idea)	पद्यस्य भावः।	सौन्दर्यानुभूतिः।	अत्र कविः आत्मगतं भावं कोकिलव्याजेन कथयति। पुरा कविताप्रियाः उदाराः राजानः कवीन् पोषयन्ति स्म। राजाश्रयरहिताः कवयः कष्टेन कालं यापयन्ति स्म। राजाश्रयलाभेन कवेः सौख्यं, यशश्च भवति। यावत् उदारः पोषकः राजा न लभ्यते, तावत् कविना विरसाः दिवसाः यापनीयाः इति भावः।	अस्य पद्यस्य भावं वदत।

			अत्र ललितानां पदानां प्रयोगः पद्यस्य सौन्दर्यं वर्धयति।	
10. **मौनवाचनम्** Silent reading	पद्यस्य मननम्।	मौनवाचनस्य अभ्यासः।	अध्यापकः छात्रान् मौनवाचनाय निर्दिशति।	
IV. **पुनरावृत्तिः** Recapitulation	मुख्यांशाः।	संशयनिवारणम्। अधिगमस्य दृढीकरणम्। स्मरणशक्तेः विकासः।	अ- इदं पद्यं केन रचितम् ? छा- इदं पद्यं पण्डितराजेन जगन्नाथेन रचितम्। अ- कविः कं सम्बोधयति? छा- कविः कोकिलं सम्बोधयति। अ- कोकिलः कदा मधुरं कूजति? छा- वसन्ततौं आम्रपल्लवान् खादित्वा कोकिलः मधुरं कूजति। अ- कवेः जीवितं कदा सरसं भवति?	

			छा- राजाश्रयलाभे कवेः जीवितं सरसं भवति। अ- कियत्पर्यन्तं कविना विरसाः दिवसाः यापनीयाः? छा- यावत् राजाश्रयो न लभ्यते तावत् कविना विरसाः दिवसाः यापनीयाः।	
V. **कक्षाकार्यम्।** Class work	वाक्यप्रयोगः।	मौखिकं कार्यम्।	वाक्ये प्रयोजयत। सरसः, यावत् - तावत्, समुल्लसति।	
गृहकार्यम्। Home Assignment	पक्षिणां वर्णनम्।	सौन्दर्यानुभूतेर्विकासः। रचनाकौशलम्	पक्षिणां वर्णनात्मकानि दश वाक्यानि लिखत।	

पाठयोजनासंख्या - 3

(सामान्यपरिचयः पूर्ववत् लेखनीयः।)

कक्ष्या — अष्टमी।

छात्राणां मध्यायुः — त्रयोदशवर्षाणि।

विषयः — संस्कृतम्। उपविषयः—व्याकरणम्।

पाठ्यविषयः — वृद्धिसन्धिः।

1. सामान्योद्देश्यानि—

1. संस्कृतभाषायाः स्वरूपस्य, स्वभावस्य च परिचयः।
2. सन्धौ स्वराणां विपरिणामस्य ज्ञानम्।
3. उदाहरणानां, सन्धिनियमस्य च ज्ञानम्।
4. सन्धिनियमस्य भाषायां प्रयोगस्य ज्ञानम्।

2. विशिष्टोद्देश्यानि—

1. वृद्धिसन्धेः उदाहरणानां ज्ञानम्।
2. वृद्धिसन्धेः नियमस्य ज्ञानम्।
3. वृद्धिसन्धेः अपवादानां ज्ञानम्।
4. वृद्धिसन्धिनियमस्य प्रयोगज्ञानम्।

3. बोधनोपकरणानि—

सामान्यानि — श्यामफलकं, सुधाखण्डः, मार्जनी, सूचिकादण्डः।

विशिष्टानि — वृद्धिसन्धेः उदाहरणानां, नियमस्य, अपवादानाञ्च लिखितपत्राणि।

4. पूर्वज्ञानम्—

छात्राः सवर्णदीर्घसन्धेः गुणसन्धेश्च नियमं, उदाहरणानि च जानन्ति। वृद्धिसन्धेः कानिचित् उदाहरणान्यपि जानन्ति।

सोपानानि Steps	अध्यापनबिन्दवः। Teaching Points	अधिगमविशेषाः Learning outcome	अध्यापकच्छात्रक्रियाः। Teacher - pupil activities	मूल्याङ्कनम् Evaluation
1. प्रस्तावना	तदासौ मुनीन्द्रः नरेन्द्रं दृष्ट्वैवम्।	पूर्वज्ञानाधारेण प्रस्तुतविषयाध्ययनाय छात्राणां प्रेरणम्।	अ– तदासौ मुनीन्द्रः विश्वामित्रः नरेन्द्रं दशरथं दृष्ट्वैवम् अवदत्। अत्र संहितानां पदानां विभागं कुरुत। छा– तदा + असौ = तदासौ – सवर्णदीर्घसन्धिः। मुनि + इन्द्रः = मुनीन्द्रः – " नर + इन्द्रः = नरेन्द्रः – गुण-सन्धिः। अ– दृष्टवा + एवम् = दृष्ट्वैवम्। अत्र कः सन्धिः? (समस्यात्मकः प्रश्नः)	
2. उद्देश्यकथनम्	वृद्धिसन्धिः।	उद्देश्यज्ञानम्।	अ– अयं वृद्धिसन्धिः। अधुना वृद्धिसन्धेः नियमं पठिष्यामः।	

3. **प्रस्तुतीकरणम्**	आगमनविधिः। उदाहरणानि।	अ, आ + ए = ऐ (उदाहरणपत्रस्य साह्येन) अ, आ + ऐ = ऐ अ, आ + ए, ऐ = ऐ	अत्र + एकः = अत्रैकः, अ + ए = ऐ सदा + एव = सदैव, आ + ए = ऐ जन + ऐक्यम् = जनैक्यम्, अ + ऐ = ऐ त्वया + ऐश्वर्यम् = त्वयैश्वर्यम्, आ + ऐ = ऐ अ, आ + ए, ऐ = ऐ	सन्धत्त— तत्र + एव = तदा + एवम् = राष्ट्र + ऐक्यम् = तथा + ऐच्छत्=
		अ, आ + ओ =औ अ, आ + औ = औ	घन + ओघः = घनौघः, अ + ओ = औ शर्करा + ओदनः = शर्करौदनः, आ + ओ = औ दिव्य + औषधम् = दिव्यौषधम्, अ + औ = औ महा + औत्सुक्यम् = महौत्सुक्यम्, आ + औ = औ	क्षीर + ओदनः = यथा + ओषधिः = भोजन + औत्सुक्यम् = महा + औषधम् =

		अ, आ + ओ, औ = औ	अ, आ + ओ, औ = औ	
		अ + ऋ - आर्	प्र + ऋच्छति = प्रार्च्छति, अ + ऋ = आर्	उप + ऋच्छ-ति =
		सामान्यनियम-सम्पादनम् (लिखितपत्रस्य साह्येन)	व्याकरणशास्त्रे आ, ऐ, औ इति त्रयाणां वर्णानां वृद्धिरिति संज्ञा। ऋकारस्य स्थाने वृद्धिः आकारः रपरः आर् भवति।	वृद्धिसंज्ञकाः वर्णाः के ?
			अवर्णस्य एकारे, ऐकारे च परे ऐकारः, ओकारे, औकारे च परे औकारः, ऋकारे परे आर् च आदेशाः भवन्ति। अयमेव वृद्धिसन्धिः इति व्यवह्रियते।	अ, आ + ए, ऐ = अ, अ + ओ, औ = अ + ऋ =
	अपवादः	निगमनविधिः। अपवादानां परिशीलनम्	प्र + एजते = प्रेजते। उप + ओषति = उपोषति।	अप + एजते = अव + ओषति =

		अ + ए = ए अ + ओ = ओ (लिखितपत्रस्य साह्येन)	अकारान्तादुपसर्गात् एकारादौ ओकारादौ च धातौ परे पररूपं भवति। उप + एति = उपैति प्र + एधते = प्रैधते अवर्णान्तात् उपसर्गात् इण्धातौ, एधधातौ च परे वृद्धिर्भवति।	अव + एति = उप + एधते =
		अ + ओ = ओ, औ	स्थूल + ओतुः = स्थूलोतुः, स्थूलौतुः। बिम्ब + ओष्ठम् = बिम्बोष्ठम्, बिम्बौष्ठम्। समासे ओतु, ओष्ठ इति शब्दयोः परयोः विकल्पेन वृद्धिर्भवति। वृद्ध्यभावे पररूपं भवति। सप्त + ऋषयः = सप्तर्षयः – गुणसन्धिः	कृश + ओतुः = अधर + ओष्ठम् =

		निष्कर्षः। वृद्धिसन्धेः नियमस्वरूपम्। (लिखितपत्रस्य साह्येन)	अव + ऋच्छति = अवार्च्छति। अकारान्तस्योपसर्गस्य ऋकारादौ धातौ परे वृद्धिः आर् भवति। अपवादान् विहाय सामान्यतः अवर्णस्य एकारैकारयोः परयोः ऐकारः, ओकारौकारयोः परयोः औकारश्च आदेशो भवति। अकारान्तोपसर्गस्य ऋकारादौ धातौ परे आर् भवति। अयं वृद्धिसन्धेः नियमः।	वृद्धिसन्धेः सामान्यनियमः कः ?
IV. **पुनरावृत्तिः**	वृद्धिः नियमः उदाहरणानि	अधीतविषये दृढत्वसम्पादनम्।	वृद्धिः इति केषां वर्णानां संज्ञा? आ, ऐ, औ ऐकारः कुत्र आदेशो भवति? अ, आ + ए, ऐ = ऐ औकारः कुत्र आदेशो भवति? अ, आ + ओ, औ = औ आर् कुत्र आदेशो भवति?	

			अकारान्तस्योपसर्गस्य ऋकारादौ धातौ परे आर् आदेशो भवति। महा + ऋषिः = महर्षिः - गुणसन्धिः। अप + ऋच्छति = अपार्च्छति। वृद्धिसन्धिः।	
V. कक्षाकार्यम्		लब्धस्य ज्ञानस्य परीक्षणम्।	सन्धत्त। तव + एव + एतत् पुस्तकम्। सा + एषा बाला त्वया दृष्टा। अत्र मम + औषधं न + एव अस्ति। भक्षण + औत्सुक्यं परित्यज।	
गृहकार्यम्।		लब्धज्ञानस्य प्रयोगः	1. वृद्धिसन्धेः दश उदाहरणानि पाठ्यपुस्तकात् सञ्चित्य लिखन्तु।। 2. अस्मिन् वाक्ये वृद्धिसन्धेः उदाहरणानि नियमानुसारं निरूपयन्तु। भोजनौत्सुक्यं त्यक्त्वा, तिक्तौषधं, गुडौदनञ्च गृहीत्वा अधुनैव शीघ्रं गच्छ।	

❖❖❖

एकविंशोऽध्यायः

सूक्ष्मशिक्षणम्

(Micro Teaching)

अध्यापकप्रशिक्षणक्षेत्रे नवीनाविष्कारो भवति सूक्ष्मशिक्षणम्। शिक्षणस्य जटिलप्रक्रियायाः अभ्यासे क्लेशमनुभवतां छात्राध्यापकानां कार्ये सरलतासम्पादनेन तान् समाश्वासयति सूक्ष्मशिक्षणम्। शिक्षणकौशलानां विकासेन उत्तमाध्यापकानां निर्माणाय उपयुक्तः प्रायोगिको विधिरयम्। स्टेन्फोर्ड्विश्वविद्यालयस्य अनुसन्धानविकासकेन्द्रे क्रि.प. 1960 तमे वर्षे आविष्कृतमिदं सूक्ष्मशिक्षणं क्रि.प. 1970 तमे वर्षे बरोडानगरस्थेन 'शिक्षायाः उच्चाध्ययनकेन्द्रेण' भारते प्रसारितम्।

1. सूक्ष्मशिक्षणस्य निर्वचनम्—

वी.एम् शोर—'अल्पः समयः, अल्पसंख्यकाः छात्राः, सरला शिक्षणक्रिया यत्र प्रशिक्षणार्थं प्रयुज्यन्ते सः प्रविधिः सूक्ष्मशिक्षणम्' इत्युच्यते।

एलन्, ईव् च—'विशिष्टेषु शिक्षणकौशलेषु अवधानं सम्पादयितुं, नियन्त्रितपरिष्ठितिषु शिक्षणाभ्यासं कर्तुञ्च अनुकूला नियन्त्रिता अभ्यासव्यवस्था सूक्ष्मशिक्षणं कथ्यते।'

अत्र सामान्यकक्ष्याशिक्षणे विद्यमानानामंशानां लघूकरणेन 'लघूकृतं कक्ष्याशिक्षणं सूक्ष्मशिक्षणम्' इति वदन्ति। (Miniaturised classroom teaching)

श्रीवास्तवः, सिंहः, रायश्च—'सूक्ष्म शब्दस्य कश्चन गूढार्थोऽपि भवितुमर्हति। यतः सूक्ष्मशिक्षणे कौशलानां लघुषु अंशेषु विभजनेन तेषु सूक्ष्मतया प्रशिक्षणं दीयत इति अस्मिन् सन्दर्भे सूक्ष्मशब्दस्य प्रयोगः उचितः स्यात्' इति।

प्रशिक्षणार्थिनां छात्राध्यापकानां, सेवारतानां शिक्षकाणाञ्च शिक्षणकौशलानां विकासाय प्रयुज्यमानायाः एतस्याः प्रक्रियायाः मूलभूताः सिद्धान्ताः उदाह्रियन्ते।

2. सूक्ष्मशिक्षणस्य सिद्धान्ताः—

एलन्, रियाँन् महोदयाभ्यां प्रतिपादिताः पञ्च सिद्धान्ताः। यथा—

1. सूक्ष्मशिक्षणं वास्तविकशिक्षणं भवति।
2. साधारणकक्ष्याशिक्षणस्य जटिलतानां न्यूनीकरणेन सरलता सम्पाद्यते।
3. सकृत् एकस्यैव कौशलस्य अभ्यासः क्रियते।
4. अभ्यासप्रक्रिया सुष्ठु नियन्त्रिता भवति।
5. स्वकार्यस्य परिणामस्य ज्ञानेन छात्राध्यापकस्य प्रतिपुष्टेः प्रभावस्य परिधिः विस्तृतो भवति।

3. सूक्ष्मशिक्षणस्य स्वरूपम्—

पारम्परिकप्रशिक्षणस्य विधानेन साकं तुलनया सूक्ष्मशिक्षणस्य प्रशिक्षणस्वरूपं स्पष्टीभवति।

	पारम्परिकप्रशिक्षणम्		सूक्ष्मशिक्षणेन प्रशिक्षणम्
1.	छात्रसंख्या-	35 तः 60	10 तः 15
2.	पाठ्यविषयः-	विस्तृतः	एकः पाठ्यांशः
3.	समयः-	40 निमेषाः	6-10 निमेषाः
4.	कौशलानि-	बहूनि संश्लिष्टानि	एकं कौशलम्
5.	पाठयोजना-	विस्तृता	सूक्ष्मपाठयोजना
6.	प्रतिपुष्टिः-	अनिश्चिता	निश्चिता
7.	अभ्यासः-	एकवारं, द्विवारं वा	कौशलप्राप्तिपर्यन्तम्
8.	उपकरणानि-	न सन्ति	V.C.R., C.C.T.V., Tape recorder
9.	विश्लेषणम्-	प्रशिक्षकाणां मत्यनुसारम्	अन्तःक्रियाविश्लेषण प्रविधयः FIAC प्रभृतयः

4. सूक्ष्मशिक्षणप्रक्रिया—

प्रशिक्षकाः छात्राध्यापकानां शिक्षणकौशलानां विकासाय सूक्ष्मशिक्षणप्रक्रियया अनेन क्रमेण प्रशिक्षयन्ति। यथा—

1. प्रशिक्षकः सूक्ष्मशिक्षणसम्बद्धसाहित्यस्य बोधनेन सैद्धान्तिकज्ञानं, VCR यन्त्रेण शिक्षणकौशलस्य, आदर्शपाठानां प्रदर्शनेन व्यावहारिकज्ञानञ्च छात्राध्यापकेषु उत्पादयति।
2. छात्राध्यापकेन अभ्यासार्थं चितस्य शिक्षणकौशलस्य विषये विशदं विवरणं कृत्वा, प्रशिक्षकः तस्य कौशलस्य मनोवैज्ञानिकान् आधारान् विवेचयति।
3. चितस्य शिक्षणकौशलस्य अवगमनाय उपयुक्तान् आदर्शपाठान् प्रदर्श्य, प्रशिक्षकः, तत्र प्रयुक्तान् शिक्षणकौशलव्यवहारान् विशदीकरोति।

   एताः क्रियाः प्रस्तावनास्तरेण (Introductory Session) सम्बद्धाः, प्रतिरूपणनाम्नि (Modeling) सूक्ष्मशिक्षणघटके अन्तर्भवन्ति।
4. प्रशिक्षकस्य मार्गदर्शनानुसारं छात्राध्यापकः एकस्य कौशलस्य प्राप्तये, एकं पाठ्यांशमाश्रित्य सूक्ष्मपाठयोजनां लिखति।
5. प्रशिक्षकस्य निर्देशानुसारं छात्राध्यापकः दश, पञ्चदश वा छात्रान् 6–10 निमेषपर्यन्तम् अध्यापयति। एतदध्यापनं सर्वं निपुणाः निरीक्षकाः प्रशिक्षकाः CCTV माध्यमेन निरीक्षन्ते। VCR यन्त्रेण तस्य सङ्ग्रहणं क्रियते। नो चेत् ध्वनिमुद्रणयन्त्रेण (Tape recorder) शब्दमुद्रणं क्रियते।

   एताः क्रियाः शिक्षणस्तरेण (Teaching session) सम्बद्धाः, विन्यासघटके (Setting) अन्तर्भवन्ति।
6. सूक्ष्मपाठस्य बोधनानन्तरं प्रशिक्षकः FIAC अन्तःक्रियाविश्लेषणेन विमर्शनं कृत्वा, VCR यन्त्रेण मुद्रितपाठस्य प्रदर्शनेन छात्राध्यापकं गुणदोषान् बोधयति। अपेक्षितानि परिवर्तनानि सूचयति।

   एताः क्रियाः विमर्शनस्तरेण (Critique session) सम्बद्धाः, प्रतिपुष्टिघटके अन्तर्भवन्ति।
7. प्रशिक्षकस्य सूचनाः आश्रित्य छात्राध्यापकः अपेक्षितानि परिवर्तनानि कृत्वा पुनः पाठयोजनां निर्माति।

8. लब्ध्वां प्रतिपुष्टिमाश्रित्य पुनर्निर्मितपाठयोजनानुसारं छात्राध्यापकः अन्यं छात्रवर्गं पुनः पाठयति। तस्य मुद्रणं, निरीक्षणञ्च क्रियते।

9. प्रशिक्षकः पूर्ववत् पुनः विमर्शनं करोति। प्रतिपुष्टिञ्च प्रस्तौति। छात्राध्यापकः अपेक्षितस्तरे कौशलस्य सिद्धये सूक्ष्मशिक्षणचक्रम् आवर्तयति।

एवं प्रत्येकं कौशलानि सम्पाद्य, तेषां कौशलानां परस्परं संयोजनस्यापि अभ्यासं करोति। ततः यथार्थकक्ष्याशिक्षणाय छात्राध्यापकः समर्थो भवति।


सूक्ष्मशिक्षणप्रक्रियायाः स्तराः, क्रियाः, घटकाश्च पट्टिकामाध्यमेन स्पष्टीक्रियन्ते।

सूक्ष्मशिक्षणप्रक्रिया

स्तराः (Phases)	**क्रियाः** (Activities)	**घटकाः** (Components)
1. प्रस्तावनास्तरः (Introductory)	1. सम्बद्धसाहित्यस्य अध्ययनम् 2. आदर्शपाठस्य निरीक्षणम् 3. शिक्षणकौशलविश्लेषणम्	प्रतिरूपणम् (Modeling)
2. शिक्षणस्तरः (Teaching session)	1. पाठयोजनानिर्माणम् 2. सूक्ष्मपाठबोधनम्	विन्यासः (Setting)
3. विमर्शनस्तरः (Critique session)	1. गुणदोषज्ञानम् 2. परिवर्तनानां निर्णयः	प्रतिपुष्टिः (Feedback)
4. संयोजनस्तरः	1. कौशलानां संयोजनेन अध्यापनस्य अभ्यासः 2. यथार्थकक्ष्याशिक्षणम्	वास्तवशिक्षणा-भ्यासः

सूक्ष्मशिक्षणप्रक्रियायां प्रयुक्तानां सोपानानाम् आवृत्तिः सूक्ष्मशिक्षणचक्ररूपेण (Micro teaching cycle) प्रदर्श्यते। यथा—

सूक्ष्मशिक्षण-चक्रम्



सूक्ष्मशिक्षणस्य विभिन्नेषु प्रयोगेषु उपयुक्तस्य समयस्य विवरणम्—

	सोपानानि	स्टेनफोर्ड विश्वविद्यालयः	डी.ए.वी. कालेज् देहरादून्	सूक्ष्मशिक्षणस्य भारतीयं प्रतिमानम्
1.	योजना	—	—	12 निमेषाः
2.	शिक्षणम्	5 निमेषाः	6 निमेषाः	6 निमेषाः
3.	प्रतिपुष्टिः	10 निमेषाः	10 निमेषाः	6 निमेषाः
4.	पुनर्योजना	15 निमेषाः	7 निमेषाः	10निमेषाः
5.	पुनः शिक्षणम्	5 निमेषाः	6 निमेषाः	6 निमेषाः
6.	पुनः प्रतिपुष्टिः	10 निमेषाः	6 निमेषाः	6 निमेषाः
	योगः	45 निमेषाः	35 निमेषाः	46 निमेषाः

5. सूक्ष्म शिक्षणस्य भारतीयं प्रतिमानम् (Indian Model of Micro teaching-IMM)

भारते NCERT, CASE, इन्दौर् विश्वविद्यालयः इत्यादिसंस्थानां प्रयासैः सूक्ष्मशिक्षणस्य भारतीयं प्रतिमानं विकसितमभूत्। अस्य विशेषाः निरूप्यन्ते।

1. बहुमूल्यवतां यन्त्राणां (CCTV., VCR., Tape Recorder) स्थाने प्रशिक्षिताः निरीक्षकाः अपेक्षितान् विषयान् पत्रेषु लिखन्ति।
2. उचितैः निर्देशैः प्रतिपुष्टिः प्रदीयते।

3. प्रयोगशालाया: अभावे अनुरूपितपरिष्ठितिषु (Simulated conditions) प्रशिक्षणं सम्पाद्यते।
4. यथार्थच्छात्राणां स्थाने सहप्रशिक्षणार्थिन: छात्रा: भवन्ति।
5. सहप्रशिक्षणार्थिन: निरीक्षणं, विमर्शनं, निर्देशनञ्च कुर्वन्ति।

एवमल्पव्ययेन, छात्राणां हानिं विना सूक्ष्मशिक्षणस्य प्रयोग: क्रियते।

6. सूक्ष्मशिक्षणस्य लाभा: (Advantages of Micro teaching)

1. सूक्ष्मशिक्षणेन प्रशिक्षणप्रक्रिया सरला भवति।
2. छात्राध्यापका: क्रमश: योग्यतानुसारं शिक्षणकौशलेषु अधिकारं प्राप्नुवन्ति।
3. प्रतिपुष्टिलाभेन छात्राध्यापका: प्रोत्साहिता: भवन्ति।
4. छात्राध्यापकानां शिक्षणकार्यस्य विमर्शनं पक्षपातरहितं, वस्तुनिष्ठञ्च भवति।
5. स्वाशयप्रकटने, निरूपणे च छात्राध्यापक: स्वतन्त्रो भवति।
6. प्रशिक्षक: छात्राध्यापकस्य मार्गदर्शको भवति।
7. कक्ष्याशिक्षणस्य जटिलता न्यूनीकृता भवति।
8. अनेन प्रशिक्षणेन छात्राध्यापका: आत्मविश्वासं प्राप्नुवन्ति।
9. चिन्तनशीला: छात्राध्यापका: शिक्षणप्रक्रियाया: सूक्ष्मांशान् सम्यक् अवगच्छन्ति।
10. एवं प्रशिक्षिता: छात्राध्यापका: शोधकार्येऽपि प्रवृत्ता: स्यु:।

7. सूक्ष्मशिक्षणस्य सीमा: (Limitations of Micro teaching)—

1. प्रशिक्षणस्यायं विधि: अतीव सङ्कुचित:, यान्त्रिकश्च।
2. सूक्ष्मशिक्षणं यथार्थशिक्षणात् भिन्नं, कृत्रिमञ्च भवति।
3. शिक्षणकौशलानां पृथक्-पृथक् अभ्यासेन तेषां संयोजने क्लेश: भवति।
4. अत्र प्रशिक्षणार्थं बहुसमय: अपेक्ष्यते, समयस्य हानिरपि भवति।

5. छायाग्राहकयन्त्राणां पुरः शिक्षणस्य अभिनयं कर्तुमुद्युक्तः छात्राध्यापकः सम्भ्रान्तो भवति।
6. छात्राध्यापकेन यथोचितं प्रतिपुष्टिः न लभ्यते।
7. छात्राध्यापकस्य स्वाभाविकदोषाणां निराकरणाय उपायाः न प्रयुज्यन्ते।

8. सूक्ष्मशिक्षणस्य उपयोगाः (Uses of Micro Teaching)—

अस्य विधेः विभिन्नाः पक्षाः शिक्षणप्रक्रियायाम् उपयुक्ताः भवन्ति। अत्र सिद्धान्तस्य, व्यवहारस्य च अन्योन्याश्रयणेन उभयत्र संशोधनस्य अवसरो वर्तते। 'सरलात् जटिलं प्रतिं', 'अंशात् पूर्णं प्रति', 'अभ्यासेन कौशलप्राप्तिः', 'प्रयत्नपराजयप्रणाली' इत्यादीनां मनोविज्ञानस्य सिद्धान्तानां प्रायोगिकम् अध्ययनं सम्भवति। अयं प्रशिक्षणविधिः शिक्षणकलायां दक्षताप्राप्तौ अतीव उपकारको भवति।

रामदेव कथूरिया महोदयेन सूक्ष्मशिक्षणस्य उपयोगाः सङ्गृहीताः सन्ति। यथा—

1. सूक्ष्मशिक्षणं शिक्षकाणां वृत्तिसामर्थ्यं वर्द्धयति।
2. सेवारतानाम् अध्यापकानां रूक्षव्यवहारान् परिष्कर्तुं, दुरभ्यासान् निवारयितुञ्च उपयुक्तोऽयं विधिः।
3. छात्राध्यापकानां कौशलानि विकासयितुं समर्थोऽयं विधिः।
4. सूक्ष्मशिक्षणेन प्रशिक्षितः शिक्षकः स्वकीयं शिक्षणकार्यं स्वयं समीक्षितुं समर्थो भवति।
5. अयं प्रशिक्षणविधिः निरीक्षणप्रक्रियायाः नूतनं रूपं प्रस्तौति।
6. प्रयोगशालायाम् उत्पन्नः प्रवृद्धश्चायं विधिः शिक्षकं भाविकाले निरन्तरम् अनुसन्धानाय प्रेरयति।

प्रशिक्षणमहाविद्यालयेषु यद्ययं विधिः समीचीनरीत्या प्रयुज्यते चेत् शिक्षणकुशलाः उत्तमाः अध्यापकाः निर्मिताः भवेयुरित्यत्र नास्ति संशयः।

द्वाविंशोऽध्यायः

शिक्षणकौशलानि

कमपि विषयं सुष्ठु बोधयितुं, छात्राणामासक्तिं, चिन्तनशक्तिञ्च पूर्णं समयं संरक्षितुम् अध्यापकेन स्वायत्तीकर्तव्यानि कानिचित् शिक्षणकौशलानि अत्र विचार्यन्ते।

1. प्रश्नकौशलम्

उद्दिष्टमुत्तरं प्राप्तुं प्रश्नानां स्वरूपं, स्वभावश्च युक्तं स्यात्। प्रश्नस्य कानिचित् लक्षणान्यत्र प्रदर्श्यन्ते।

(a) कन्निङ्घम्—'प्रश्नः एकं शाब्दिकमाध्यमं यद्द्वारा व्यक्तिविशेषात् उत्तरम् आकाङ्क्ष्यते' इति।

(b) जंगीरा—'मस्तिष्कं प्रबोधयितुं, चिन्तनशक्तिं जागरयितुम्, अवधानं रक्षितुञ्च उपयुक्तं शाब्दिकमाध्यममेव प्रश्नः' इति।

(c) डॉ. वी. मुरलीधर शर्मा—'निर्दिष्टोद्देश्यमनुलक्ष्य व्यक्तिविशेषात् समाधान-निष्कासनाय उपयुक्तं शाब्दिकमाध्यमं प्रश्नः' इति।

एवञ्च शिक्षणप्रक्रियां निरन्तरमग्रेसारयितुं, छात्राणां चिन्तनशक्तिं प्रेरयितुं, शाब्दिकप्रतिक्रियां प्राप्तुञ्च शब्दात्मकः प्रेरको भवति प्रश्न इति निश्चेतुं शक्यते। सन्दर्भानुसारं कक्ष्यायां प्रश्नानां रचने, उचितरीत्या प्रयोग च अध्यापकः समर्थः स्यात्। एतादृशं सामर्थ्यमेव प्रश्नकौशलमित्युच्यते।

I. कक्ष्यायां सन्दर्भानुसारं समुचितप्रश्नानां प्रयोगाय अध्यापकस्य अपेक्षिताः योग्यताः उत्पाद्यन्ते। यथा—

1. पाठ्यविषयज्ञानम्—बोधनीये विषये अध्यापकस्य पूर्णं गभीरं ज्ञानं भवेत्। तस्य चिन्तनं क्रमबद्धं स्यात्। प्रश्नानामुत्तराणाञ्च सम्बन्धं ज्ञात्वा उद्दिष्टमुत्तरं प्राप्तुं समुचितः प्रश्नः प्रष्टव्यः। विषयस्य विश्लेषणं, तुलनां, नियन्त्रणञ्च अध्यापकः सम्यक् जानीयात्। छात्राणां प्रश्नानां सरलं, तृप्तिकरञ्च उत्तरं देयात्।

2. प्रश्नरचनासामर्थ्यम्—प्रश्नः यावच्छक्यं ह्रस्वः, सरलश्च भवेत्। प्रश्ने विद्यमानानि पदानि निर्दिष्टार्थानि, असन्दिग्धानि च स्युः। अध्यापकः बालकानां भाषाज्ञानेन, विचारैश्च परिचितः स्यात्। अध्ययने छात्राणां प्रेरणाय, आसक्त्युत्पादनाय, अवधानस्य संरक्षणाय, चिन्तनशक्तेः, स्मरणशक्तेश्च वर्धनाय विभिन्नप्रकारान् प्रश्नान् रचयितुम् अध्यापकः समर्थः स्यात्।

3. मूल्याङ्कनयोग्यता—अध्यापकः समयस्य मूल्यं, शिक्षणस्य साफल्यञ्च ज्ञात्वा प्रश्नान् कुर्यात्। अनुचिताः, व्यर्थाश्च प्रश्नाः न भवेयुः। छात्राः अपि विषयसम्बद्धानेव प्रश्नान् पृच्छेयुः।

4. आत्मविश्वासः—अध्यापकः पूर्वाभ्यासं कृत्वैव छात्राणां सम्मुखं शिक्षणम् आरभेत। तथापि अप्रतीक्षिताः केचन प्रश्नाः छात्रैः पृष्टाः स्युः। तदा अध्यापकः आत्मविश्वासेन उत्तरं वदेत्। विषयज्ञानं, धैर्यं, प्रतिभा, सद्यःस्फूर्तिश्च अध्यापकस्य सहायकानि भवन्ति।

II. प्रश्नकौशलघटकाः—कक्षायां प्रश्नानां प्रयोगे अध्यापकेन अभ्यसनीयाः चत्वारः घटकाः सन्ति। ते च—

1. वेगः—अध्यापकेन प्रश्नकरणे उचितः समयः पालनीयः। अतिवेगेन, अतिमन्दतया वा प्रश्नः न प्रष्टव्यः। वेगतायाम् अस्पष्टता, अर्थानवबोधश्च जायेत। मन्दतायां समयस्य अपव्ययः, भाषणे कृत्रिमता च भवेत्। अतः प्रश्नवेगः छात्राणां ग्रहणयोग्यतायाः अनुकूलः भवेत्। यदि छात्राः प्रश्नं स्पष्टं श्रोतुम्, अर्थं ज्ञातुञ्च न प्रभवन्ति तर्हि उत्तरदाने असमर्थाः भवन्ति। प्रश्नस्य पुनरावर्तनेन समयः वृथा स्यात्।

2. कण्ठस्वरः—अध्यापकस्य कण्ठस्वरः श्रवणयोग्यः, अर्थद्योतकश्च भवेत्। प्रश्नस्य भावानुसारं कण्ठस्वरस्य परिवर्तनम् आवश्यकं भवति। प्रश्नगतानां केषाञ्चित् पदानां बलेन उच्चारणम् अभीष्टम् उत्तरं द्योतयति। छात्राः प्रश्नस्य भावं ज्ञात्वा समुचितम् उत्तरं दातुं चिन्तयन्ति।

3. विरामः (Pause)—प्रश्नस्य स्वरूपं यदि दीर्घं भवति तर्हि द्वित्राणां पदानां मध्ये लघुविरामः छात्राणां श्रवणे, अर्थग्रहणे च सौकर्यं कल्पयति। प्रश्नकरणानन्तरं छात्रैः उत्तरं स्मर्तुं, चिन्तयितुं वा यथोचितं विरामो देयः। विरामोऽयं प्रश्नस्य उचितोत्तरदानाय अपेक्षितं समयं कल्पयति।

4. वितरणम् (Distribution)—प्रश्नाः सर्वेषु छात्रेषु समानतया वितीर्णाः

स्युः। उत्तरं वक्तुम् अवसरम् अलभमानाः छात्राः निरुत्साहाः भवन्ति। तेषां प्रश्नश्रवणेऽपि श्रद्धा विनश्यति। अध्यापकः छात्रविशेषमुद्दिश्य प्रश्नं न पृच्छेत्। सम्पूर्णां कक्ष्यामुद्दिश्य प्रश्नः प्रष्टव्यः। तदा सर्वे छात्राः प्रश्नं श्रोतुम्, उत्तरं चिन्तयितुञ्च सन्नद्धाः भवन्ति। किञ्च छात्राः येन क्रमेण उपविशन्ति तेनैव क्रमेण प्रश्नाः न प्रष्टव्याः। यस्य छात्रस्य क्रमः समाप्तः सः प्रश्नं न शृणुयात्। अतः अध्यापकः छात्राणां बुद्ध्यनुसारं प्रश्नकरणे निपुणः स्यात्।

III. प्रश्नस्वरूपघटकाः—अध्यापकेन प्रश्नानां निर्माणे श्रद्धेयाः चत्वारः घटकाः भवन्ति। ते च—

1. शुद्धता—प्रश्नघटकाः शब्दाः, प्रश्नार्थकं वाक्यञ्च व्याकरणदृष्ट्या शुद्धं स्यात्। तेन अर्थबोधः असन्दिग्धः स्यात्। छात्राः अपि शुद्धानां प्रश्नानां रचने, उत्तरदाने च समर्थाः भवेयुः।

2. सम्बद्धता—प्रश्नाः पाठ्यविषयेण, शिक्षणस्य उद्देश्यैश्च सम्बद्धाः स्युः। प्रस्तावना-प्रश्नाः छात्राणां पूर्वज्ञानेन, मूल्याङ्कनप्रश्नाः, पुनरावृत्तिप्रश्नाः, गृहकार्यप्रश्नाश्च कक्ष्यायां बोधितैः पाठ्यांशैः सम्बद्धाः भवेयुः। असम्बद्धाः प्रश्नाः अध्यापकस्य परिश्रमं, समयञ्च व्यर्थं कुर्वन्ति।

3. संक्षिप्तता—प्रश्नस्य स्वरूपं यावच्छक्यं संक्षिप्तं स्यात्। तत्र अनावश्यकपदानि न योजनीयानि। संक्षिप्तस्य प्रश्नस्य स्मरणे, अर्थावगमने च छात्राणां सौकर्यं भवेत्।

4. विशिष्टता—यस्य प्रश्नस्य उत्तरं निश्चितं भवति, तादृशः वस्तुनिष्ठः प्रश्नः विशिष्टो भवति। यस्य प्रश्नस्य उत्तरम् अनिश्चितम्, अतिविस्तृतं वा भवति, सः प्रश्नः छात्राणां भ्रामको भवति। यथा—व्यासस्य विषये भवान् किं जानाति? इति प्रश्नस्य छात्रः किमप्येकं निश्चितमुत्तरं दातुं न प्रभवति। तेन कक्ष्यायां सन्दिग्धता, समयस्य अपव्ययश्च सम्भवति।

IV. प्रश्नप्रकाराः—

1. स्मृतिप्रश्नाः—छात्रैः पूर्वं पठितानां पाठ्यांशानां स्मारणाय उपयुक्ताः एते स्मृतिप्रश्नाः इत्युच्यन्ते।

2. विचारोद्बोधकप्रश्नाः—छात्राणां चिन्तनशक्तिमुद्बोधयितुं प्रयुक्ताः एते विचारोद्बोधकप्रश्नाः भवन्ति। (विकासात्मकप्रश्नाः)

3. शिक्षणप्रश्नाः—पाठ्यविषये आसक्तिमुत्पादयितुं, छात्राणामवधानं संरक्षितुं, अवगमनं स्थिरीकर्तुञ्च शिक्षणप्रश्नाः उपयुज्यन्ते।

4. परीक्षणप्रश्नाः—उद्देश्यानां सिद्धिं ज्ञातुं, छात्रैः लब्धस्य ज्ञानस्य परीक्षणाय च (मूल्याङ्कनाय) उपयुक्ताः एते परीक्षणप्रश्नाः (मूल्याङ्कनप्रश्नाः) इत्युच्यन्ते।

5. पुनरावृत्तिप्रश्नाः—एकवारं बोधितानामपि पाठ्यांशानां पुनर्बोधनस्य आवश्यकतां ज्ञातुम् एतादृशाः प्रश्नाः पृच्छ्यन्ते। छात्रैः ज्ञाताः, अज्ञाताः, अस्पष्टतया ज्ञाताश्च के अंशाः सन्तीति ज्ञात्वा अध्यापकः पुनरेकवारं पाठ्यांशान् बोधयति।

V. प्रश्नानां प्रयोजनानि—

1. पूर्वज्ञानस्य परीक्षणम्
2. ज्ञातांशानां स्मारणम्
3. जिज्ञासायाः उद्बोधनम् (अभिप्रेरणम्)
4. उपलब्धि-परीक्षणम्
5. छात्राणां मानसिकशक्तीनां विकासः
6. अवधानस्य सम्पादनम्
7. छात्राणां वैयक्तिकभेदानां ज्ञानम्
8. शिक्षणकार्यस्य सफलतायाः ज्ञानम्

2. व्याख्यानकौशलम्

वि आङ् इत्युपसर्गद्वयपूर्वकात् 'चक्षिङ्' व्यक्तायां वाचि इति धातोः ल्युट्प्रत्यये निष्पन्नोऽयं व्याख्यानशब्दः स्पष्टप्रतिपादनमित्यर्थम् आख्याति।

पासी, जङ्गीरा च—'विषयविशेषे व्यक्तेः पूर्वज्ञानं वर्धयितुं, व्यक्तिमवबोधयितुं वा शिक्षकेण कथितानाम् अन्तस्सम्बद्धकथनानां समूहो व्याख्यानम्' इति।

शास्त्राणां, काव्यानाञ्च व्याख्यानाय प्राचीनैरुपलक्षितं व्याख्यानस्य लक्षणं तावत्—

"पदच्छेदः, पदार्थोक्तिः, विग्रहो, वाक्ययोजना।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्॥" इति।

सन्धीनां विच्छेदेन पदानां स्पष्टप्रतिप्रत्तिः, पदार्थस्य स्पष्टीकरणम्,

समासादिवृत्तीनां विशेषार्थप्रतिपादनम्, पदार्थानां परस्परसम्बन्धेन सम्पूर्णस्य वाक्यार्थस्य बोधनम्, वाक्यार्थभूते विषये संशयस्य, विरोधस्य, समस्यायाः वा उद्भवे तस्य समाधानं परिष्कारश्चेति व्याख्यानस्य स्वरूपं वर्णितमस्ति।

1. प्रक्रिया

अधुना विद्यालयेषु, कलालयेषु, विश्वविद्यालयेषु च छात्राणां स्तरानुसारं, समयानुसारञ्च विषयाणां व्याख्यानं क्रियते। व्याख्यानप्रक्रियायां व्याख्याता अध्यापकः, श्रोतारः छात्राः, व्याख्येयविषयाश्च इति त्रयः घटकाः भवन्ति। व्याख्यानं उद्देश्यविशेषस्य साधकं स्यात्। अध्यापकः व्याख्यानस्य मध्ये छात्रान् प्रश्नान् प्रष्टुमर्हति। स्वसंशयान् प्रष्टुं, स्वविचारान् प्रकटयितुञ्च छात्राणामवसरं दद्यात्। व्याख्यातव्यः विषयः उदाहरणैः स्पष्टीकर्तव्यः, युक्तिभिः, न्यायैश्च प्रतिपादनीयः, उपक्रमात् उपसंहारपर्यन्तं विभिन्नानामंशानां व्याख्यानं वैज्ञानिकं क्रमम् आश्रित्य भवेत्। कश्चन सिद्धान्तः विचारो वा व्याख्यानस्य केन्द्रबिन्दुः स्यात्। तस्य सम्यगुपपादनेन, छात्राणाम् अवबोधनेन अध्यापकः कृतकृत्यः स्यात्। अनावश्यकाः, असम्बद्धाश्च विषयाः व्याख्याने न प्रविशेयुः। तत्र अध्यापकः जागरूकः स्यात्।

2. व्याख्यानप्रकाराः

विषयस्वभावमाश्रित्य व्याख्यानं त्रिविधं भवितुमर्हति।

1. विवरणात्मकं व्याख्यानम्—निष्कृष्टं कञ्चित् सिद्धान्तं, लक्षणं वा बोधयितुं विश्लेषणात्मकं यत् व्याख्यानं क्रियते तत् विवरणात्मकं व्याख्यानं भवति। ध्वनिसिद्धान्तं, काव्यलक्षणं वा विषयीकृत्य प्रवृत्तं व्याख्यानमस्य उदाहरणं भवितुमर्हति।

2. वर्णनात्मकं व्याख्यानम्—प्राकृतिकसौन्दर्यस्य, मानसिकभावानाञ्च रमणीयतया प्रतिपादनं वर्णनात्मकं व्याख्यानं भवति। शब्दगतम्, अर्थगतञ्च हृदयाह्लादकं सौन्दर्यमध्यापकः छात्रान् बोधयति। काव्यानामध्यापनमस्य उदाहरणं भवति।

3. वैज्ञानिकं व्याख्यानम्—हेतूनामुपपादनेन सिद्धान्तस्य प्रतिपादनं वैज्ञानिकं व्याख्यानमित्युच्यते। कस्यचित् नवीनस्य विज्ञानसूत्रस्य, सिद्धान्तस्य वा बोधनाय युक्तियुक्तानि कारणानि प्रबोध्य अन्ते सिद्धान्तस्य प्रतिपादनं क्रियते। भूमिः गोलाकृतिरिति समर्थयितुं विभिन्नानि निदर्शनानि प्रदर्श्य, विषयोऽयं सिद्धान्तत्वेन प्रतिपाद्यते।

यद्यपि व्याख्यानरीतेः प्राधान्यमाश्रित्य त्रिधा भेदः प्रतिपाद्यते, तथापि यथोचितं त्रयाणां सम्मिश्रणमपि भवितुमर्हति। यथा—काव्यलक्षणस्य व्याख्यानं विवरणात्मकं, काव्यवर्णनात्मकं, वैज्ञानिकञ्च स्यात्। प्राधान्येन व्यपदेशाः भवन्ति।

3. व्याख्यानकौशलम्

उत्तमव्याख्यानस्य स्पष्टता, संक्षिप्तता, आकर्षकता, आवश्यकांशयुक्तता, रोचकता इत्येते गुणाः भवन्ति। साङ्केतिकैः, शाब्दिकैश्च क्रियाविशेषैः उद्दिष्टलक्ष्यसिद्धये निर्दिष्टरीत्या निर्मितस्य विषयस्य प्रस्तुतीकरणं व्याख्यानकौशलमित्युच्यते।

4. व्याख्यानकौशलघटकाः—

एते द्विविधाः भवन्ति—1. साङ्केतिकाः (अशाब्दिकाः), 2. शाब्दिकाश्चेति। व्याख्यानं फलवत्तरं विधातुमेते उपकारकाः भवन्ति। तत्र साङ्केतिकास्तावत्—1. प्रेरकपरिवर्तनम् 2. मुखम् 3. कण्ठस्वरः 4. हस्तौ 5. चलनम् 6. मौनञ्च।

शाब्दिकास्तु—1. उपक्रमः 2. संयोजकशब्दाः 3. मुख्यांशाः 4. अवबोधप्रश्नाः इति।

1. प्रेरकपरिवर्तनम्—अध्यापकः व्याख्यानसमये सर्वदा भाषणमेव करोति चेत् छात्राणामवधानं तत्र दीर्घकालं न तिष्ठति। अतः चित्राणां, वस्तूनां प्रदर्शनं, श्यामफलके मुख्यबिन्दूनां, चित्राणाञ्च लेखनम् प्रेरकपरिवर्तनाय अवसरं कल्पयति।

2. मुखम्—भ्रूभङ्गः, अधरदंशनञ्च असहनं, क्रोधञ्च व्यञ्जयतः। मौनं, तीक्ष्णदृष्टिश्च अनुशासनाभावं नियन्त्रयितुं प्रयुज्येते। नेत्रविस्फारः विस्मयम्, उत्साहञ्च सूचयतः। समीचीनोत्तरदाने मुखे प्रसन्नता, मन्दहासश्च छात्रस्य प्रशंसां द्योतयतः। एवमध्यापकस्य स्थिरदृष्टिः, नेत्रचालनञ्च व्याख्येयविषयगतानंशान् स्पष्टीकर्तुमुपयुज्येते। शाब्दिकमर्थं स्पष्टीकर्तुं मुखभावाः बहुधा उपयुज्यन्ते।

3. कण्ठस्वरः—अध्यापकस्य स्वरः श्राव्यः, गम्भीरश्च भवेत्। उच्चारणं शुद्धं, स्पष्टञ्च भवेत्। भाषणमतिवेगेन, अतिशनैर्वा न स्यात्। भावानुसारं स्वरः उच्चैः, नीचैश्च भवितुमर्हति। कुत्रचित् पदेषु बलाघातः अर्थपरिवर्तनं द्योतयति। कुत्रचित् काकुस्वरः अर्थान्तरं व्यञ्जयति।

4. हस्तौ—व्याख्यानसमये विषयस्य स्पष्टीकरणाय हस्तयोश्चालनम् (अभिनयः), अङ्गुलीनां प्रदर्शनञ्च अध्यापकः यथोचितं कुर्यात्।

5. चलनम्—व्याख्यानसन्दर्भे छात्राणां ध्यानाकर्षणाय अध्यापकः द्वित्राणि पदानि इतस्ततश्चलितुमर्हति। विषयस्य गाम्भीर्ये स्थिरतैव उपयुक्ता स्यात्।

6. मौनम्—व्याख्याने वाक्यानां मध्ये अल्पविरामः छात्राणां कृते वाक्यार्थावगमनाय अवसरं कल्पयेत्। क्लिष्टविषयाणां व्याख्याने मध्ये मौनेन छात्राणां मुखानां दर्शनं तेषामभिप्रायं ज्ञातुमवकाशं कल्पयति। आश्चर्यकरं विषयमुक्त्वा ईषत् मौनस्य धारणं छात्रेषु जिज्ञासां वर्धयति। प्रश्नं कृत्वा प्रदर्शितं मौनं चिन्तनाय अवकाशं कल्पयति। अध्यापकस्य दीर्घकालं मौनन्तु व्याख्याने विरसतां, छात्रेषु असहनताञ्च जनयति।

इतः परं शाब्दिकाः व्याख्यानकौशलघटकाः प्रतिपाद्यन्ते।

1. उपक्रमः—व्याख्यानस्य प्रारम्भः छात्राणामासक्तिकरः स्यात्। निरूपणीयः विषयः, सिद्धान्तो वा प्रारम्भे सरलैः शब्दैः कथनीयः। उपक्रमोपसंहारयोः एकवाक्यतापि स्यात्।

2. संयोजकशब्दाः—व्याख्यानस्य उपक्रमानन्तरं मुख्यबिन्दवः क्रमेण उपस्थापनीयाः। क्रमस्य स्पष्टीकरणाय संख्याशब्दाः प्रयोक्तव्याः। यथा—प्रथमतः, द्वितीयं तावत्, तृतीयन्तु इति। अर्थस्य स्पष्टप्रतिपत्तये संयोजकशब्दाः प्रयोक्तव्याः। यथा—एवञ्च, किञ्च, तथा च, किन्तु, परन्तु, एवञ्चेत्, यदि—तर्हि, यथा-तथा, यदा-तदा, इतः पूर्वं यदुक्तं, इतः परमुच्यते यत्, तत् कथमिति चेत्, यद्यपि—तथापि, अतः एतत्सिद्धं भवति यत्-इत्यादयः। एतादृशानां शब्दानां प्रयोगेण आशयः स्पष्टम् अभिव्यक्तो भवति।

3. मुख्यांशाः—मुख्यांशानां सप्रमाणं निरूपणं कर्तव्यम्। न्यायानां, युक्तीनाम्, आभाणकानां, दृष्टान्तानाञ्च कथनेन मुख्यबिन्दूनां स्पष्टीकरणमावश्यकं भवति।

4. अवबोधप्रश्नाः—व्याख्यानस्य मध्ये अन्ते च अध्यापकः वस्तुनिष्ठान् कांश्चित् प्रश्नान् पृच्छेत्। तेन च छात्राणामवधानं, ग्रहणशक्तिञ्च अध्यापकः ज्ञातुं प्रभवति। अन्ते पृष्टाः प्रश्नाः छात्राणां स्मरणशक्तिं, शिक्षणकार्यस्य साफल्यञ्च ज्ञापयन्ति।

एवं व्याख्यानकौशलस्य साङ्केतिकान्, शाब्दिकांश्च घटकान् अभ्यस्य अध्यापकः विषयबोधने सामर्थ्यमाप्नुयात्।

3. दृष्टान्तकौशलम्

विषयबोधने मुख्यांशानां निरूपणाय दृष्टान्तानां प्रयोगः अध्यापकस्य पाण्डित्यं, बोधनसामर्थ्यञ्च निरूपयति। अप्रसिद्धस्य, अज्ञातस्य, सूक्ष्मस्य वा विषयस्य प्रसिद्धेन, सुपरिचितेन, स्थूलेन उदाहरणेन स्पष्टीकरणं दृष्टान्तप्रयोग इति वक्तुं शक्यते। साहित्ये, विज्ञाने च शिक्षणीयाः विषयाः चित्राणां रचनेन सरलतया बोध्यन्ते। एतादृशं चित्रणं (चित्रव्याख्यानम्) आङ्गलभाषायां दृष्टान्तत्वेन (Illustration) व्यवह्रियते। कुशलः चित्रकारः कथायाः, वर्णनस्य वा सर्वानंशान् रेखाभिः, वर्णैश्च सुन्दरं चित्रयेत्, येन शब्दैः प्रतिपाद्यमानाः अर्थाः दृष्ट्या गृहीताः स्युः। एवं प्रतिभासम्पन्नः कविः हृदये स्फुरितान् भावान् रमणीयैः शब्दैः वर्णयति। संस्कृतसाहित्ये शास्त्रेषु च बहुविधाः दृष्टान्ताः उपलभ्यन्ते, येषामध्ययनेन अध्यापकः दृष्टान्तकथने कुशलो भवेत्।

महाकविना कालिदासेन रघुवंशे प्रयुक्तः कश्चन दृष्टान्तः अत्र उदाह्रियते। राजा दिलीपः राजनीतिज्ञः मित्रवर्गं, शत्रुवर्गञ्च कथं निर्णयतीति कालिदासः सोदाहरणं प्रतिपादयति। तिक्तमौषधम् अरुचिकरमपि रोगापनयनेन रोगिणमुपकरोति। तथैव केनापि कारणेन शत्रुवर्गे स्थितः कश्चन श्रेष्ठः पुरुषः तस्य मान्यः आसीत्। एवं कश्चन दुष्टः बन्धुवर्गीयोऽपि सर्पदष्टा अङ्गुलीव त्याज्यः आसीत्। एवं राज्ञः दिलीपस्य मित्रत्वं, शत्रुत्वञ्च गुणाधीनमासीत्, न तु कारणाधीनमिति।

द्वेष्योऽपि सम्मतः शिष्टः तस्यार्तस्य यथौषधम्।
त्याज्यो बन्धुः प्रियोऽप्यासीत् अङ्गुलीवोरगक्षता॥ रघु–1–28

कुमारसम्भवे पार्वत्याः विद्याभ्यासं वर्णयता कालिदासेन प्रतिपादितं यत् अनुकूले समये, अनुकूलपरिष्ठितिषु च पूर्वजन्मसु अधीताः विद्याः अव्यक्तसंस्काररूपेण स्थिताः उपदेशकाले व्यक्ताः भवन्ति इति।

तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः॥ कुमार–1–31

अत्र सूक्ष्मः कश्चन विषयः स्थूलाभ्यां दृष्टान्ताभ्यां स्पष्टीकृतः। यदा गङ्गानदी शरत्काले निर्मला भवति तदा हंसाः तत्रागच्छन्ति। पूर्वं स्थिताः, प्रतिकूलपरिष्ठितौ निर्गताः, अनुकूलपरिष्ठितौ प्रत्यागच्छन्ति। महौषधीनां कान्तिः दिवा सूर्यप्रकाशेन तिरोहिता, विद्यमानापि न प्रकाशते। पुनः नक्तम् अनुकूलपरिष्ठितौ प्रकाशते।

कठोपनिषदि तृतीयवल्ल्यां शरीरस्य रथत्वेन निरूपणेन, आध्यात्मिकसिद्धान्तानुसारं जीवात्मनः प्रवृत्तिः प्रतिपाद्यते। यथा—

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥ कठ 3-3
इन्द्रियाणि हयानाहुः विषयाँस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥ कठ-3-4

आत्मा = रथिकः, शरीरं = रथः, बुद्धिः = सारथिः, मनः = प्रग्रहः, इन्द्रियाणि = अश्वाः, विषयाः = मार्गाः। एवमस्मिन् लोके लक्ष्यानुसारं जीवात्मनः प्रयाणं भवति।

एतादृशाः पूर्वसूरिभिः वर्णिताः, जीवने अनुभवेन प्राप्ताश्च दृष्टान्ताः अध्यापकेन निपुणतया उपयुक्ताः विषयं सरलीकृत्य छात्राणां ग्रहणशक्तिं वर्द्धयन्ति॥

4. श्यामपट्टप्रयोगः

श्यामपट्टः अध्यापकस्य दक्षिणहस्तः भवति। सत्स्वपि बहुषु नूतनेषु दृश्यश्रव्योपकरणेषु सर्वत्र विद्यालयेषु, कलालयेषु च उपलभ्यमानम् एकमेव दृश्योपकरणं भवति श्यामफलकम्। गणितस्य, विज्ञानस्य भाषाणाञ्च अध्यापने अनुपेक्षणीयमुपकरणं भवति श्यामफलकम्। छात्राणां पुरस्तात् अध्यापकेन श्यामफलके विषयस्य व्याख्यानाय लिख्यमानानि सुन्दराणि चित्राणि, मुख्यांशाश्च तस्य अध्यापनं गुणवत्तरं कुर्वन्ति। प्रायः श्यामफलके श्वेतसुधाखण्डेन लिख्यते। चित्रेषु विभागानां प्रदर्शनाय, प्रधानांशानां पृथक्करणाय विभिन्नवर्णानां प्रयोगः छात्राणामासक्तिं, ग्रहणशक्तिञ्च वर्द्धयति। वस्तुतः श्यामफलकमिति पदस्य स्थाने लेखनफलकमिति पदस्य प्रयोगः युक्तः स्यात्। यतो हि श्यामवर्णस्य स्थाने इदानीं पलशवर्णं, पाटलवर्णं, धूसरवर्णं, श्वेतवर्णं वा फलकं लेखनार्थमुपयुज्यते। आङ्गलभाषायां Black board इति पदस्य स्थाने अधुना Chalk board इति पदं प्रयुज्यते। प्रायः सर्वत्र विद्यालयेषु, महाविद्यालयेषु च अध्यापकः लेखनफलकस्य साह्येनैव विषयाणां व्याख्यानं करोतीति अयं शिक्षणविधिः 'लेखन-भाषणविधिः' (Chalk and talk method) इति प्रसिद्धिमगात्। लेखनफलकानां वैविध्यमधुना प्रतिपाद्यते।

1. काष्ठनिर्मितं श्यामवर्णं लेखनफलकं त्रिपाद्यां प्रतिष्ठाप्यते। कक्ष्याप्रकोष्ठे सर्वेषां छात्राणां दर्शनयोग्ये स्थाने, प्रकाशे च स्थापयितुं शक्यते। एतादृशं फलकं बहिः वृक्षच्छायायामपि संस्थाप्य उपयोक्तुं शक्यते। एतस्यौन्नत्यं यथेष्टं परिवर्तनयोग्यं भवति।
2. काष्ठनिर्मितं श्यामफलकं कक्ष्याप्रकोष्ठे भित्तौ एकस्मिन् स्थाने प्रतिष्ठाप्यते। एतत् स्थिरं भवति। अस्यौन्नत्यं वामनस्यापि अध्यापकस्य हस्तप्राप्यं स्यात्। प्रकाशस्य व्यवस्था भवेत्। फलके लिखितं सर्वेषां छात्राणां दृश्यं स्यात्।
3. कक्ष्या प्रकोष्ठे भित्तौ उचिते स्थाने सुधया (Cement) लेखनफलकं निर्मीयते। तच्च रागरञ्जितं (Painted) भवति। तस्य उपरितलम् अश्लक्ष्णं (Rough) स्यात्।
4. काचनिर्मितं पृष्ठभागे प्रायः पलाशरागेण रञ्जितं लेखनफलकं भित्तौ समीचीने स्थाने प्रतिष्ठाप्यते। अस्य उपरितलमश्लक्ष्णं लेखनयोग्यञ्च भवति।
5. प्लास्टिक् निर्मितं लेखनफलकं श्वेतवर्णं भित्तौ प्रतिष्ठापितं, परिवर्तनयोग्यं वा उपयुज्यते। तत्र भिन्नवर्णया मार्कर् लेखन्या (Marker Pen) लेखनीयं भवति।
6. लोहनिर्मितमपि (Tin or steel) लेखनफलकं कुत्रचिदुपयुज्यते।

एतेषां लेखनफलकानां लघूनां तु प्रमाणं 1½'×2' स्यात्, महतां तावत् 3'×6' अथवा 4' × 8' भवितुमर्हति।

विभिन्नवर्णेषु लेखनफलकेषु लेखनार्थमुपयुज्यमानाः विरुद्धवर्णाः सुधाखण्डाः दर्शने स्पष्टतां, सौन्दर्यञ्च वर्द्धयन्ति। यथा—

लेखनफलकस्य वर्णः	**सुधाखण्डस्य वर्णः**
पलाशः	श्वेतः, पीतो वा
धूसरः (grey)	पीतः
शोणः	हरितः, पीतो वा
नारङ्गः (Orange)	नीलः, हरितो वा

पीतः	नीलः
पाटलः (Rose)	नीलः, नीललेहितो वा (purple)
श्यामः	कोऽपि वर्णः

लेखनफलकस्य उपयोगः—

1. अक्षराणाम्, अङ्कानाम्, आकृतीनाञ्च लेखनप्रकारम् अध्यापकः स्पष्टं प्रदर्शयितुं शक्नोति।
2. गणितस्य, विज्ञानस्य च बोधनाय अध्यापकेन छात्राणां सम्मुखं लिखितानि चित्राणि प्रभावकराणि भवन्ति।
3. पदानां वर्णक्रमस्य बोधनाय, अशुद्धिसंशोधनाय, पदार्थानां, मुख्यांशानां, सारांशस्य, गृहकार्यस्य च लेखनाय लेखनफलकम् उपयुज्यते।
4. विषयबोधनाय उपयुक्तानि रेखाचित्राणि विविधवर्णैः लेखितुं शक्यन्ते।
5. फलके लेखनं शुद्धं, स्पष्टं, सुन्दरञ्च स्यात्।
6. पदानां मध्ये, पङ्क्तीनां मध्ये च नियतविरामः स्यात्।
7. वर्णानाम्, अङ्कानाञ्च प्रमाणं दूरस्थानामपि छात्राणां दर्शनयोग्यं भवेत्।
8. वर्णाः समप्रमाणतया, ऋजुरेखया च लिखिताः स्युः।
9. दीर्घवाक्यानां लेखनापेक्षया मुख्यांशाः संक्षिप्तैः पदैः लेखनीयाः।
10. अध्यापकेन 'किं लिखितं, किमर्थमिति' छात्रैः ज्ञातव्यम्। लिखित-विषयस्य व्याख्यानम् उपयोगकरं स्यात्।
11. विशेषांशानां प्रतिपादनाय वर्णानां परिवर्तनम्, अधोरेखया अङ्कनञ्च कर्तव्यम्।
12. फलके लेखनीयाः अंशाः पूर्वनिश्चिताः पाठयोजनायां प्रदर्शिताश्च भवेयुः।
13. श्यामफलकस्य उपयोगाय अपेक्षितानि उपकरणानि-विविधवर्णाः सुधाखण्डाः, मार्जनी, रेखादण्डः (Ruler), सूचिकादण्डश्च (Pointer) पूर्वमेव साधनीयानि।

14. लेखनफलकं कार्यस्य समाप्तौ मार्जन्या संशोध्य शुद्धं स्थापनीयम्। अनपेक्षिताः विषयाः, असम्मार्जिताः छात्राणामवधानं नाशयन्ति।

एवं लेखनफलकस्य श्रद्धया उपयोगः बहूनां दृश्योपकरणानामुपयोगस्य प्रयोजनं साधयति।

लेखनकौशलस्य घटकाः—

1. अङ्गुष्ठस्य, तर्जनीमध्यमयोश्च मध्ये सुधाखण्डस्य दृढं ग्रहणस्य अभ्यासः कर्तव्यः।
2. फलके लेखनसमये 'किर् किर्' शब्दः न भवेत्।
3. लेखनं सर्वत्र समानबलेन स्यात्। अन्यथा केचन वर्णाः अस्पष्टाः स्युः।
4. वर्णानामाकारः सर्वत्र समानः, स्पष्टः, सुन्दरश्च स्यात्।
5. पदानां पङ्क्तीनाञ्च मध्ये समानः विरामः स्यात्।
6. पंक्तयः सरलरेखया लिखिताः स्युः। तत्र वक्रता न स्यात्।
7. चित्राणां रचनायां, मुख्यांशानां स्पष्टीकरणे च विभिन्नवर्णानाम् उपयोगः ज्ञातव्यः।
8. वेगेन लेखनस्य अभ्यासः कर्तव्यः।
9. छात्राः अध्यापकस्य लेखनं यथा द्रष्टुं प्रभवन्ति तथा पार्श्वे स्थित्वा लेखनीयम्।
10. लिखितविषये वर्णदोषाः, व्याकरणदोषाश्च न भवेयुः।
11. ऋजुरेखाणां, त्रिकोणस्य, चतुरश्रस्य, वृत्तस्य, विभिन्नाकृतीनाञ्च लेखनस्य अभ्यासः कर्तव्यः।
12. द्वौ सुधाखण्डौ गृहीत्वा द्वयोः समानान्तररेखयोः युगपत् लेखनस्य अभ्यासः कर्तव्यः।
13. लेखने समाप्ते सति सुधाखण्डः निर्दिष्टे स्थाने स्थापनीयः। सुधाखण्डः सर्वदा हस्ते न स्यात्।
14. दीर्घरेखाणां, बृहच्चित्राणाञ्च लेखनाय रेखादण्डस्य (Ruler) उपयोगः कर्तव्यः।

15. लिखितचित्रस्य भागानां, मुख्यांशानाञ्च व्याख्याने सूचिकादण्डेन प्रदर्शनमुत्तमं स्यात्।

16. कार्ये समाप्ते मार्जन्या फलकं सम्यक् मार्जनीयम्।

एतेषां कार्याणामभ्यासेन अध्यापकः श्यामफलके सम्यक् लेखने, समुचितरीत्या तस्य उपयोगे च निपुणः स्यात्।

प्रश्नकौशलस्य विकासः

विषयः संस्कृतम् कक्षा—

प्रकणम् महिला शिक्षा समयः—

दिनाङ्कः—

उद्देश्यानि—

सामान्योद्देश्यानि—

* छात्राणां पूर्वज्ञानस्य नवीनज्ञानस्य च मध्ये सम्बन्धस्थापनम्।
* छात्राणां कल्पनाशक्तेः तर्कशक्तेश्च विकासकरणम्।
* छात्राणां पाठं प्रति रुच्युत्पादनम्।
* छात्राणां शब्दकोशवर्धनम्।
* छात्राणां कृते विषयस्य अवबोधनम्।

विशिष्टोद्देश्यम्—

* प्रश्नकौशलस्य विकासकरणम्।

छात्राध्यापकः सरलैः प्रश्नैः महिलाशिक्षायाः चित्रं प्रदर्श्य प्रश्नकौशलं निम्नप्रकारेण स्पष्टं करिष्यति।

अध्यापककथनम्	छात्रकथनम्	घटकाः
* का परिवारस्य अभ्युत्थानाय समर्था?	* शिक्षिता महिला परिवारस्य अभ्युत्थानाय समर्था।	(i) शुद्धता (ii) सम्बद्धता
* शिक्षया किम् उत्पन्नं भवति?	* शिक्षया आत्मविश्वासः उत्पन्नः भवति।	(i) वेगः (ii) स्वरुपसंक्षिप्तता
* आत्मविश्वासेन किं लभ्यते?	* आत्मविश्वासेन सफलता लभ्यते।	(i) विशिष्टता (ii) वेगः

* पुरुषः किं करोति?	* परिवाराय धनार्जनं करोति।	(i) प्रकरणेन सम्बद्धता
* महिलानाम् अधिकाराः कस्य समं न सन्ति?	* महिलानाम् अधिकाराः पुरुषवर्गस्य समं न सन्ति।	(i) शुद्धता (ii) वेगः
* महिला कस्य मूर्तिः भवति?	* महिला ममता-दया-समर्पण-त्यागादिकानां मूर्तिः भवति।	(i) विशिष्टता (ii) वेंगः
* किमर्थं महिलाशिक्षा आवश्यकी?	* राष्ट्रस्य अभ्युदयाय महिला-शिक्षा आवश्यकी।	(i) सम्बद्धता (ii) विरामः

अनेन प्रकारेण पाठः अग्रे चलिष्यति।

मूल्याङ्कनप्रपत्रम्

कौशलस्य घटकाः	सर्वोत्कृष्टः	सर्वश्रेष्ठः	श्रेष्ठः	सामान्यः	असंतोषजनकः
भाषायाः सरलता, शुद्धता च					
प्रकरणेन सुसंबद्धता					
स्वरूपस्य संक्षिप्तता					
विशिष्टता					
वेगः					
विरामः					
कण्ठस्वरः					
प्रश्नानाम् आवृत्तिः					

पर्यवेक्षकस्य टिप्पणी

श्यामपट्टकौशलस्य विकासः

विषयः संस्कृतम् कक्षा—

प्रकणम् महिलाशिक्षा समय :—

दिनाङ्क :—

सामान्योद्देश्यानि—

* छात्राणां पाठं प्रति रुच्युत्पादनम्।

* छात्राणां ध्यानस्य केन्द्रीकरणम्।
* छात्राणां कल्पनाशक्तेः तर्कशक्तेश्च विकासकरणम्।
* छात्राणां शब्दकोशवर्धनम्।
* छात्राणां कृते विषयस्य अवगमनम्।
* छात्राणां मूल्याङ्कनम्।

विशिष्टोद्देश्यम्—

* छात्राध्यापकानां श्यामपट्टकौशलस्य विकासनम्।

छात्राध्यापकः श्यामपट्टे कतिपयानि वाक्यानि लिखित्वा छात्रान् प्रश्नान् पृच्छन् स्पष्टीकरणार्थं श्यामपट्टसारस्य विकासं करिष्यति।

	अध्यापककथनम्	छांत्रकथनम्	घटकाः
	"यद्यपि रमेशः आगन्तुं शक्नोति, किन्तु न आगमिष्यति।"		
(1)	वाक्येऽस्मिन् संधिपदं किम् अस्ति?	अत्र संधिपदं "यद्यपि" अस्ति।	* अक्षर स्पष्टता। *अक्षराणाम् उचिताकारः।
(2)	"यद्यपि" इति सन्धिपदस्य विच्छेदं करोतु।	"यदि + अपि"	* द्वयोः शब्दयोः मध्ये समुचितस्थानम्।
(3)	अस्मिन् पदे के के स्वराः सन्धियुक्ताः सन्ति?	"इ + अ" इति स्वराः सन्धियुक्ताः सन्ति।	* एकाक्षरोपरि पुनर्लेखनम्।
(4)	परिवर्तितः स्वरः कः?	इ + अ = य अस्ति	* ध्यानकेन्द्रीकरणस्य कृते पत्राणां प्रयोगः।
	"भवतः स्वागतं करोमि।"		
(5)	वाक्येऽस्मिन् संधिपदं किम् अस्ति?	स्वागतम् अस्ति।	* अक्षरस्पष्टता।
(6)	"स्वागतम्" इत्यस्य पदस्य विच्छेदं करोतु।	"सु + आगतम्"	* द्वयोः शब्दयोः मध्ये समुचितस्थानम्।
(7)	पदेऽस्मिन् के के स्वराः संधियुक्ताः सन्ति?	"उ + आ" इति स्वराः संधियुक्ताः सन्ति।	* अनावश्यकतथ्यानां मार्जनम्।
(8)	परिवर्तितः स्वरः कः?	"उ + आ = वा" इत्यस्ति।	* श्यामपट्टकार्यस्य उपयुक्तता।

एवं प्रकारेण छात्राध्यापकः वाक्येषु प्रश्नान् कुर्वन् श्यामपट्टसारं लेखिष्यति।

संधियुक्तपदम्	संधिविच्छेदः	प्रथम पदस्य अन्तिम स्वरः	उत्तर पदस्य प्रथम स्वरः	संयुक्तसंधि-स्वरः
(i) यद्यपि	यदि + अपि	''इ''	''अ''	''य'' यण्
(ii) स्वागतम्	सु + आगतम्	''उ''	''आ''	''वा'' यण्

शिक्षकः (छात्राध्यापकः) छात्रान् प्रक्ष्यति यत्–

शि.– यण् संधेः कः नियमः भवति?

छा.– यदा इ, उ स्वरस्य पश्चात् कोऽपि भिन्नः स्वरः अगच्छति तदा ''इ'' इत्यस्य स्थाने ''य्'' तथा च ''उ'' इत्यस्य स्थाने ''व्'' भवति।

छात्राध्यापकः श्यामपट्टे नियमं लेखिष्यति।

''इकोयणचि'' इति सूत्रानुसारं ''इ, उ'' इत्यस्य अनन्तरं यदि भिन्नाः स्वराः आगच्छन्ति तदा तयोः स्थाने क्रमशः ''य्, व्'' भवति।

छात्राध्यापकः कांश्चन शब्दान् श्यामपट्टे लिखित्वा अभ्यासं कारयिष्यति।

(i) इत्यपि = इति + अपि (ii) सु + अस्ति = स्वस्ति

(iii) इति + अलम् = इत्यलम् (iv) अनु + अयः = अन्वयः

मूल्याङ्कनप्रपत्रम्

कौशलस्य तत्वानि	सर्वोत्कृष्टः	सर्वश्रेष्ठः	श्रेष्ठः	सामान्यः	असंतोषजनकः
लेखनस्य स्पष्टता द्वयोः शब्दयोर्मध्ये समुचितस्थानम्। अक्षरविन्यासः समुचितः। अक्षराणाम् उचिताकारः। अक्षरस्पष्टता।					
कार्यस्य स्वच्छता। लिखितपङ्क्तीनां समानभागः। एकाक्षरोपरि पुनः न लेखनीयम्। अनावश्यकतथ्यानां मार्जनम्। मुख्यांशानां संक्षिप्तवाक्येषु लेखनम्।					

कार्यस्य औचित्यम्।					
ध्यानकेन्द्रीकरणस्य कृते भिन्नश्वेतपत्रस्य प्रयोगः।					
श्यामपट्टकार्यस्य तारतम्यता।					
चित्रस्य रेखाचित्रस्य वा उपयुक्तता।					
ध्यानकेन्द्रीकरणस्य कृते मुख्यबिन्दवः रेखाङ्किताः करणीयाः।					

पर्यवेक्षकस्य टिप्पणी

व्याख्याकौशलस्य विकासः

विद्यालयस्य नाम

छात्राध्यापकस्य नाम

विषयः संस्कृतम् कक्षा

प्रकणम् दानशीलो भामाशाहः समयः

दिनाङ्कः

सामान्योद्देश्यानि—

* छात्राणां पाठं प्रति रुच्युत्पादनम्।
* छात्राणां सम्प्रत्ययानां, विचाराणां च स्पष्टीकरणम्।
* छात्राणां कल्पनाशक्तेः तर्कशक्तेश्च विकासकरणम्।
* छात्राणां कृते विषयस्य अवगमनम्।
* छात्राणां मूल्याङ्कनम्।

विशिष्टोद्देश्यम्—

* छात्राध्यापकानां व्याख्याकौशलस्य विकासनम्।

छात्राध्यापकः पाठस्य पठनसमये गद्यांशे आगतानाम् अपरिचितजटिलशब्दानां च व्याख्यां छात्राणां साहाय्येन करिष्यति। यथा—

क्र. सं. शब्दः	अर्थः	प्रविधिः	प्रयोगः	मूल्याङ्कनम्	घटकाः
(1) जीवनलक्ष्यम्	जीवनाधारः	समासविग्रहः	जीवनस्य लक्ष्यम् (अत्र तत्पुरुष-समासः)	"राजपुत्रः" अत्र कः समासः?	भाषागति-युक्ता। उचित शब्दानां
(2) असहन्त	सहनं कृतवन्तः	व्युत्पत्ति-विधिः	"सह्" धातुः, लङ्लकारः, प्रथम पुरुषः, बहुवचनम्	"अपचन्त" इति शब्दस्य व्युत्पत्तिं करोतु।	स्पष्टं निष्कर्षः वर्तते
(3) दुष्करम्	कठिनम्	वाक्य-प्रयोग-विधिः	धनाभावे जीवनं दुष्करम् अस्ति।	आहाररहितं जीवनं कथं भवति?	उपयुक्त-शब्दानां प्रयोगः।
(4) भ्रमन्	विचरन्	व्युत्पत्तिविधिः	भ्रम् + शतृ प्रत्ययः	"गच्छन्" इति शब्दस्य प्रकृतिं प्रत्ययं पृथक् करोतु।	असम्बद्ध-कथनानाम् अभावः।
(5) कदापि	कदाचित् अपि	सन्धिविच्छेदः	कदा+अपि (अत्र दीर्घसन्धिः अस्ति)	"तथापि" इति पदस्य संधि-विच्छेदं करोतु।	सन्धीनाम् उचित-प्रयोगः।

मापनतालिका

कौशलघटकाः	अभीष्टानभीष्ट-व्यवहारः	कृतमकृतम्	मूल्यमापनम्	विशेष-व्याख्या
(1) धाराप्रवाहेण भाषा-प्रयोगः				
(2) छात्रेभ्यः उचितोत्तराणि प्राप्तानि।				
(3) परीक्षणार्थं मध्ये प्रश्नाः कृताः।				

(4) विचाराणां कथनानां च समुचितप्रयोगः।				
(5) कथनेषु क्रमबद्धता।				

पर्यवेक्षकस्य टिप्पणी

पर्यवेक्षकस्य हस्ताक्षरम्

दृष्टान्तकौशलस्य विकासः

विद्यालयस्य नाम

छात्राध्यापकस्य नाम

विषयः संस्कृतम् कक्षा

प्रकणम् पुत्रः शत्रुरपण्डितः समयः

दिनाङ्कः

सामान्योद्देश्यानि—

* छात्राणां कृते विषयस्य अवगमनम्।
* छात्राणां कल्पनाशक्तेः, तर्कशक्तेश्च विकासनम्।
* छात्राणां शब्दकोशवर्धनम्।
* छात्राणां पाठं प्रति रुच्युत्पादनम्।
* छात्राणां पूर्वज्ञानस्य, नवीनज्ञानस्य च मध्ये संबंधस्थापनम्।

विशिष्टोद्देश्यम्—

* छात्राणां दृष्टान्तकौशलस्य विकासनम्।

छात्राध्यापकः "पुत्रः शत्रुरपण्डितः" इति सूक्तिं दृष्टान्तकौशलस्य माध्यमेन स्पष्टं करिष्यति।

अध्यापककथनम्	घटकाः
''वरमेको गुणी पुत्रो, न च मूर्खशतान्यपि। एकश्चन्द्रस्तमो हन्ति, न च ताराशतान्यपि॥''	दृष्टान्तस्य रोचकता। उपयुक्तता। पाठप्रवर्धने सहायकता। स्तरानुकूलता।

अध्यापकथनम्	छात्रकथनम्	घटकाः
* कः पुत्रः श्रेष्ठः?	* गुणी पुत्रः श्रेष्ठः	(i) सरलता
* अन्धकारं कः हरति?	* एकः चन्द्रः अन्धकारं हरति।	(i) स्पष्टता
* अस्मिन् श्लोके कस्य महत्त्वं वर्णितम्?	* सुपुत्रस्य महत्त्वं वर्णितम्।	(i) विशिष्टता
		(ii) रोचकता

मूल्याङ्कनप्रपत्रम्

कौशलस्य घटकाः	सर्वोत्कृष्टः	सर्वश्रेष्ठः	श्रेष्ठः	सामान्यः	असंतोषजनकः
(1) दृष्टान्तः सुगमः सरलश्च।					
(2) प्रासांगिकः।					
(3) रोचकः।					
(4) उपयुक्तः।					
(5) स्तरानुकूलः।					
(6) पाठविकासे सहायकः।					

पर्यवेक्षकस्य टिप्पणी

पर्यवेक्षकस्य हस्ताक्षरम्

❖❖❖

त्रयोविंशोऽध्यायः

अभिक्रमितानुदेशनम्

(Programmed Instruction)

सिड्नी.एल्. प्रेस्सीमहोदयः क्रि.प. 1920 तमे वर्षे एकं यन्त्रं निर्मितवान्। तद्यन्त्रं छात्रस्य पुरस्तात् प्रश्नानाम् एकां शृङ्खलामुपस्थापयति। प्रथमप्रश्नं पठित्वा यदा छात्रः उत्तरं ददाति तदा यन्त्रं सद्यः एव तस्य उत्तरं सत्यम्, असत्यं वा प्रदर्शयति। ततः द्वितीयं प्रश्नम् उपस्थापयति। एवं छात्रः स्वविजयेन (उत्तरस्य सत्यताज्ञानेन) प्रोत्साहितः द्विगुणितवेगेन निर्धारितानि उद्देश्यानि अधिगच्छति। सिड्नीमहोदयेन प्रख्यापितञ्च यत् एतद्यन्त्रं बहूनां शिक्षकाणां कार्यं स्वयं निर्वहणे समर्थं भवतीति। परन्तु तस्मिन् काले जनानां निरुद्योगसमस्यायाः कारणात् एतस्य यन्त्रस्य प्रोत्साहनं न लब्धम्।

ततः क्रि.प. 1950 तमे वर्षे प्रो. बी.यफ्. स्किन्नर् महोदयः अधिगमस्य विषये स्वयमुपस्थापितस्य 'व्यवहारनिबन्धनसिद्धान्तस्य' (Operant Conditioning Theory) आधारेण नवीनां स्वशिक्षणपद्धतिम् 'अभिक्रमितानुदेशनम्' (Programmed Instruction) इति नाम्ना प्रसिद्धाम् आविश्चकार।

शिक्षणप्रक्रियायां शिक्षक-छात्रयोर्मध्ये अन्तःक्रिया महत्त्वपूर्णा। समुचितरूपेण अन्तःक्रियामाध्यमेनैव शिक्षकः स्वोद्देश्येषु साफल्यं भजते। समुचित-प्रतिक्रियायाः कृते शिक्षकस्य अवधानं छात्रेषु व्यक्तिगतत्वेन भवेत्। परन्तु अधुना वर्धिष्यमाणायाः जनसंख्यायाः, ज्ञानस्य विविधक्षेत्रेषु शीघ्रगत्या विकासस्य च कारणेन प्रत्येकं छात्रेषु व्यक्तिगतावधानस्य प्रदानम् अध्यापकस्य कृते जटिलं कार्यमभवत्। एतादृश्यां परिष्ठितौ शिक्षणस्य नवीनविधीनाम् अन्वेषणमपेक्षितं, येन छात्रः स्वयमेव ज्ञानार्जनं कर्तुं शक्नुयात् अपि च शिक्षकस्य प्रतिक्रियामपि प्राप्तुं शक्नुयात्। अस्मिन् क्षेत्रे शिक्षणस्य नवीनविधिः वर्तते-'अभिक्रमिताधिगमः'।

अभिक्रमिताधिगमः इत्यस्य अभिप्रायोऽस्ति क्रमबद्धाधिगमः इति। बी.एफ. स्किन्नरमहोदयः अस्य प्रविधेः जनकः। तस्य मतानुसारेण "अभिक्रमितानुदेशनं शिक्षणस्य कला, अधिगमस्य च विज्ञानं वर्तते।"

अभिक्रमिताधिगमेन छात्राणां सम्मुखे विषयवस्तु लघुनियोजितसोपानेन प्रस्तुतं भवति। अस्य संरचनायां शिक्षणसूत्राणामनुसरणं भवति। तेन छात्रः ज्ञातादज्ञातं प्रतीति शिक्षणसूत्राधारेण स्वयमेव ज्ञानं प्राप्नोति। अस्मिन् विधौ छात्रेण कृतस्य कार्यस्य पुष्टिः अपि शीघ्रं भवति। अभिक्रमिताध्ययनं आधारभूताध्ययनं वर्तते येन प्रभावपूर्णं रोचकं च ज्ञानं स्थायिरूपेण अधिगन्तुं शक्यते।

1. अभिक्रमितानुदेशनस्य अर्थः—

स्मित्, मूरे च (Smith and Moore)—"अभिक्रमितानुदेशनमेका प्रक्रिया भवति या अध्येयविषयं लघुपदानां क्रमबद्धशृङ्खलारूपेण व्यवस्थापयति। छात्रं परिचितपश्चात्तलात् जटिलान् नवीनान् सम्प्रत्ययान्, सिद्धान्तान्, अवगमान् प्रति नयति।"

(Programmed instruction is the process of arranging the material to be learned into a series of sequential steps, usually it moves the student from a familiar background into a complex and new set of concepts, principles and understanding.)

जेम्स्. ई. एस्पिच् बिर्ल् विलियम्स् च—"अभिक्रमितानुदेशनं नाम अनुभवानां सः नियोजितक्रमः यः उद्दीपकप्रतिक्रियासम्बन्धरूपेण क्षमतां प्रापयति।" इति

(Programmed Instruction is a planned sequence of experiences leading to proficiency in terms of stimulus response relationship.)

अभिक्रमितानुदेशनम्, अभिक्रमिताध्ययनम् इति पदद्वयमत्र पर्यायेण प्रयुज्यते।

तथा च अभिक्रमितानुदेशनं तादृशमुनदेशनं भवति यत्र पाठ्यविषयः लघुषु पदेषु विभक्तः छत्राणां समक्षं क्रमशः प्रस्तूयते। छात्रः न्यूनातिन्यूनं दोषं कुर्वन् स्वगत्यनुसारं नवीनं जटिलं विषयं शिक्षते। अस्यामध्ययनप्रक्रियायां छात्रः स्वप्रगतेः ज्ञानेन प्रतिपुष्टिं लभते।

2. अभिक्रमितानुदेशनसामग्र्याः विशेषाः (Characteristics of Programmed Instruction material)

1. अभिक्रमितानुदेशनस्य सामग्री व्यक्तिनिष्ठा भवति। छात्राः प्रत्येकं स्वेच्छया अध्येतुं शक्नुवन्ति।
2. अत्र पाठ्यविषयः लघुषु अंशेषु विभक्तो भवति।
3. एते अंशाः शृङ्खलाबद्धाः स्थाप्यन्ते।
4. अभिक्रमितसामग्र्याः प्रत्येकं पदानि (अंशाः) अग्रिमपदेन तार्किकक्रमेण, स्वाभाविकरीत्या च बद्धानि भवन्ति।
5. अध्येता निरन्तरं प्रयासं (प्रतिक्रियां) करोति।
6. छात्रः स्वप्रगतेः सूचनां सद्यः प्राप्नोति – तस्य प्रतिक्रिया समीचीना, असमीचीना वेति। एवं सः प्रतिक्रियायाः अनुपदं प्रतिपुष्टिं लभते।
7. छात्रः स्वगत्यनुसारम् अध्येतुम् अवसरं लभते।
8. अभिक्रमितानुदेशनसामग्री सम्यक् परीक्षिता, सुव्यवस्थिता च भवति।

3. अभिक्रमिताध्ययनस्य सिद्धान्ताः (Principles of Programmed Learning)

	सिद्धान्ताः (Principles)	कार्यम् (Functions)
1.	लघुपदानां सिद्धान्तः Principle of small steps	वाचनम् Reading
2.	सक्रियप्रतिकरणस्य सिद्धान्तः Principle of active responding	लेखनम् writing
3.	सद्योनिर्णयस्य सिद्धान्तः Principle of Immediate confirmation	संशोधनम् checking
4.	स्वगतेः (वेगस्य) सिद्धान्तः Principle of self pacing	प्रगतिः Advancing
5.	तार्किकक्रमस्य सिद्धान्तः Principle of Logical Sequence	
6.	स्वयं परीक्षणस्य सिद्धान्तः Principle of self testing	परीक्षणम् Testing

1. **लघुपदसिद्धान्तः** (Principle of small Steps)—विषयवस्तु सार्थकपदेषु अंशेषु वा विभज्यते। तथा च छात्रस्य सम्मुखे लघुपदमेकं अंशो वा प्रस्तूयते। अत्र छात्रः सरलतया स्वविषये प्रगतिं प्राप्नोति।

2. **सक्रियप्रतिकरणस्य सिद्धान्तः** (Principle of Active Responding)— सक्रियत्वेन छात्रः प्रत्यक्षानुभवं प्राप्नोति। स्वार्जितं ज्ञानमन्येभ्यो स्थिरतरं भवति। छात्रः तदैव शिक्ष्यते, यदा सः सक्रियरूपेण साक्षात् कार्यं करोति। विषयवस्तुनः प्रत्युत्तरमपि स्वयमेव ददाति।

3. **सद्योनिर्णयस्य सिद्धान्तः** (Principle of Immediate Confirmation)—अधिगम-प्रेरणयोः परस्परसम्बन्धः वर्तते। यदा छात्रः सम्यक् अभिप्रेरितो भवति, तदा तस्य अधिगमः तीव्रः, स्थिरः च भवति। अस्य कथनस्य पालनमेव अस्मिन् सिद्धान्ते दृश्यते। अभिक्रमिताध्ययने प्रतिक्रियायाः अनन्तरं परिणामस्य ज्ञानं दीयते, यत् उत्तरं शुद्धमशुद्धं वा इति। शुद्धोत्तरस्यावस्थायां छात्रः अग्रिमपदं गच्छति। यदि उत्तरमशुद्धमस्ति तदा छात्रः शुद्धोत्तरमेव पठति। अग्रिमे प्रयासे शुद्धोत्तरदानस्य सम्भावना वर्धिष्यते। छात्रः अधिगमसमये सफलतां सन्तुष्टिं वा प्राप्नोति, तदा शीघ्रं प्रतिपुष्ट्या छात्रः पुनर्बलनं प्राप्नोति। अपि च शुद्धोत्तरस्याधारेण क्रमबद्धप्रयोगानां माध्यमेन अग्रे अभिप्रेरितो भवति, अधिगमस्य च सम्पूर्णतां प्राप्नोति।

4. **स्वगतेः सिद्धान्तः** (Principle of Self Pacing)—कक्षायां केचन धीमन्तः छात्राः, अन्ये केचन मन्दबुद्धयश्च भवन्ति। तत्र ये कुशाग्रमतयः छात्राः ते विषयस्य ज्ञानं शीघ्रं प्राप्नुवन्ति, परन्तु मन्दबुद्धिछात्राणां कृते तस्यैव विषयस्य ज्ञानार्थं अधिकः समयः अपेक्षितो भवति। अभिक्रमिताध्ययने प्रत्येकं छात्राणां कृते स्वगत्याधिगमाय अवकाशः प्रकल्प्यते। प्रत्येकं छात्राणां कृते अयम् अवसरः प्रदीयते यत् सः स्व-योग्यतायाः क्षमतायाः कौशलस्य च आधारेण मन्दं-मन्दं, तीव्रगत्या वा अधिगमं कर्तुं शक्नोति।

5. **तार्किकक्रमस्य सिद्धान्तः** (Principle of Logical Sequence)—अभिक्रमिताध्ययने छात्रः स्वयमेवाध्ययनं करोति। अध्यापकः केवलं मार्गदर्शक एव तिष्ठति। विषयवस्तु छात्राणां सम्मुखे तथा उपस्थापनीयं यथा छात्रः सरलतया विषयं सम्यक् अवगच्छेत्। कियत् लघुपदेषु विषयस्य विभाजनं करणीयम्, अपि च केषां पदानां निर्माणं केन प्रकारेण करणीयम्? येन अभिक्रमिताधिगमः

स्वोद्देश्यस्य पूर्तिं कर्तुं शक्नुयात्, इत्येतादृशानां सर्वेषां प्रश्नानां समाधानाय तर्कस्य सहायता अपेक्षिता।

6. स्व-मूल्याङ्नस्य सिद्धान्तः (Principle of Self Testing)—यदि छात्रस्य दोषाणां त्रुटीनां च परीक्षणं समुचितसमये भवति चेद् अभिक्रमिताध्ययने छात्रः स्वाधिगमस्य मूल्याङ्कनं स्वयमेव कर्तुं शक्नोति।

4. अभिक्रमितानुदेशनसामग्र्याः निर्माणम्

अभिक्रमस्य (Programme) रचना उच्चस्तरीयं बौद्धिकं कार्यं भवति। एतत् कार्यं त्रिषु भागेषु विभज्यते। यथा—

1. पूर्वसन्नाहः (आयोजनम्)
2. रचना (अभिक्रमस्य लेखनम्)
3. मूल्याङ्कनम् (परीक्षणम्)

1. पूर्वसन्नाहः (Preparatory Phase)

अभिक्रमसामग्र्याः निर्माणस्य प्रथमघट्टो भवति पूर्वसन्नाहः। अत्रैतानि पञ्च पदानि अन्तर्भवन्ति। यथा—

1. प्रकरणस्य, शीर्षकस्य वा चयनम् (Selection of the topic or units to be programmed)—

कस्याप्यभिक्रमस्य निर्माणार्थं प्रकरणस्य चयनात्पूर्वम् अधोलिखिताः प्रश्नाः समाहिताः स्युः।

1. किमस्मिन् प्रकरणे कोऽप्यभिक्रमः निर्मितः उपलभ्यते?
2. किमेतत्प्रकरणम् अन्येन केनापि विधिना इतोऽपि सम्यक् पाठयितुं शक्यते?
3. किमेतत्प्रकरणं छात्राणां दृष्ट्या सरलतया, तार्किकरीत्या, मनोवैज्ञानिकरीत्या च प्रस्तोतुं शक्यते, येनायमभिक्रमः छात्राणां रुचिकरः, उपयुक्तश्च स्यात्?
4. किमेतत् छात्राणां पाठ्यक्रमस्य आवश्यकताः पूरयितुं शक्नोति?
5. अस्य अभिक्रमस्य रचयितुः किमस्य प्रकरणस्य पूर्णं ज्ञानमस्ति?

6. किमेतत्प्रकरणं छात्राणां ग्रहणशक्तिमाश्रित्य तर्कबद्धतया प्रतिपादयितुम्, उचितेन समयेन अध्येतुमुपयुक्तम् अभिक्रमं निर्मातुं योग्यमस्ति?

7. अभिक्रमितानुदेशनस्य सिद्धान्तानुसारेण अभिक्रमं निर्मातुं किमेतत्प्रकरणं योग्यमस्ति?

2. छात्राणां पूर्वज्ञानस्य सूचना (Writing informations related to the previous knowledge of students)

येषां छात्राणां कृते अभिक्रमोऽयं निर्मीयते तेषाम्, आयुः, लिङ्गं, सामाजिकस्तरः, आर्थिकस्तरः, मानसिकस्तरः, रुचिः, योग्यताः, पश्चात्तलं, पूर्वानुभवः इत्येते विषयाः स्पष्टमुल्लेखनीयाः। तदनुसारमेव अभिक्रमः लेखनीयः।

3. उद्देश्यानां व्यावहारिकशब्दैः लेखनम् (Writing objectives in behavioural terms)—

अभिक्रमितानुदेशनार्थं स्वीकृतस्य प्रकरणस्य उद्देश्यानि स्पष्टैः व्यावहारिकशब्दैः निरूपणीयानि। तदर्थं कार्यविवरणं (Task description), कार्यविश्लेषणञ्च (Task analysis) कर्तव्यम्। उद्देश्यानां लेखनाय राबर्ट् मेगर्, मिल्लर्, ग्रोनलुण्ड्, दवे इत्यादीनामुपागमेषु कस्यचिदुपागमः (विधिर्वा) आवश्यकतानुसारं प्रयुज्यते। उद्देश्यानि मूर्तक्रियावाचकैः शब्दैः (Action verbs) लेखनीयानि। व्यावहारिकोद्देश्यानि वस्तुनिष्ठमानदण्डपरीक्षाणां (Objective Criterion Test) निर्माणे सहायकानि भवन्ति।

4. अध्याप्यविषयस्य रूपरेखानिर्माणम् (Development of specific outlines of content)—

छात्राणां पूर्वज्ञानस्य, पूर्वानुभवस्य, पूर्वव्यवहारस्य, निर्धारितानाम् उद्देश्यानाञ्च आधारेण अध्याप्यविषयस्य रूपरेखा निर्मीयते। अभिक्रमनिर्माणार्थम् अपेक्षितः सर्वोऽपि विषयः अत्र अन्तर्भवेत्। तर्कबद्धानां, मनोवैज्ञानिकानां सिद्धान्तानाम् आधारेण रूपरेखा निर्मिता स्यात्।

5. मानदण्डपरीक्षायाः निर्माणम् (Construction of criterion test)—

छात्राणाम् अन्तिमव्यवहारस्य मूल्याङ्कनाय मानदण्डपरीक्षा निर्मीयते। अस्यां परीक्षायां विशिष्टोद्देश्यानामाधारेण वस्तुनिष्ठप्रश्नाः पृच्छ्यन्ते। अत्र तेषां सर्वेषां

व्यवहाराणां, कौशलानाञ्च परीक्षणं भवति यदर्थमयम् अभिक्रमो निर्मितः। एषैव 'मानदण्डपरीक्षा' इत्युच्यते। अस्याः परीक्षायाः उद्देश्यानि तावत्— 1. अभिक्रमस्य उद्देश्यानि छात्रैः प्राप्तानि, न वा? 2. यदि प्राप्तानि तर्हि कियत्पर्यन्तम्? (का सीमा?) 3. यदि न प्राप्तानि तर्हि कारणानि कानि? 4. कथं वा प्रापयितुं शक्यन्ते? इत्येतेषां प्रश्नानां निश्चितमुत्तरं प्राप्तव्यम्।

अभिक्रमनिर्मात्रा श्रद्धातव्यं यत् प्रत्येकमुद्देश्यानां त्रिचतुराः प्रश्नाः भवेयुः। एतेषां प्रश्नानामुत्तरदानाय छात्राणां कृते उचिताः, स्पष्टाः निर्देशाः स्युः। अपेक्षितश्चेत् मानदण्डपरीक्षायाः विश्वसनीयता, वैधता (Validity) च परीक्षिता स्यात्।

2. रचना (Developmental phase)

अस्मिन् रचनात्मके द्वितीयघट्टे वस्तुतः अभिक्रमस्य रचना क्रियते। रचनायाः पूर्वं केचन विषयाः निर्णेयाः भवन्ति। यथा—

1. अभिक्रमः केन विधिना लेखनीयः? (रेखीय/शाखीय/अवरोह)
2. अध्येतुः पूर्वव्यवहाराः - पूर्वानुभवाः कीदृशाः सन्ति?
3. अनुदेशनस्य उद्देश्यानि कानि निर्धारितानि सन्ति?
4. पाठ्यविषयस्य स्वभावः कीदृशः?

अभिक्रमनिर्माणे अभिक्रमिताधिगमस्य सिद्धान्ताः सर्वदा श्रद्धेयाः।

(A) पदानां रचना (Designing of Frames)—

लघुषु अंशेषु विभक्तस्य पाठ्यविषयस्य क्रमशः बोधनाय उपयुक्ता काचित् अन्वितिः पदमिति उच्यते। अस्य पदस्य त्रीण्यङ्गानि भवन्ति।

1. उद्दीपनम् (Stimulus)—छात्रस्य प्रतिक्रियामुत्पादयितुं अनुकूल-परिस्थितिमुत्पाद्य, प्रेरणाप्रदानाय तस्य समक्षं प्रस्तुतः पाठ्यांशः उद्दीपनमित्युच्यते। एतत् पदस्य प्रथममङ्गं भवति।

2. प्रतिक्रिया (Response)—पदस्य पठनात् परं छात्रः कामपि प्रतिक्रियाम् अवश्यं करोति। एतत्तु द्वितीयमङ्गं भवति।

3. पुनर्बलनम् / प्रतिपुष्टिः (Reinforcement / Feed back)—छात्रः स्वप्रतिक्रियायाः सत्यत्वम्, असत्यत्वं वा जानाति। तेन च प्रतिपुष्टिं लभते। एतच्च तृतीयमङ्गं भवति पदस्य।

प्रायः अभिक्रमे त्रिविधानि पदानि प्रयुज्यन्ते। तानि च—

(अ) शिक्षणपदानि (Teaching Frames)—एतेषु पदेषु छात्राणां कृते नवीनपाठ्यांशाः प्रस्तुतीक्रियन्ते। कस्मिन्नपि अभिक्रमे एतादृशानि पदानि 60% तः 70% पर्यन्तं भवन्ति।

(आ) अभ्यासपदानि (Practice Frames)—बोधितस्य नवीनविषयस्य दृढीकरणाय अभ्यासपदानि प्रयुज्यन्ते। लब्धस्य ज्ञानस्य पुनः प्रयोगेण छात्रः अभ्यासं करोति। अभिक्रमे एतनि पदानि प्रायः 20% तः 25% पर्यन्तं भवितुमर्हन्ति।

(इ) परीक्षणपदानि (Testing Frames)—छात्रैः अध्ययनेन लब्धस्य ज्ञानस्य परीक्षणार्थमेतानि पदानि प्रयुज्यन्ते। छात्राणां नवीनज्ञानस्य मूल्याङ्कनमेव एतेषामुद्देश्यं भवति। एतादृशानि पदानि अभिक्रमे प्रायशः 10% तः 15% पर्यन्तं भवन्ति।

छात्रस्य प्रतिक्रियाः यदा दोषरहिताः भवन्ति तदा सः विजयेन प्रोत्साहितः वेगेन अध्ययनं करोति। अतः एतेषु पदेषु पाठ्यांशस्य स्पष्टीकरणाय, समीचीनदिशानिर्देशाय च केचन सहायकशब्दाः, सूचनाश्च संयोज्यन्ते। एते पूरकाः (Primes) इत्युच्यन्ते। तथैव छात्रस्य प्रतिक्रियासु (प्रश्नानामुत्तरेषु) दोषस्य न्यूनीकरणेन, समुचितप्रतिक्रियार्थं छात्रं प्रेरयितुं प्रचोदकाः (Prompts) प्रयुज्यन्ते। एते विशेषसङ्केताः भवन्ति ये छात्रम् असमीचीनप्रतिक्रियायाः निवर्त्य, समीचीन-प्रतिक्रियां कर्तुं प्रचोदयन्ति।

अभिक्रमस्य प्रारम्भे प्रचोदकाः अधिकतया प्रयुज्यन्ते। ततः क्रमशः न्यूनीकरणेन अन्ते सर्वथा तेषां लोपो भवति। एषा प्रक्रिया विलुप्तीकरणम् (Fading) इत्युच्यते।

(B) पदानां समुचितक्रमेण स्थापनम् (Sequencing of Frames)

पदानां निर्माणानन्तरं तेषां तर्कबद्धक्रमेण व्यवस्थापनम् अत्यन्तावश्यकं भवति। अत्र 'मनोवैज्ञानिकात् तार्किकं प्रति' (Psychological to logical) इति शिक्षणसूत्रमुपयुज्यते। निश्चितोद्देश्यानां प्राप्तये निश्चितक्रमस्य अनुसरणं प्रभावकरं भवति।

(C) अभिक्रमस्य मूलरूपस्य लेखनम् (Writing initial Draft)—

विभिन्नानां पदानां निर्माणानन्तरं पूर्णः अभिक्रमः लेखनीयः।

(D) सम्पादनम् (Editing)—निर्मितस्य अभिक्रमस्य मूलरूपस्य युक्तिपूर्वकं सम्पादनमपेक्ष्यते। अत्र त्रयः विषयाः श्रद्धेयाः सन्ति। यथा—

1. पाठ्यविषयस्य निरूपणे काऽपि न्यूनता अस्ति वेति विषयविशेषज्ञानां साह्येन परीक्षणीयम्।
2. अभिक्रमविशेषज्ञानां साह्येन अनुदेशनप्रविधीनाम् अनुसरणे, पदानां रचनायां, क्रमेण व्यवस्थापने च सञ्जातानां त्रुटीनां निवारणं क्रियते।
3. भाषाविशेषज्ञानां साहाय्येन वर्णक्रमे, वाक्यनिर्माणे च जाताः दोषाः संशोध्यन्ते। अनुपयुक्तानाम्, अस्पष्टानां शब्दानां परिवर्तनं क्रियते। निर्देशानाम् अस्पष्टता, अनिश्चितता, उदाहरणानाम् अनुपयुक्तता इत्यादीनां परीक्षणेन अभिक्रमस्य मूलरूपम् उचितैः आवश्यकैः परिवर्तनैः सज्जीक्रियते।

3. परीक्षणं, मूल्याङ्कनञ्च (Testing and Evaluation Phase)

अभिक्रमनिर्माणस्य अन्तिमघट्टोऽयं, यत्र मूलरूपस्य परीक्षणं, संशोधनं, मूल्याङ्कनञ्च क्रियते। तदर्थमेताः क्रियाः सम्पाद्यन्ते। यथा—

1. व्यक्तिगतपरीक्षणम् (Individual Tryout)—निर्मितस्य अभिक्रमस्य मूलरूपस्य अध्ययनाय पञ्चषाः छात्राः नियुज्यन्ते। अभिक्रमे प्रयुक्तानां पदानामाकारस्य, भाषायाः, आशयानां विषये, पूरकाणां, प्रचोदकानाञ्च विषये छात्राणामभिप्रायाः सङ्गृह्यन्ते। छात्रैः कृताः प्रतिक्रियाः परीक्ष्यन्ते। एतेषामाधारेण अभिक्रमे आवश्यकानि परिवर्तनानि, परिमार्जनानि च सम्पाद्यन्ते।

2. लघुसमूहपरीक्षणम् (Small group tryout)—संशोधितस्य अभिक्रमस्य अध्ययनाय 10–20 छात्राणां कश्चन लघुसमूहः नियुज्यते। एतैः छात्रैः अध्ययने अनुभूताः क्लेशाः, तत्र कारणानि, छात्राणां प्रतिक्रियाः, अध्ययनार्थं स्वीकृतः समयः इत्येते सर्वे परिशील्यन्ते। एतेषां दोषाणां परिमार्जनेन अभिक्रमस्य पुनः संशोधनं क्रियते।

3. क्षेत्रपरीक्षणम् (Field Tryout)—एवं संशोधितस्य अभिक्रमस्य अध्ययनाय विभिन्नवर्गाणां छात्राणां प्रतिनिधिभूतः कश्चन समूहः नियुज्यते। अस्मिन् समूहे बालकाः, बालिकाः, ग्रामीणाः, नागरिकाः, प्रतिभाशालिनः, सामान्याः इत्येवं विभिन्नवर्गीयाणां छात्राणां प्रतिनिधयः अन्तर्भवन्ति। 50–100 छात्राणामयं समूहः

अस्मिन् परीक्षणे नियुज्यते। एतेषां छात्राणामाशयाः, प्रतिक्रियाः, प्रस्तावाश्च अस्य अभिक्रमस्य अन्तिमरूपनिर्धारणे आधाराः भवन्ति। अस्य अभिक्रमस्य वैधतायां, विश्वसनीयतायाञ्च एतत्परीक्षणं प्रमाणं भवति।

4. मूल्याङ्कनम् (Evaluation)—क्षेत्रपरीक्षणेन प्राप्तानाम् अङ्कानाम् आधारेण एतेषां विषयाणां मूल्याङ्कनं क्रियते। यथा—

(अ) अभिक्रमस्य दोषानुपातः (Error rate) अनेन सूत्रेण ज्ञातुं शक्यते। यथा—

$$1.\ \text{अभिक्रमस्य दोषानुपातः (प्रतिशतम् \%)} = \frac{\text{त्रुटीनां संख्या} \times 100}{\text{पदानां संख्या} \times \text{छात्राणां संख्या}}$$

$$\text{Programme error rate (in percentage)} = \frac{\text{Total No. of errors} \times 100}{\text{No. of Frames} \times \text{No. of students}}$$

उदाहरणम्—पञ्च छात्राः दशपदात्मकमेकम् अभिक्रमम् अधीयते। पञ्चभिः आहत्य पञ्च दोषाः कृताः। तदानीं तस्य अभिक्रमस्य दोषानुपातः—

$$\frac{5 \times 100}{10 \times 5} = 10\%$$

रेखीयाभिक्रमेषु (Linear programmes) दोषानुपातः 5% तः 10% पर्यन्तं शाखीयाभिक्रमेषु (Branching Programmes) 20% पर्यन्तञ्च भवितुमर्हति।

2. अभिक्रमघनत्वम् (Programme density)—अभिक्रमघनत्वस्य ज्ञानेन अभिक्रमस्य कठिनतायाः स्तरः ज्ञातुं शक्यते। तदर्थमेतत्सूत्रं प्रयुज्यते।

$$\text{TTR विशेषसूचकानुपातः (Type Token Ratio)} = \frac{\text{अभिक्रमे विभिन्नप्रकाराणां प्रतिक्रियाणां संख्या (Total No. of different types of responses in a programme)}}{\text{अभिक्रमे विद्यमानानां प्रतिक्रियाणां संख्या (Total No. of responses required in a programme)}}$$

अभिक्रमस्य विशेषसूचकानुपातस्य (T.T.R.) मूल्यं

0.25 – 0.33 मध्ये स्यात्।

3. तारतम्यप्रवाहः (Sequence progression)—तारतम्य प्रवाहः तालिकायाः (Scalogram) साह्येन ज्ञातुं शक्यते। मानदण्डपरीक्षणे प्राप्ताङ्कानाम् आधारेण तालिका निर्मीयते। तालिकायाः आधारेण अभिक्रमे तारतम्यप्रवाहः ज्ञायते। यदि पदानां क्रमव्यवस्था उचिता नास्ति तर्हि संशोधनं क्रियते।

इत्थं परीक्षणैः मूल्याङ्कनेन च संशोधितः अभिक्रमः सर्वेषां छात्राणामुपयोगाय प्रयुज्यते।

यद्यप्यनेकविधाः अभिक्रमाः सम्प्रति उपलभ्यन्ते, तथापि तेषु त्रिविधाः अभिक्रमाः प्रसिद्धाः सन्ति। ते च

1. रेखीयाभिक्रमः Linear Programme
2. शाखीयाभिक्रमः Branching Programme
3. अवरोहाभिक्रमः Mathetics Programme

1. रेखीयाभिक्रमः (Linear Programme)—

प्रो. बि. एफ्. स्किन्नर् महोदयः अस्य प्रतिपादकः। स्वेनैव प्रतिपादितस्य 'व्यवहारनिबन्धनसिद्धान्तस्य' (Operant conditioning) आधारेण अभिक्रमोऽयं निर्मितः। मानवस्य व्यवहारः निश्चितदिशायां प्रवर्तयितुं शक्यते। अभीष्टव्यवहाराः शिक्षयितुं शक्यन्ते। शिक्षणीयः व्यवहारः अल्पेषु अंशेषु विभजनीयः। एकैकस्य अंशस्य शिक्षणात् परं सोंऽशः पुनर्बलनेन दृढीकरणीयः। अनेन क्रमेण मनुष्यः अपेक्षितव्यवहारे शिक्षितः भवति। तादृशः अभिक्रमः रेखीयाभिक्रमः इत्युच्यते छात्रः ऋजुगत्या (ऋजुरेखया) निश्चितानि पदानि अध्येति।

पदस्य (Frame) स्वरूपम्—	
पदस्य क्रमसख्ंया	पूर्वपदे पृष्टस्य प्रश्नस्य उत्तरम्
अनन्तरपाठ्यांशः	
अभ्यासकार्यम् / प्रश्नः	
	छात्रस्य प्रतिक्रिया / उत्तरम्

रेखीयाभिक्रमे छात्रः प्रथमं पदमधीत्य तत्र पृष्टस्य प्रश्नस्य उत्तरं लिखति। द्वितीयपदे स्वकीयमुत्तरं समीचीनम्, असमीचीनं वा जानाति। परन्तु समीचीनञ्चेत्

कुतः समीचीनम् इति वा, असमीचीनश्चेत् कुतः इति वा ज्ञातुमवसरो नास्ति। अतः तस्य अध्ययनं पूर्णतया अभिक्रमनिर्मात्रा नियन्त्रितं भवति। छात्रस्य तत्र स्वातन्त्र्यं नास्ति। अतः अयमभिक्रमः 'बाह्यनियन्त्रिताभिक्रमः' (Extrinsic Programme) इत्यपि कथ्यते।

रेखीयाभिक्रमे छात्रस्य समक्षं कश्चन लघुपाठ्यांशः उपस्थाप्यते। सः तमधीत्य सम्बद्धस्य प्रश्नस्य उत्तरं लिखति। स्वस्य उत्तरं समीचीनम् / असमीचीनं वेति जानाति। समीचीनश्चेत् पुनर्बलनं प्राप्नोति। ततः द्वितीयं पाठ्यांशमधीते। एवं प्रथमपदात् परं द्वितीयं पदं, ततः तृतीयं पदं, ततः चतुर्थं पदमिति क्रमशः ऋजुरेखया अनुदेशनं प्रचलतीति रेखीयाभिक्रम इत्यस्य नाम सार्थकं भवति।

2. शाखीयाभिक्रमः (Branching Programme)—

अस्य शाखीयाभिक्रमस्य प्रतिपादकः श्री एन्. ए. क्रौडर्महोदयो भवति। अयमभिक्रमः पाठ्यांशानां प्रस्तुतीकरणस्य कश्चन प्रभावशाली प्रविधिर्भवति। अत्र अनेके शिक्षणसिद्धान्ताः प्रयुज्यन्ते। छात्रः स्वेच्छया प्रतिक्रियाः कर्तुं प्रभवति। स्वप्रतिक्रिया समीचीना, असमीचीना वा, तत्र कारणं किमिति ज्ञातुं प्रभवति। एवमत्र छात्रस्य अध्ययनक्रमः स्वयं नियन्त्रित इति हेतोः अयमभिक्रमः 'अन्तर्नियन्त्रिताभिक्रमः' (Intrinsic Programme) इत्यप्युच्यते।

शाखीयाभिक्रमपदस्य परिमाणम् अत्यधिकं भवति। कस्यचित् पदस्य परिमाणम् एकः अनुच्छेदः अनुच्छेदद्वयं, पूर्णं पृष्ठं वा भवितुमर्हति। प्रत्येकं पदेषु पाठ्यांशात् परं बहुविकल्पात्मकः वस्तुनिष्ठप्रश्नः भवति, यस्योत्तरं छात्रः स्वविवेकानुसारं सूचयति। यदि तस्य उत्तरं समीचीनं भवति तर्हि सः अग्रिमं पदमध्येतुं निर्दिश्यते। यदि तस्य उत्तरम् असमीचीनं तर्हि सः सहेतुकं समीचीनमुत्तरं किमिति बोध्यते। समीचीनमुत्तरं ज्ञात्वैव सः अग्रे सरति। मन्दच्छात्रापेक्षया प्रतिभाशाली छात्रः वेगेन अन्तिमव्यवहारम् अधिगच्छति।

3. अवरोहाभिक्रमः (Mathetics Programme)—

थामस्. एफ्. गिलबर्ट् महोदयः अस्य अवरोहाभिक्रमस्य उपज्ञाता भवति। अध्ययनार्थकात् 'मेथीन्' इति ग्रीक्शब्दात् निष्पन्नमिदं पदं 'मेथटिक्स्' इति। अस्मिन्नभिक्रमे पदानां प्रस्तुतिः अवरोहक्रमेण भवतीति अयम् अवरोहाभिक्रमः इत्युच्यते।

'पाठ्यविषये निपुणतामुत्पादयितुं जटिलव्यवहारसमूहस्य विश्लेषणार्थं, पुनःसङ्घटनार्थञ्च पुनर्बलनसिद्धन्तानां सुव्यवस्थितप्रयोगः अवरोहाभिक्रम' इति निरुच्यते। (Mathetics is defined as a systematics application of reinforcement theory to the analysis and construction of complex repertoires which represent the mastery in subjectively matter.)

यद्यपि अयमभिक्रमः जटिलो भवति तथापि कठिनकौशलानां बोधनार्थम्, अभीष्टव्यवहारस्य सम्पादनार्थम्, पाठ्यविषये पूर्णाधिकारमुत्पादयितुञ्च उपादेयो वर्तते।

1. अवरोहाभिक्रमस्य प्रधानविशेषाः—

1. अन्येषु अभिक्रमेष्विव अत्रापि पाठ्यविषयस्य विश्लेषणेन अधिगमस्य प्राप्तिर्भवति।
2. अत्र अध्ययनाय समस्यापदानि, अभ्यासपदानि च विरच्यन्ते।
3. समस्यायाः समाधानस्य अन्वेषणाय, अभ्यासाय च पुनर्बलनं प्रदीयते।
4. अत्र अवरोहश्रृङ्खलासिद्धान्तः प्रयुज्यते। अध्ययनस्य अन्ते प्राप्तव्यं कौशलं प्रथमं प्रस्तूयते। तस्य कौशलस्य प्राप्त्यर्थं अभ्यासः, पुनर्बलनञ्च प्रस्तूयते।
5. अवरोहश्रृङ्खलायां त्रीणि सोपानानि भवन्ति—1. प्रदर्शनम् 2. प्रचोदनम् 3. मोचनम् इति।

2. अवरोहाभिक्रमस्य स्वरूपं, प्रक्रिया च—

अवरोहाभिक्रमस्य निर्माणे मूलभूतानि त्रिविधानि सोपानानि सन्ति। तेषां विवरणमत्र क्रियते—

1. प्रदर्शनम् (Demonstrate)—यस्मिन् व्यवहारे कौशलमधिगन्तव्यं, तस्य सम्पूर्णा प्रक्रिया छात्राय प्रदर्श्यते। इदं व्यवहारकौशलम् अभिक्रमस्य प्रारम्भे एव भवति।

2. प्रचोदनम् (Prompt)—छात्रः व्यवहारकौशलम् अन्तिमपदे अधिगच्छति। ततः पूर्वं विद्यमानेषु उपान्तिमपदेषु व्यवहारांशानां प्रदर्शनं क्रियते, तथा छात्रः व्यवहारांशान् अभ्यसितुं प्रेर्यते। तदेव प्रचोदनमित्युच्यते।

3. मोचनम् (Release)—छात्रेण अभ्यस्ताः व्यवहारांशाः प्रदर्शनात्, प्रचोदनाच्च मुक्ताः भवन्ति। छात्रः प्राप्तकौशलः एतान् व्यवहारांशान् स्वयमेव करोति। एतदेव मोचनमिति कथ्यते।

अत्र अभिक्रमिताधिगमसिद्धान्तानामनुसारेण सवर्णदीर्घसन्धेः रेखीयाभिक्रमः प्रदर्श्यते।

निर्देशाः—इदम् अभिक्रमिताध्ययनं सवर्णदीर्घसन्धेः अधिगमनार्थं वर्तते।

1. सावधानतया प्रत्येकं पदं (फ्रेम) पठतु, यतः अभिक्रमिताधिगमस्य स्वरूपं पदेषु वर्तते।
2. केवलं प्रदत्ताः प्रतिक्रियाः अवलोकनीयाः, रिक्तस्थाने एव स्व-प्रतिक्रियाः लेखनीयाः।
3. प्रत्येकं पदेषु (फ्रेम) उत्तरं लेखनीयम्, यतः इमानि पदानि उत्तमाधिगमस्य कृते उपयुक्तानि, भवतां परीक्षायै नैव।
4. अग्रिमपदे गमनात्पूर्वं स्वस्य-प्रत्येकस्य उत्तरस्य परीक्षणं करणीयम् यतः क्रमबद्धरूपेण पदज्ञानं विना अग्रे न बुध्यते। अतः क्रमबद्धपदमाध्यमेनैव अधिगमः करणीयः।

रेखीयाभिक्रमः- सवर्णदीर्घ-सन्धिः (Linear Programme - Savarna Deergha Sandhi)—अस्याभिक्रमस्य माध्यमेन ज्ञातव्या विषयाः सन्ति—

1. वर्णानां विभागः।
2. ह्रस्वदीर्घयोः भेदः।
3. सन्धेः निर्वचनम्।
4. सवर्णदीर्घसन्धेः नियमः।
5. सवर्णदीर्घसन्धेः उदाहरणानां ज्ञानम्।

सवर्णदीर्घसन्धेः रेखीयाभिक्रमः—

पदम् -1

वर्णाः त्रिषु विभागेषु विभक्ताः सन्ति—

1. स्वरः, 2. व्यञ्जनम्, 3. उभयाक्षरम्

वर्णाः ----- विभागेषु विभक्ताः सन्ति।

उत्तरम्—त्रिषु।

पदम् - 2

स्वतन्त्रतया उच्चारितः वर्णः स्वरः कथ्यते। यथा—अ, आ, इ, ई, उ, ऊ इत्यादिः।

अ, इ, उ इत्यादयः स्वतन्त्रतया उच्चारिताः वर्णाः ----- कथ्यन्ते।

उत्तरम्—स्वराः

पदम् - 3

स्वरः द्वेधा भवति— 1. ह्रस्वस्वरः, लघुस्वरः वा

2. दीर्घः स्वरः

स्वरस्य ----- भेदौ। ----- स्वरः ----- स्वरः इति।

उत्तरम्—1. द्वौ, 2. ह्रस्वः, 3. दीर्घः।

पदम् - 4

अ, इ, उ, ऋ, ह्रस्वस्वराः सन्ति।

ह्रस्वस्वराः ----- सन्ति।

उत्तरम्—अ, इ, उ, ऋ।

पदम् - 5

यस्य उच्चारणे एकमात्रायाः समयः भवति, सः ह्रस्वः स्वरः कथ्यते।

यस्य उच्चारणे ------- समयः भवति, स ह्रस्वः कथ्यते।

उत्तरम्—एकमात्रायाः।

पदम् - 6

आ, ई, ऊ, ॠ, ऐ, ओ, औ दीर्घ-स्वराः सन्ति।

दीर्घ स्वराः ------- सन्ति।

उत्तरम्—आ, ई, ऊ, ऋ, ऐ, ओ, औ।

पदम् - 7

दीर्घस्वरस्य उच्चारणे मात्राद्वयस्य समयः अपेक्षितः।

दीर्घस्वरस्य उच्चारणे ------- समयः भवति।

'ऐ' एकः ---- स्वरः अस्ति, अस्य उच्चारणे ---- मात्रे समयः भवति।

उत्तरम्—मात्राद्वयस्य, दीर्घः, द्वे

पदम् - 8

'अ' इत्यक्षरः ह्रस्व-स्वरः अस्ति, अपि च 'आ' इत्यक्षरः 'अ' अक्षरस्य दीर्घः अस्ति।

'अ' अक्षरस्य उच्चारणे एक मात्रायाः, आ इत्यस्य उच्चारणे च द्वयोः मात्रयोः समयः अपेक्षितः।

ह्रस्वेण दीर्घेण वा समानस्वरेण रिक्तस्थानानि पूरयत—

1. --- आ
2. इ ---
3. --- ऊ
4. ऋ ---

उत्तरम्—

1. अ, आ
2. इ, ई
3. उ, ऊ
4. ऋ, ॠ

पदम् - 9

एकस्मिन् क्रमे चत्वारः स्वराः अ, इ, उ, ऋ, ह्रस्वाः भवन्ति, अपि च अष्टस्वराः आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ, दीर्घाः भवन्ति।

अधोलिखिताः स्वराः ह्रस्वाः दीर्घाः वा सन्ति, अपि च उच्चारण-समयः भवति—

यथा अ ह्रस्वः एकमात्रा

1. ऊ --- ---
2. ए --- ---

3. इ --- ---

4. ओ --- ---

5. ऋ --- ---

6. औ --- ---

7. ई --- ---

उत्तरम्—

1. दीर्घः, द्वे मात्रे,
2. ह्रस्वः, एका,
3. ह्रस्वः, एका,
4. दीर्घः, द्वे
5. ह्रस्वः, एका
6. दीर्घः, द्वे,
7. दीर्घः, द्वे।

पदम् - 10

बाल, विद्या, इति, गुरू, पितृ, गौरी प्रभृतीनां शब्दानां अन्ते अ, आ, इ, ऊ, ऋ, ई इति ह्रस्वस्वरो दीर्घस्वरो वा अस्ति।

अधोलिखितेषु शब्देषु अन्तिमस्वरः कः ?

गुरु, बाल, पितृ, विद्या।

उत्तरम्—उ, अ, ऋ, आ।

पदम् - 11

इन्द्रः, आलयः, ईश्वरः, ऋणम्, प्रभृतीनां शब्दानां प्रारम्भे इ, आ, ई, ऋ स्वराः ह्रस्वाः दीर्घाः वा सन्ति।

अधोलिखितेषु शब्देषु प्रारम्भे कः स्वरः वर्तते—

इव, आलयः, ईश्वरः, ऋणम्।

उत्तरम्—इ, आ, ई, ऋ।

पदम् - 12

यदा द्वयोः अक्षरयोः मेलनं भवति, द्वयोः अक्षरयोः उच्चारणं च विलम्बं विना क्रियते तदा सन्धिः कथ्यते।

यदा -- मेलनं भवति, तथा च विलम्बं विना उच्चारणं क्रियते तदा --- कथ्यते।

उत्तरम्— द्वयोः अक्षरयोः,

सन्धिः।

पदम् - 13

यदा स्वराणां मेलनं भवति, तदा सः स्वरसन्धिः इति कथ्यते।

यदा ---- मेलनं भवति तर्हि सः ---- इति कथ्यते।

उत्तरम्— स्वराणां,

स्वर-सन्धिः।

पदम् - 14

यदा शब्दस्य अन्तिमः ह्रस्वः, दीर्घो वा अ, आ, वा स्वरः अन्येन सह समानेन ह्रस्व/दीर्घ अ, आ स्वरेण मिलति तदा स्वरः दीर्घो भवति।

यथा—मम	+	अपि	=	ममापि
अ	+	अ	=	आ
देव	+	आलयः	=	देवालयः
अ	+	आ	=	आ
महा	+	आत्मा	=	महात्मा
आ	+	आ	=	आ
भिक्षा	+	अस्ति	=	भिक्षास्ति
आ	+	अ	=	आ

अधो लिखितेषु उदाहरणेषु सन्धिविच्छेदः करणीयः—

महात्मा = ----- + -----

विद्यालयः = ----- + -----

तत्रासीत्	=	-----	+	-----
ममापि	=	-----	+	-----

उत्तरम्—

महा	+	आत्मा
विद्या	+	आलयः
तत्र	+	आसीत्
मम	+	अपि

पदम् - 15

यदा शब्दस्य अन्तिमः ह्रस्वः दीर्घो वा इ, ई वा स्वरः अन्येन सह समानेन ह्रस्व/दीर्घ इ, ई स्वरेण मिलति तदा स्वरः दीर्घो भवति।

यथा—गिरि	+	इन्द्रः	=	गिरीन्द्रः
गौरी	+	ईशः	=	गौरीशः
श्री	+	ईशः	=	श्रीशः
रति	+	ईशः	=	रतीशः

रिक्तस्थानानि पूरयत—

1.	----	+	ईशः	=	रतीशः
2.	गौरी	+	ईशः	=	----
3.	गिरि	+	----	=	गिरीन्द्रः
4.	----	+	----	=	श्रीशः

उत्तरम्—1. रति, 2. गौरीशः, 3. इन्द्रः, 4. श्री+ईशः

पदम् - 16

यदा शब्दस्य अन्तिमः ह्रस्वः, दीर्घो वा उ, ऊ, वा स्वरः अन्येन सह समानेन ह्रस्व/दीर्घ उ, ऊ स्वरेण मिलति तदा स्वरः दीर्घो भवति।

यथा—भानु	+	उदयः	=	भानूदयः
वधू	+	उत्सवः	=	वधूत्सवः

लघु + ऊर्णा = लघूर्णा

यवागू + उष्मा = यवागूष्मा

अधोलिखितेषु शब्देषु सन्धिं कुरूत—

1. लघु + ऊर्णा =
2. यवागू + ऊष्मा =
3. भानु + उदयः =
4. वधू + उत्सवः =

उत्तरम्—1. लघूर्णा, 2. यवागूष्मा, 3. भानूदयः 4. वधूत्सवः

पदम् –17

यदा शब्दस्य अन्तिमः ह्रस्वः, दीर्घो वा ऋ, ॠ वा स्वरः अन्येन सह समानेन ह्रस्व/दीर्घ ऋ, ॠ स्वरेण मिलति तदा स्वरः दीर्घो भवति।

यथा—होतृ + ऋषिः = होतॄषिः (ऋ + ऋ = ॠ)

तृ + ऋकारः = तॄकारः (ऋ + ऋ = ॠ)

पितृ + ऋणम् = पितॄणम् (ऋ + ऋ = ॠ)

अधोलिखितेषु शब्देषु सन्धिविच्छेदः करणीयः—

1. तॄकारः
2. पितॄणम्
3. होतॄषिः

उत्तरम्—

1. तृ + ऋकारः,
2. पितृ + ऋणम्,
3. होतृ + ऋषिः

पदम् –18

दीर्घसन्धेः नियमः शब्दप्रयोगमाध्यमेन प्रतिपाद्यते—

यथा— अत्र + अस्मि = अत्रास्मि

'अत्र' प्रथमशब्दस्य अन्तिमः स्वरः अ वर्तते। 'अस्मि' इति द्वितीयशब्दस्य प्रारम्भे 'अ' स्वरः वर्तते। अतः द्वयोः स्वरयोः मेलनेन दीर्घः 'आ' स्वरः सञ्जातः। द्वयोः शब्दयोः सन्धिः 'अत्रास्मि' इति अभवत्।

अधोनिर्दिष्टपदानां सन्धिविच्छेदं कुरुत—

देवालयः –

विद्यालयः –

तत्रासीत् –

अत्रायम् –

उत्तरम्—देव + आलयः

विद्या + आलयः

तत्र + आसीत्

अत्र + अयम्

पदम् - 19

अन्यस्मिन् उदाहरणे अस्य नियमस्य प्रयोगः—

विद्या	+	आलयः	=	विद्यालयः
गौरी	+	ईशः	=	गौरीशः
गिरि	+	इन्द्रः	=	गिरीन्द्रः
वधू	+	उत्तमा	=	वधूत्तमा
मधु	+	उदकम्	=	मधूदकम्
पितृ	+	ऋणम्	=	पितृणम्

अधो लिखितेषु पदेषु सन्धिं कुरुत—

देव	+	आलयः	=
अद्य	+	आगच्छति	=
धातृ	+	ऋषिः	=
गिरि	+	इन्द्रः	=

यदि + इच्छा =

चमू + उत्थानम् =

उत्तरम्—1. देवालयः 2. अद्यागच्छति 3. धातृषिः 4. गिरीन्द्रः
5. यदीच्छा 6. चमूत्थानम्

पदम् - 20

यदा ह्रस्वः दीर्घो वा समानस्वराः परस्परं मिलन्ति, सः सवर्णदीर्घ–सन्धिः इति कथ्यते।

प्रथमशब्दस्य अन्तिमस्वरः ह्रस्वः ------ वा स्यात्, द्वितीयशब्दस्य प्रथमः स्वरः दीर्घः ------ वा भवति, तदा द्वयोः सवर्णस्वरयोः मेलनेन ------ स्वरः भवति। अयं ------ सन्धिः इति कथ्यते।

उत्तरम्—दीर्घः, ह्रस्वः, दीर्घः, सवर्णदीर्घ।

परीक्षणम्—

1. स्वरस्य के के प्रकाराः सन्ति। प्रत्येकस्य उदाहरणद्वयं दातव्यम्।
2. सन्धिं स्पष्टयत।
3. स्वरसन्धिं स्पष्टयत।
4. दीर्घाः ह्रस्वाश्च स्वराः के ?
5. सवर्णदीर्घसन्धिं स्पष्टयत।
6. अधोनिर्दिष्टेषु पदेषु सन्धिं कुरूत–

   1. धातृ + ऋषिः
   2. पार्वती + इव
   3. सा + अस्ति
   4. मधु + ऊहः

2. एषां सन्धीनां उदाहरणं वदत—

   1. अ + आ = आ
   2. आ + आ = आ

3.	इ	+	इ	=	ई
4.	ई	+	इ	=	ई
5.	ऊ	+	ऊ	=	ऊ
6.	उ	+	ऊ	=	ऊ
7.	ऋ	+	ऋ	=	ॠ

रेखीयाभिक्रमः
(Linear Programme)

विषयः – कर्मधारयसमासः

अस्य पाठस्य अध्ययनेन भवन्तः एतान् विषयान् ज्ञास्यन्ति।

1. विशेषणस्य अर्थः।
2. विशेष्यस्य अर्थः।
3. समासस्य निर्वचनम्।
4. कर्मधारयसमासस्य निर्वचनम् – विशेषणपूर्वपद– कर्मधारयसमासः– उदाहरणानि।
5. समासप्रक्रिया।
6. विग्रहः इत्यस्य अर्थः।
7. समासानां विग्रहवाक्यानि।

निर्देशाः—

कर्मधारयसमासस्य अध्ययनाय निर्मितोऽयमभिक्रमः। एकैकं पदं सम्यक् पठित्वा, निर्देशानुसारं प्रश्नानामुत्तरं लिखतु। ततः परमेव अनन्तरपदे दत्तमुत्तरं पश्यतु।

पदम् –1

1. उन्नतं भवनम् –

उन्नतम् इति पदं भवनस्य विशेषतां बोधयति। यत् पदम् अन्यस्य वस्तुनः विशेषतां बोधयति तत् तस्य विशेषणं भवति। अतः उन्नतम् इति पदं भवनस्य विशेषणं भवति।

1. विशेषणम् अन्यस्य वस्तुनः ----- बोधयति। यत् पदम् अन्यस्य वस्तुनः विशेषतां बोधयति, तत् तस्य --- भवति।
2. उत्तमः बालकः-इत्यत्र उत्तमः इति पदं ------- विशेषतां बोधयति। अतः उत्तमः इति पदं बालकस्य ----- भवति।
3. सुन्दरं चित्रम् - इत्यत्र सुन्दरम् इति पदं चित्रस्य ----- बोधयति। अतः ----- इति पदं चित्रस्य विशेषणं भवति।

पदम् - 2

प्रथमपदस्य उत्तराणि—

1. विशेषतां, विशेषणम्
2. बालकस्य, विशेषणम्
3. विशेषतां, सुन्दरम्

उन्नतं भवनम्-इत्यत्र उन्नतम् इति विशेषणं भवनस्य विशेषतां बोधयति। विशेषणेन यस्य वस्तुनः विशेषता बोध्यते, तत् तस्य विशेषणस्य विशेष्यं भवति। अतः उन्नतम् इति विशेषणस्य विशेष्यं भवनम् अस्ति। विशेष्यस्य भवनस्य विशेषणम्-उन्नतम् अस्ति।

I. एतेषु विशेषणं, विशेष्यञ्च निर्दिशत।

	विशेषणम्	विशेष्यम्
1. उन्नतः वृक्षः-		
2. स्थूलं शरीरम्-		
3. सुन्दरं पुष्पम्-		
4. नूतनं पुस्तकम्-		

पदम् - 3

द्वितीयपदस्य उत्तराणि

	विशेषणम्	-	विशेष्यम्
1.	उन्नतः		वृक्षः
2.	स्थूलं		शरीरम्

3. सुन्दरं पुष्पम्

4. नूतनं पुस्तकम्

द्वयोः पदयोः एकपदत्वेन संयोजनं समासः इति उच्यते। तत्र प्रथमं पदं पूर्वपदम् इति, द्वितीयं पदम् उत्तरपदम् इति च उच्यते। समासे पूर्वोत्तरपदयोः विभक्तिप्रत्यययोः लोपः भवति। एकपदत्वेन संयोजनात् परं समस्तशब्दात् विभक्तिप्रत्ययः भवति। यथा—

उन्नतं भवनम्

उन्नत + भवन

उन्नतभवनम्

अत्र रिक्तस्थानानि यथोचितं पूरयतु।

I. द्वयोः ------- एकपदत्वेन संयोजनं ----- इत्युच्यते।

II.

	पूर्वपदम्	- उत्तरपदम्	विभक्तिलोपः	- समासः
1.	सुन्दरं	पुष्पम्	सुन्दर+पुष्प	- ....
2.	दीर्घः	दण्डः	....	- दीर्घदण्डः
3.	मधुरः	स्वरः	मधुरः +......	- ....
4.	श्यामः	....	......+ मेघ	- श्याममेघः
5.	....	कमलम्	श्वेत+कमल	- ....

पदम् - 4

तृतीयपदस्य उत्तराणि

I. द्वयोः **पदयोः** एकपदत्वेन संयोजनं **समासः** इत्युच्यते।

II.

	पूर्वपदम्	- उत्तरपदम्	विभक्तिलोपः	- समासः
1.	सुन्दरं	पुष्पम्	सुन्दर+पुष्प	- **सुन्दरपुष्पम्**
2.	दीर्घः	दण्डः	**दीर्घ+दण्ड**	- दीर्घदण्डः
3.	मधुरः	स्वरः	मधुर+**स्वर**	- **मधुरस्वरः**
4.	श्यामः	**मेघः**	**श्याम**+मेघ	- श्याममेघः
5.	**श्वेतं**	कमलम्	श्वेत+कमल	- श्वेतकमलम्

विशेषणविशेष्ययोः समासः कर्मधारयसमासः इति उच्यते। विशेषणं पूर्वपदं भवति चेत् विशेषणपूर्वपदकर्मधारयसमासः इति व्यवह्रियते। अस्मिन् समासे उत्तरपदस्य अर्थः प्रधानः भवति।

1. वीरः पुरुषः – वीरपुरुषः इति समासे पूर्वपदं वीरः ---- भवति। उत्तरपदस्य अर्थः पुरुषः ------- भवति। अयं विशेषणपूर्वपद ------- समासः इति उच्यते।

2. शीतं जलम् ---------- इति विशेषणपूर्वपद ------ भवति।

पदम - 5

चतुर्थपदस्य उत्तराणि

1. वीरः पुरुषः – वीरपुरुषः इति समासे पूर्वपदं वीरः **विशेषणं** भवति। उत्तरपदस्य अर्थः पुरुषः **प्रधानः** भवति। अयं विशेषणपूर्वपद **कर्मधारय** समासः इति उच्यते।

2. शीतं जलम् – **शीतजलम्** इति विशेषणपूर्वपद – **कर्मधारयसमासः** भवति।

समासस्य अर्थबोधकं वाक्यं विग्रहः इति उच्यते। वीरपुरुषः इति समासस्य अर्थः वीरः पुरुषः इति। श्याममेघः इति समासस्य विग्रहः श्यामः मेघः ईति।

I. एतेषां समासानां विग्रहं लिखतु।

1. उत्तमपुरुषः — ------------ -------------
2. नीलघटः — ------------ -------------
3. श्वेतगजः — ------------ -------------

II. विग्रहो नाम समासस्य ------ वाक्यं भवति।

पदम - 6

पञ्चमपदस्य उत्तराणि

		समासः	-	विग्रहः
I.	1.	उत्तमपुरुषः	-	उत्तमः पुरुषः
	2.	नीलघटः	-	नीलः घटः
	3.	श्वेतगजः	-	श्वेतः गजः

II. विग्रहो नाम समासस्य अर्थबोधकं वाक्यं भवति।

कर्मधारयसमासे पूर्वपदं स्त्रीप्रत्ययान्तं भवति चेत् स्त्रीप्रत्ययस्यापि लोपः भवति। यथा—

दीर्घा नासिका – दीर्घनासिका

सुन्दरी वनिता – सुन्दरवनिता

श्यामा लता – श्यामलता

I. एतेषां विग्रहवाक्यं लिखतु।

1. संस्कृतवाणी — ....
2. मधुरगीतिका — ....
3. ज्येष्ठभगिनी— ....

पदम् – 7

षष्ठपदस्य उत्तराणि

I.
1. संस्कृतवाणी – संस्कृता वाणी
2. मधुरगीतिका – मधुरा गीतिका
3. ज्येष्ठभगिनी – ज्येष्ठा भगिनी

उद्देश्यपरीक्षणम् (Criterion Test)—

1. विशेषणस्य अर्थः कः ?
2. विशेष्यस्य अर्थः कः ?
3. समासस्य निर्वचनम् किम् ?
4. कर्मधारयसमासस्य निर्वचनम् किम् ?
5. एतेषां पदानां समासं करोतु।

1. गम्भीरा नदी— ....
2. विशालः प्रदेशः— ....
3. दरिद्रः ब्राह्मणः— ....
4. सुन्दरी बालिका— ....
5. उष्णं जलम्— ....

6. एतेषां समासानां विग्रहवाक्यानि लिखतु।

1. लघुगृहम्
2. प्रौढस्त्री
3. घोरराक्षसः
4. मान्यमहर्षिः
5. मनोहरपुष्पम्

शाखीयाभिक्रम
(Branching Programme)

विषयः - द्वन्द्वसमासः

अस्य पाठस्य अध्ययनेन भवान् एतान् विषयान् ज्ञास्यति।

1. समासस्य निर्वचनम्।
2. द्वन्द्वसमासस्य निर्वचनम्।
3. इतरेतरयोगद्वन्द्वस्य आशयः।
4. इतरेतरयोगद्वन्द्वस्य लिङ्गं, वचनम्, उदाहरणानि च।
5. समाहारद्वन्द्वस्य अभिप्रायः।
6. समाहारद्वन्द्वस्य लिङ्गं, वचनम्, उदाहरणानि च।

निर्देशाः—

1. द्वन्द्वसमासस्य अध्ययनाय अयं शाखीयाभिक्रमः निर्मितः।

एकैकं पदं सम्यक् पठित्वा अवगच्छतु। दत्तेषु त्रिषु उत्तरेषु एकं समीचीनमुत्तरं चिनोतु। उत्तरस्य विवरणं पठित्वा उत्तरं समीचीनं वा, न वेति जानातु। उत्तरम् असमीचीनं चेत् अन्यदुत्तरं चिनोतु। **समीचीनम् उत्तरं ज्ञात्वैव अनन्तरं पदं पठतु।**

पदम - 1

द्वयोः पदयोः, अनेकेषां पदानां वा एकपदत्वेन संयोजनं समासः इत्युच्यते।

यथा—रामश्च कृष्णश्च = रामकृष्णौ। अत्र रामः इति प्रथमं पदम्। कृष्णः इति द्वितीयं पदम्। द्वयोः पदयोः संयोजनेन रामकृष्णौ इति एकं पदं भवति। अयं समासः।

रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्च रामलक्ष्मणभरतशत्रुघ्नाः इत्येकं पदं भवति। अत्र चतुर्ण्णां पदानां समासः अस्ति।

येन समासेन द्वयोः पदार्थयोः, अनेकेषां पदार्थानां वा सहयोगः, समूहो वा बोध्यते सः द्वन्द्वसमासः भवति। अत्रः रामकृष्णौ इति समासेन रामस्य, कृष्णस्य च सहयोगः बोध्यते। अयं द्वन्द्वसमासो भवति।

रामलक्ष्मणभरतशत्रुघ्नाः इति समासेन रामस्य, लक्ष्मणस्य, भरतस्य, शत्रुघ्नस्य च सहयोगः बोध्यते।

अयमपि द्वन्द्वसमासो भवति।

रामकृष्णौ इति द्वन्द्वसमासे कृष्णः इति अन्तिमः शब्दः पुँल्लिङ्गः भवति। अतः समस्तं पदं पुँल्लिङ्गे भवति। रामः, कृष्णः इति द्वौ पदार्थौ स्तः। समासे विद्यमानानां पदार्थानां संख्यामाश्रित्य वचनं भवति। रामकृष्णौ इति समस्तं पदं पुँल्लिङ्गे, द्विवचने भवति।

ख-विकल्पः

भवतः उत्तरं समीचीनम्। सीता च रामश्च लक्ष्मणश्च इति त्रयाणां पदानां द्वन्द्वसमासे अन्तिमपदं लक्ष्मणः इति पुँल्लिङ्गे अस्ति। त्रयाणां बहुवचनं भवति। अतः सीतारामलक्ष्मणाः इति द्वन्द्वसमासः पुँल्लिङ्गे, बहुवचने भवति। भवान् द्वितीयं पदं पठितुमर्हति।

ग-विकल्पः

सीता च रामश्च लक्ष्मणश्च इति त्रयाणां पदानां द्वन्द्वसमासे बहुवचनं युक्तमस्ति। परन्तु अन्तिमं पदं लक्ष्मणः इति पुँल्लिङ्गे अस्ति। अतः सीतारामलक्ष्मणानि इति नपुंसकलिङ्गस्य प्रयोगः न युक्तः। अतः समीचीनमुत्तरं चिनोतु।

द्वितीयं पदम्

द्वन्द्वसमासः द्विविधः भवति—1. इतरेतरयोगद्वन्द्वः, 2. समाहारद्वन्द्वः इति।

येन द्वन्द्वसमासेन द्वयोः, अनेकेषां वा पदार्थानां परस्परं सम्बन्धः बोध्यते, स इतरेतरयोगद्वन्द्वसमासः इति कथ्यते। अस्मिन् समासे अन्तिमपदस्य लिङ्गमाश्रित्य समस्तपदस्य लिङ्गं भवति। समासगतानां पदार्थानां संख्यामाश्रित्य वचनं भवति।

यथा—पार्वती च परमेश्वरश्च पार्वतीपरमेश्वरौ।

धनञ्च धान्यञ्च धनधान्ये।

रमा च वाणी च पार्वती च रमावाणीपार्वत्यः। एवं रामलक्ष्मणभरतशत्रुघ्नाः इति अस्मिन् द्वन्द्वसमासे अन्तिमं पदं शत्रुघ्नः इति पुँल्लिङ्गे अस्ति। अत्र चत्वारः पदार्थाः सन्ति। अतः समस्तं पदं पुँल्लिङ्गे, बहुवचने भवति।

समासं कृत्वा, लिङ्गं वचनञ्च योजयतु।

1. सीता च रामश्च लक्ष्मणश्च।

क. सीतारामलक्ष्मणौ

ख. सीतारामलक्ष्मणाः

ग. सीतारामलक्ष्मणानि

क. विकल्पः

सीता च रामश्च लक्ष्मणश्च इति त्रयाणां पदानां द्वन्द्वसमासः क्रियते। अन्तिमं पदं लक्ष्मणः इति पुँल्लिङ्गे अस्ति। अतः समस्तं पदं पुँल्लिङ्गे भवति इति साधु। द्वन्द्वसमासे द्वे पदे भवतः चेत्, द्विवचनं, ततोऽपि अधिकानि भवन्ति चेत् बहुवचनं प्रयोक्तव्यम्। अत्र द्विवचनम् अशुद्धमस्ति। अतः समीचीनम् उत्तरं चिनोतु।

समासार्थस्य बोधकं वाक्यं विग्रहः इति कथ्यते।

समासः		**विग्रहः**
गुरुशिष्यौ	–	गुरुश्च शिष्यश्च
धर्मार्थकाममोक्षाः	–	धर्मश्च अर्थश्च कामश्च मोक्षश्च
सुखदुःखे	–	सुखञ्च दुःखञ्च

प्रश्नः

अन्नपानीये इति समासस्य विग्रहं, संज्ञाञ्च लिखतु।

उत्तरम्-विकल्पाः

क. अन्नश्च पानीयश्च - द्वन्द्वसमासः।

ख. अन्नञ्च पानीयञ्च - द्वन्द्वसमासः।

ग. अन्नञ्च पानीयञ्च- इतरेतरयोगद्वन्द्वसमासः।

क. विकल्पः

अन्नपानीये इति समासे पदद्वयमस्ति। अन्नं, पानीयम् इति। द्वयोरपि लिङ्गं नपुंसकं भवति। अतः अन्नः, पानीयः इति पुँल्लिङ्गे प्रयोगः न युक्तः। द्वन्द्वसमासस्य द्वौ प्रकारौ स्तः। अयं द्वन्द्वसमासः कः इत्यपि चिन्तनीयम्। अतः भवान् समीचीनम् उत्तरं चिनोतु।

ख. विकल्पः

अन्नपानीये इति समासे पदद्वयमस्ति। अन्नं, पानीयम् इति। द्वयोरपि लिङ्गं नपुंसकं भवति। अतः अन्नञ्च पानीयञ्च इति विग्रहः समीचीनः। परन्तु द्वन्द्वसमासस्य द्वौ भेदौ स्तः। अयं कीदृशः द्वन्द्वसमासः इत्यपि चिन्तनीयम्। अतः समीचीनम् उत्तरं चिनोतु।

ग. विकल्पः

अन्नञ्च पानीयञ्च अन्नपानीये इति विग्रहः समीचीनः, यतः अन्नं, पानीयम् इति पदद्वयं नपुंसकलिङ्गमस्ति। अन्नपानीये इति द्वन्द्वसमासेन अन्नपानीययोः परस्परं सम्बन्धः प्रतिपाद्यते। अतः अयम् इतरेतरयोगद्वन्द्वसमासः इति उत्तरं साधु। भवान् तृतीयं पदं पठितुं शक्नोति।

तृतीयं पदम्

यस्मिन् द्वन्द्वसमासे समासगतपदार्थानां समूहस्य प्राधान्यं भवति, सः समाहारद्वन्द्वसमासः इति कथ्यते।

अयं समासः नपुंसकलिङ्गे, एकवचने च भवति।

समाहारद्वन्द्वसमासः प्राणिभिन्नजातिवाचकानां भवति।

जातिवाचकं पदम् एकवचने, बहुवचने वा भवितुमर्हति।

यथा— घटश्च पटश्च तयोः समाहारः घटपटम्।

पत्राणि पुष्पाणि फलानि च तेषां समाहारः पत्रपुष्पफलम्।

प्रश्नः—एतेषां विग्रहवाक्यानां समासं कृत्वा, समासस्य नाम लिखतु।

1. संज्ञाश्च परिभाषाश्च-तासां समाहारः
2. सन्धयश्च समासाश्च-तेषां समाहारः
3. स्थानानि च प्रयत्नाश्च-तेषां समाहारः

उत्तरम्-विकल्पाः

क. विकल्पः

1. संज्ञपरिभाषाः - इतरेतरयोगद्वन्द्वसमासः
2. सन्धिसमासाः - इतरेतरयोगद्वन्द्वसमासः
3. स्थानप्रयत्नाः - इतरेतरयोगद्वन्द्वसमासः

ख. विकल्पः

1. संज्ञापरिभाषम्-समाहारद्वन्द्वसमासः
2. सन्धिसमासम्-समाहारद्वन्द्वसमासः
3. स्थानप्रयत्नम्-समाहारद्वन्द्वसमासः

ग. विकल्पः

1. संज्ञापरिभाषायाः-समाहारद्वन्द्वसमासः
2 सन्धिसमासाः-समाहारद्वन्द्वसमासः
3. स्थानप्रयत्नाः-समाहारद्वन्द्वसमासः

क. विकल्पः

संज्ञाश्च परिभाषाश्च - तासां समाहारः; सन्धयश्च समासाश्च - तेषां समाहारः; स्थानानि च प्रयत्नाश्च तेषां समाहारः इति विग्रहवाक्येषु समाहारस्य = समूहस्य विवक्षितत्वात् एतेषां समासः इतरेतरयोगद्वन्द्वसमासो भवितुं नार्हति। अतः युक्तमुत्तरं चिनोतु।

ख. विकल्पः

संज्ञाश्च परिभाषाश्च तासां समाहारः; सन्धयश्च समासाश्च तेषां समाहारः; स्थानानि च प्रयत्नाश्च तेषां समाहारः इति विग्रहवाक्येषु समाहारस्य = समूहस्य विवक्षितत्वात् एतेषां समासः समाहारद्वन्द्वसमासो भवतीति युक्तम्।

समाहारद्वन्द्वसमासः नपुंसकलिङ्गे, एकवचने च भवतीति संज्ञापरिभाषम्, सन्धिसमासम्, स्थानप्रयत्नम् इति उत्तरं समीचीनम्। भवान् चतुर्थं पदं पठितुं शक्नोति।

ग. विकल्प

संज्ञाश्च परिभाषाश्च तासां समाहारः; सन्धयश्च समासाश्च तेषां समाहारः; स्थानानि च प्रयत्नाश्च तेषां समाहारः इति विग्रहवाक्येषु समाहारस्य = समूहस्य विवक्षितत्वात् एतेषां समासः समाहारद्वन्द्वसमासो भवतीति समीचीनम्। परन्तु समाहारद्वन्द्वे समूहस्य प्राधान्यात् समस्तं पदं नपुंसकलिङ्गे, एकवचने च भवति इत्यपि श्रद्धेयम्। अतः समीचीनमुत्तरं चिनोतु।

चतुर्थं पदम्

शरीराङ्गानां, वाद्यविशेषाणां, सेनाङ्गनाञ्च समाहारद्वन्द्वसमासो भवति।

शरीराङ्गानां यथा—करौ च चरणौ च-तेषां समाहारः करचरणम्।

वाद्यविशेषाणां यथा—वीणा च वेणुश्च मृदङ्गश्च-तेषां समाहारः-वीणावेणुमृदङ्गम्।

सेनाङ्गानां यथा—रथिकाश्च अश्वारोहाश्च-तेषां समाहारः-रथिकाश्वारोहम्।

प्रश्नः—अत्र विग्रहवाक्यानि दत्तानि। तेषां समासं कृत्वा, समासस्य नाम लिखतु।

1. मुखञ्च नासिका च-तयोः समाहारः—
2. भेरी च पटहश्च-तयोः समाहारः—
3. पदातयश्च रथिकाश्च-तेषां समाहारः—

उत्तरम्-विकल्पाः

क. विकल्पः

1. मुखनासिके-इतरेतरयोगद्वन्द्वसमासः।
2. भेरीपटहौ-इतरेतरयोगद्वन्द्वसमासः।
3. पदातिरथिकाः-इतरेतरयोगद्वन्द्वसमासः

ख. विकल्पः

1. मुखनासिके-समाहारद्वन्द्वसमासः।

2. भेरीपटहौ–समाहारद्वन्द्वसमासः।

3. पदातिरथिकाः–समाहारद्वन्द्वसमासः।

ग. विकल्पः

1. मुखनासिकम्–समाहारद्वन्द्वसमासः

2. भेरीपटहम्–समाहारद्वन्द्वसमासः

3. पदातिरथिकम्–समाहारद्वन्द्वसमासः

क. विकल्पः

मुखस्य नासिकायाश्च शरीराङ्गत्वात्, भेर्याः पटहस्य च वाद्यविशेषत्वात्, पदातीनां, रथिकानाञ्च सेनाङ्गत्वात् एतेषां समासाः इतरेतरयोगद्वन्द्वसमासाः न भवन्ति। अतः इदमुत्तरं न समीचीनम्। युक्तमुत्तरं चिनोतु।

ख. विकल्पः

मुखस्य, नासिकायाश्च शरीराङ्गत्वात्, भेर्याः, पटहस्य च वाद्यविशेषत्वात्, पदातीनां, रथिकानाञ्च सेनाङ्गत्वात् एतेषां समासः समाहारद्वन्द्वसमासो भवतीति युक्तम्। परन्तु समाहारद्वन्द्वसमासस्य नपुंसकलिङ्गम्, एकवचनञ्च भवतीति श्रद्धेयम्। अतः समीचीनमुत्तरं चिनोतु।

ग. विकल्पः

मुखस्य, नासिकायाश्च शरीराङ्गत्वात्, भेर्याः, पटहस्य च वाद्यविशेषत्वात्, पदातीनां, रथिकानाञ्च सेनाङ्गत्वात् एतेषां समासः समाहारद्वन्द्वसमासो भवतीति समीचीनम्। समाहारद्वन्द्वसमासः नपुंसकलिङ्गे, एकवचने च भवति। अतः मुखनासिकम्, भेरीपटहम्, पदातिरथिकम् इति उत्तरं साधु। भवान् पञ्चमं पदं पठितुमर्हति।

पञ्चमं पदम्

शाश्वतविरोधिनां जन्तूनां समाहारद्वन्द्वसमासो भवति। यथा—सर्पाश्च नकुलाश्च तेषां समाहारः सर्पनकुलम्।

प्रश्नः एतेषां विग्रहवाक्यानां समासं कृत्वा, समासस्य नाम लिखतु।

1. मूषकाश्च मार्जालाश्च – तेषां समाहारः

2. शुनकश्च बिडालश्च - तयोः समाहारः
3. देवाश्च दानवाश्च - तेषां समाहारः

उत्तरम्-विकल्पाः

क. विकल्पः

1. मूषकमार्जालम् - समाहारद्वन्द्वसमासः
2. शुनकबिडालम् - समाहारद्वन्द्वसमासः
3. देवदानवम् - समाहारद्वन्द्वसमासः

ख. विकल्पः

1. मूषकमार्जालाः - समाहारद्वन्द्वसमासः
2. शुनकबिडालौ - समाहारद्वन्द्वसमासः
3. देवदानवाः - समाहारद्वन्द्वसमासः

ग. विकल्पः

1. मूषकमार्जालाः - इतरेतरयोगद्वन्द्वः
2. शुनकबिडालौ - इतरेतरयोगद्वन्द्वः
3. देवदानवाः - इतरेतरयोगद्वन्द्वः

क. विकल्पः

मूषकाश्च मार्जालाश्च तेषां समाहारः, शुनकश्च बिडालश्च तयोः समाहारः, देवाश्च दानवाश्च तेषां समाहारः इत्येतेषु विग्रहेषु निर्दिष्टानां प्राणिनां शाश्वतविरोधित्वात् एते समासाः समाहारद्वन्द्वसमासाः भवन्तीति समीचीनम्। समाहारद्वन्द्वसमासः नपुंसकलिङ्गे, एकवचने भवति। अतः मूषकमार्जालम्, शुनकबिडालम्, देवदानवम् इति उत्तरं समीचीनम्।

ख. विकल्पः

मूषकाश्च मार्जालाश्च तेषां समाहारः, शुनकश्च बिडालश्च तयोः समाहारः, देवाश्च दानवाश्च तेषां समाहारः इति विग्रहवाक्येषु निर्दिष्टानां प्राणिनां शाश्वतविरोधित्वात् तेषां समासः समाहारद्वन्द्वसमासो भवतीति युक्तम्। परन्तु समाहारद्वन्द्वसमासः नपुंसकलिङ्गे, एकवचने भवतीति श्रद्धेयम्। अतः समीचीनमुत्तरं चिनोतु।

ग. विकल्पः

मूषकाश्च मार्जालाश्च तेषां समाहारः, शुनकश्च बिडालश्च तयो समाहारः, देवाश्च दानवाश्च तेषां समाहारः इति विग्रहवाक्येषु निर्दिष्टानां प्राणिनां शाश्वतविरोधित्वात् तेषां समासः इतरेतरयोगद्वन्द्वसमासो भवितुं नार्हति। अतः समीचीनम् उत्तरं चिनोतु।

उद्देश्यपरीक्षणम् (Criterion test)

1. समासस्य निर्वचनं किम्?
2. द्वन्द्वसमासस्य निर्वचनं किम्?
3. इतरेतयोगद्वन्द्वस्य आशयः कः?
4. इतरेतयोगद्वन्द्वस्य लिङ्गं, वचनञ्च कस्य आधारेण भवति?
5. समाहारद्वन्द्वस्य अभिप्रायः कः?
6. समाहारद्वन्द्वस्य लिङ्गं, वचनञ्च किं भवति?
7. एतेषां समासानां विग्रहवाक्यं, समासस्य नाम च लिखतु।

1. कृष्णार्जुनौ	2. काकोलूकम्
3. दन्तोष्ठम्	4. मालतीमाधवौ
5. वीणावेणुमृदङ्गम्	6. सैनिकहास्तिकम्
7. रूपरसगन्धस्पर्शाः	8. गङ्गायमुनासरस्वत्यः

अवरोहाभिक्रमः

(शृङ्खलाभिक्रमः)

अयमभिक्रमः भवतः पूर्वज्ञानस्य उपयोगेन साकं, नूतनं पररूपसन्धिमपि बोधयति।

निर्देशानुसारं रिक्तस्थानस्य पूरणं, प्रश्नस्य उत्तरं वा लिखतु। उत्तरलेखनात् परं, पृष्ठस्य अधोभागे दत्तमुत्तरं दृष्ट्वा तस्य साधुत्वं जानातु।

अभिक्रमपृष्ठम्-1

1. अकारान्तात् उपसर्गात् एङादौ धातौ परे पररूपम् एकादेशः स्यात्।

प्र + एजते = प्रेजते; उप + ओषति = उपोषति।

अभिक्रमपृष्ठम्-2

प्र, परा, अप, सम् इत्यादयः क्रियायोगे उपसर्गसंज्ञाः भवन्ति। प्रादयः द्वाविंशतिः सन्ति।

1. क्रियायोगे प्रादीनाम् -------- इति संज्ञा भवति।
2. प्रादयः कति सन्ति ? ---------

(1. उपसर्गः 2. द्वाविंशतिः)

अभिक्रमपृष्ठम्-3

अकारान्ताः उपसर्गाः चत्वारः सन्ति—प्र, अप, अव, उप।

'अप' इति अकारान्तः --------।

(उपसर्गः)

अभिक्रमपृष्ठम्-4

एकारस्य, ओकारस्य च एङ् इति संज्ञा।

एङादयः धातवः — एकारादयः धातवः — एजते, एषते, एखति, एटति इत्यादयः।

ओकारादयः धातवः—ओषति, ओखति, ओठति इत्यादयः।

1. एजते इति एकारादिः --------
2. ओषति इति ----------- धातुः।

(1. धातुः। 2. ओकारादिः।)

अभिक्रमपृष्ठम्-5

प्र + एषते इत्यत्र प्र इति इकारान्तः उपसर्गः। एषते इति एकारादिः धातुः। सन्धौ अकारस्य, एकारस्य च स्थाने पररूपे एकारे एकादेशे प्रेषते इति भवति।

अप + ओखति इत्यत्र अप इति ------- उपसर्गः।

ओखति इति --------- धातुः। सन्धौ अकारस्य, ओकारस्य च स्थाने पररूपे ओकारे एकादेशे -------- इति भवति।

(1. अकारान्तः 2. ओकारादिः 3. अपोखति)

अभिक्रमपृष्ठम्-6

अकारान्तात् उपसर्गात् एङादौ धातौ परे पररूपम् एकादेशः स्यात्। अयं पररूपसन्धिः इति उच्यते।

प्र + ओषति = प्रोषति। अव + ओषति = अवोषति

अप + एरवति = अपेरवति। उप + एटति = उपेटति।

--------- उपसर्गात् -------- धातौ परे पररूपम् एकादेशः स्यात्। अयं -------- सन्धिः इति उच्यते।

प्र + एजताम् = -------------

उप + ओषाञ्चकार = -------------

अकारान्तात् उपसर्गात् **एङादौ** धातौ परे पररूपम् एकादेशः स्यात्। अयं **पररूप** सन्धिः इति उच्यते।

प्र + एजताम् = **प्रेजताम्**।

उप + ओषाञ्चकार = **उपोषाञ्चकार**।

❖❖❖

चतुर्विंशोऽध्यायः

भाषाप्रयोगशाला

(Language Laboratory)

शैक्षिकप्रविधिशास्त्रे भाषाशिक्षणक्षेत्रे भाषाप्रयोगशाला नूतनशिक्षणसंविधानस्य अन्वेषणं भवति। एषा व्यावहारिकभाषायाः यथार्थस्वरूपं पुनः पुनः श्रोतुं छात्रेभ्यः अवसरं कल्पयति। भाषाध्ययने श्रवणभाषणकौशलयोः उत्पादनाय अत्यन्तमुपकरोति। दृश्यश्रव्ययन्त्राणां, प्रविधीनाञ्च उपयोगेन दीर्घकालं भाषायाः अभ्यसनं छात्राणां विनोदाय भवति। छात्रैः जामिता न अनुभूयते। अध्यापकस्य साह्येन निर्देशनेन च नूतनभाषायाः वैयक्तिकरूपेण अध्ययनम् अत्र सुकरं भवति।

भाषाप्रयोगशालायां समायोजितानि यन्त्रोपकरणानि नूतनभाषायाः वर्णानां, पदानां वाक्यानाञ्च उच्चारणस्य सम्यक् श्रवणाय उपकुर्वन्ति। अक्षराणाम् उच्चारणे स्वरस्तरः, वेगः, स्पष्टता, बलं (Intonation), समता (rithm) इत्यादीन् अवगन्तुं ध्वनिमुद्रिकाः (Audio tapes), ध्वनिमुद्रणयन्त्राणि (Tape recorders), शिरस्पट्टिकाः (Head sets), ध्वनिवर्धकानि (Micro-Phone) च आयोजितानि भवन्ति।

द्वितीयविश्वयुद्धस्य अनन्तरम् अमेरिकादेशे क्रिस्तोः परं 1957 संवत्सरे प्रथमतः भाषाप्रयोगशाला स्थापिता अभवत्। तदा त्रिशताधिकाः भाषाप्रयोगशालाः अनेकेषु प्रदेशेषु अनेकैः आयोजिताः अभवन्। क्रि.प. 1961 संवत्सरं यावत् त्रिसहस्राधिकाः भाषाप्रयोगशालाः संस्थापिताः आसन्। संयुक्तराज्येषु (U.K.) प्रथमतः क्रि.प. 1961 संवत्सरे भाषाप्रयोगशाला प्रतिष्ठापिता। क्रि.प. 1961 संवत्सरं यावत् तत्र एतासां संख्या 452 पर्यन्तं वर्धिता।

भाषाप्रयोगशालायाः आवश्यकता (Need for Language Laboratory)

भाषाशिक्षणाय एषा प्रयोगशाला अतीव उपकारिणी वर्तते। शाब्दिकशक्तयः

(Verbal abilities) प्रतिव्यक्ति भिन्नाः भवन्ति। छात्राणां भाषाकौशलानाम् अधिग्रहणसामर्थ्यमपि समानं न भवति। अत्र उच्चार्यमाणभाषायाः अनुरोधेन वर्णानां लिपिः निर्मीयते। अध्येतव्यायाः भाषायाः कुशलैः अध्यापकैः मातृभाषारूपेण वर्णानां, पदानां, वाक्यानाञ्च कृतम् उच्चारणम् ध्वनिमुद्रिकासु सङ्गृहीतम् अत्र आदर्शरूपेण उपयुज्यते। छात्राः ताः ध्वनिमुद्रिकाः पुनः पुनः श्रुत्वा उच्चारयन्ति। छात्राणाम् उच्चारणं ध्वनिमुद्रणयन्त्रेण गृह्यते। अध्यापकः तत् श्रुत्वा दोषान् निवार्य समीचीनम् उच्चारणं बोधयति। छात्रोऽपि स्वस्य उच्चारणं स्वयं श्रुत्वा, आदर्शोच्चारणेन साकं तुलनेन दोषान् अवबुध्य, पुनः पुनः अभ्यासेन उच्चारणकौशलं वर्धयति। एवं श्रवणकौशलं, भाषणकौशलञ्च सुष्ठु साधयितुं शक्यते। उच्चारणस्य शिक्षणाय अध्यापकस्य पुनः पुनः उच्चारणकार्यं परिहृतं भवति।

भाषाप्रयोगशालायां मौखिकीं भाषां श्रुत्वा, प्रतिक्रियां कर्तुं, ध्वनीनाम् अनुकरणेन अभ्यासं कर्तुं, दोषाणां निवारणेन सम्यक् भाषितुञ्च छात्रः समर्थो भवति। अश्रुतपूर्वायाः नूतनभाषायाः अध्ययनकार्ये छात्राणाम् उत्साहं संरक्षितुं, अध्यापकस्य क्लेशं परिहर्तुञ्च भाषाप्रयोगशाला नितराम् उपयुज्यते।

भाषाप्रयोगशालायाः कार्याणि (Functions of Language Laboratory)

भाषाप्रयोगशाला भाषायाः सञ्चारमाध्यमत्वेन विषयाणां, भावानाञ्च प्रसारणाय उपकरोति। भाषाबोधनेन छात्रान् भाषाकौशलेषु निपुणान् करोति। अन्यभाषामपि मातृभाषावत् वक्तुम्, अवगन्तुञ्च छात्राः समर्थाः भवन्ति। छात्राणां व्यक्तिगतवैविध्येन कक्ष्यायां जायमानाः समस्याः परिहर्तुं शक्यन्ते। तत्तद्भाषाभाषिणां प्रमुखानां जनानां भाषणस्य ध्वनिमुद्रिकाः श्रोतुं, तेषां भाषणस्य लिखितरूपं पठितुं, तान् द्रष्टुञ्च अत्र दृश्यश्रव्योपकरणानि प्रयुक्तानि सन्ति। श्रवणशिक्षणस्य अभ्यासाः (Audio drills), श्रुतभाषणाभ्यासाः (Audio-Lingual-Drills), श्रवणवाचनक्रियाः (Audio textual activities) अत्र समायोजिताः सन्ति।

क. भाषाप्रयोगशाला छात्रान् एवम् उपकरोति—

1. विभिन्नानां जनानाम् आदर्शभाषणानि ध्वनिमुद्रिकाद्वारा श्रोतुम् छात्रेभ्यः अवसरं कल्पयति।
2. छात्राः ध्वनिमुद्रिकां मध्ये स्थगयितुं, पुनः पुनः श्रोतुञ्च प्रभवन्ति।
3. छात्राः स्वेच्छया साधनानि चित्वा, स्वगत्या अध्येतुं शक्नुवन्ति।

ख. भाषाप्रयोगशाला अध्यापकान् इत्थम् उपकरोति—

1. अध्यापकः वैयक्तिकरूपेण छात्राणाम् अध्ययनकार्यं ज्ञात्वा, सहायितुं, बाधाः निवारयितुं, मार्गदर्शनं कर्तुञ्च प्रभवति।
2. एकस्य शिक्षणम्, अन्यस्य बाधाकरं न भवति।
3. अध्यापकः शिक्षणकार्यक्रमस्य निर्वहणेन समस्यानां नियन्त्रणेन च छात्राणाम् अध्ययनं निर्विघ्नं सम्पादयति।

व्यवस्थापनं, विनियोगश्च (Organisation and Utilisation)—

भाषाप्रयोगशालायाः कक्ष्यायां प्रत्येकं छात्राणाम् कृते एकैकं कोष्ठकं (Booth) व्यवस्थापितं भवति। प्रत्येकं कोष्ठकेषु श्रवणयन्त्रं (Ear phone), ध्वनिवर्धकयन्त्रं (Micro-phone), ध्वनिमुद्रणयन्त्रञ्च (Tape recorder) समायोजितं भवतिं। अत्र साधारणतया भाषाशिक्षणमेवं प्रचलति। यथा—

1. अध्यापकः प्रथमम् आदर्शध्वनिमुद्रिकां (Master Tape) श्रावयति।
2. सः शब्दः प्रत्येकं कोष्ठकेषु ध्वनिमुद्रणयन्त्रेण मुद्रितो भवति।
3. छात्राः यथापेक्षं तान् शब्दान् श्रुत्वा स्वयम् उच्चारयन्ति। स्वीयमुच्चारणं मुद्रयन्ति।
4. छात्राः आदर्शशब्दान्, स्वीयशब्दांश्च पुनः पुनः श्रुत्वा भेदम् अवगच्छन्ति।
5. ततः छात्राः सम्यगभ्यासं कृत्वा समीचीनमुच्चारणम् अधिगच्छन्ति।
6. उच्चारणकौशलप्राप्तिपर्यन्तम् एषा प्रक्रिया प्रचलति।
7. अध्यापकः छात्राणां मुद्रितमुंच्चारणं श्रुत्वा उचितान् उपायान् निर्दिशति।
8. एषा अभ्यासप्रक्रिया छात्राणां भाषाकौशलं यावत् आदर्शकौशलसदृशं न भवति, तावत् प्रवर्तते।

भाषाकौशलानां सम्पादनाय विभिन्नाः क्रियाः भवन्ति। एताः भाषाश्रवणप्रक्रियाः (Audio-Lingual) इति उच्यन्ते। अत्र छात्रः आदर्शध्वनिमुद्रिकायाः श्रवणेन तथैव उच्चारणं कुर्यात्। अनेन अभ्यासेन छात्रस्य स्वरः, स्पष्टता, वेगश्च वर्धते। अयमभ्यासः भाषाभ्यासः (Speech drill) इत्युच्यते। अत्र प्रथमतः विविधप्रकाराः शब्दाः, पदानि, पदबन्धाः, वाक्यानि च

ध्वनिमुद्रिकाद्वारा श्राव्यन्ते। ततः केषाञ्चित् प्रश्नानामुत्तराणि छात्रैः वक्तव्यानि। तदर्थं छात्राः पाठ्यपुस्तकं दृष्ट्वा वक्तुं शक्नुवन्ति। अभ्यासात् परं पुस्तकस्य आवश्यकता न भवति।

भाषाप्रयोगशालायां प्रयुक्ताः प्रक्रियाः (Procedures used in Language Laboratory)

1. प्रसारपद्धतिः (Broadcast Procedure)—अल्पव्ययेन साध्या पद्धतिरियम्। अध्यापकः केन्द्रस्थाने स्थित्वा कार्यक्रमं प्रसारयति। छात्राः शृण्वन्ति। अध्यापकः एव कार्यक्रमस्य निर्णयं करोति। छात्राणां तत्र स्वेच्छा नास्ति।

2. पाठागारस्य विनियोगः (Library Operation)—छात्राः केन्द्रस्थानात् स्वरुच्यनुसारं ध्वनिमुद्रिकाः स्वकोष्ठकं नीत्वा उपयुञ्जते। ताः मुद्रयित्वा अनेकवारं शृण्वन्ति। अभ्यासं कुर्वन्ति। यद्यपि अत्र धनव्ययः अधिको भवति, तथापि छात्राः स्वेच्छया, स्वरुच्यनुगुणम् अध्येतुं शक्नुवन्ति।

3. दूरवाण्या प्राप्तिः (Dial Access)—छात्रः सङ्केताङ्कद्वारा स्वयञ्चालितपद्धत्या कमपि कार्यक्रमं श्रोतुं शक्नोति। परन्तु ग्रन्थालयविनियोगपद्धत्यामिव कामपि ध्वनिमुद्रिकां मध्ये एव स्थगयितुं वा, कमपि भागं पुनः श्रोतुं वा न शक्नोति। एवं कोऽपि छात्रः सङ्केताङ्कद्वारा कमपि कार्यक्रमं प्राप्तुमर्हति।

4. संयोजनपद्धतिः (Combination System)—एषा काचित् प्रसारप्रयोगशाला भवति। अत्र छात्राणां कोष्ठकेषु ध्वनिमुद्रणयन्त्राणि, श्रवणयन्त्राणि च संयोजितानि भवन्ति। ग्रन्थालयविनियोगपद्धताविव ध्वनिमुद्रिकाः अन्य कार्यक्रमाश्च सङ्केताङ्कद्वारा प्राप्तुं शक्यन्ते। एवं भाषाप्रयोगशाला कार्यक्रमाणां प्रसारणाय उपयोक्तुं शक्यते।

भाषाप्रयोगशालायाः विशेषाः (Salient features or characteristics of Language Laboratory)—

1. आवृत्तिः (Retracing)—भाषाकौशलानि अभ्यासेनैव प्राप्तुं शक्यन्ते। अतः ध्वनीनामनुकरणम्, अभ्यासश्च उच्चारणकौशलप्राप्तौ प्रधानं भवतः। ध्वनिमुद्रिकायाः पुनः पुनः श्रवणाय, अनुकरणाय च अत्र आवृत्तिः कर्तुं शक्यते। भाषाप्रयोगशाला आवृत्तिं सम्पादयितुम् अवसरं कल्पयति।

2. **स्वगतिः** (Self pacing)—छात्रः स्वशक्त्यनुसारम् अल्पसमये तीव्रगत्या वा, अधिकसमये मन्दगत्या वा अभ्यासं कर्तुं शक्नोति। छात्राणां वैयक्तिकभेदानामाधोरण अधिगमे पूर्णता सम्पादयितुं शक्यते।

3. **साधनानां चयनस्य स्वातन्त्र्यम्** (Freedom in material selection)—समृद्धायां भाषाप्रयोगशालायां छात्राणाम् अध्ययनसाधनानां चयनस्य स्वातन्त्र्यं भवति। परन्तु यत्र परिमितानि साधनानि भवन्ति, तत्र तु उपलब्धैरेव साधनैः कार्यं सम्पादनीयं भवति।

4. **केन्द्रस्थानम्** (The console of central place)—छात्राणां नियन्त्रणाय, मार्गनिर्देशाय च केन्द्रस्थाने अनेकविधाः स्फिञ्चाः (Switches) भवन्ति। केन्द्रस्थाने वितरणस्फिञ्चाः (Distribution switches), व्यवस्थापनस्फिञ्चाः (Monitoring switches), अन्तर्गमस्फिञ्चाः (Intercum switches), समूहकोष्ठस्फिञ्चाः (Group-cell switches), सर्वकोष्ठस्फिञ्चाश्च (All cell switches) भवन्ति। केन्द्रस्थाने स्थितः अध्यापकः निर्णीतान् कार्यक्रमान् कोष्ठकेषु प्रसारयति। व्यक्तिगतरूपेण प्रत्येकं छात्रैः सम्बन्धं स्थापयति। छात्रस्य अभ्यासं ज्ञात्वा, निर्देशं ददाति। तस्य समस्यां ज्ञात्वा परिष्करोति। सर्वेभ्यः छात्रेभ्यः सामान्यनिर्देशान् ददाति। कार्यक्रमात् पृथक् सूचनाः प्रकटयति।

भाषाप्रयोगशालानां प्रकाराः (Types of Language Laboratory)—

1. **क. श्रवणव्यवस्था** (Audio System)—अस्यां भाषाप्रयोगशालायां केन्द्रस्थाने एकं ध्वनिमुद्रणयन्त्रं भवति। तच्च कोष्ठकेषु विद्यमानैः श्रवणयन्त्रैः संयोजितं भवति। केन्द्रस्थाने यदा ध्वनिमुद्रणयन्त्रद्वारा कोऽपि कार्यक्रमः श्राव्यते तदा छात्राः स्वकोष्ठकेषु श्रवणयन्त्रद्वारा तं कार्यक्रमं शृण्वन्ति।

2. **क-क. श्रवणव्यवस्था** (Audio-Active System)—एतादृश्यां भाषाप्रयोगशालायां केन्द्रस्थाने एकं ध्वनिमुद्रणयन्त्रं भवति। छात्राणां कोष्ठकेषु विद्यमानानि श्रवणयन्त्राणि तेन ध्वनिमुद्रणयन्त्रेण संयोजितानि भवन्ति। केन्द्रस्थाने ध्वनिमुद्रणयन्त्रद्वारा प्रसारितः कार्यक्रमः छात्रैः श्रोतुं शक्यते। छात्राणां कोष्ठकेषु विद्यमानानि ध्वनिवर्धकयन्त्राणि (Microphone) केन्द्रस्थानेन संयुक्तानि भवन्ति। तेन च छात्रैः कार्यक्रमं श्रुत्वा कृताः प्रतिक्रियाः केन्द्रस्थाने विद्यमानेन अध्यापकेन श्रोतुं शक्यन्ते। यथोचितं निर्देशैः पुनर्बलनं सम्पाद्यते।

3. क.क.ग. श्रवणव्यवस्था (Audio-Active Comparative System)—अस्यां भाषाप्रयोगशालायां केन्द्रस्थाने विद्यमानं ध्वनिमुद्रणयन्त्रं कोष्ठकेषु विद्यमानैः ध्वनिमुद्रणयन्त्रैः साकं संयोजितं भवति। छात्राणां ध्वनिमुद्रणयन्त्रेषु मार्गद्वयं भवति। मुख्यपट्टिकाद्वारा (Master Tape) पाठ्यकार्यक्रमं श्रोतुं मुख्यमार्गः (Maser Track) भवति। द्वितीयश्च मार्गः छात्राणां प्रतिक्रियाः मुद्रयित्वा पुनः श्रोतुम् उपयुज्यते। अस्मिन् संविधाने मुख्यमार्गः अपरिमार्जितः यथावत् तिष्ठति। मुख्यमार्गे उपलभ्यमानस्य पाठ्यविषयस्य अध्ययनाय, तेन साकं तुलनां कर्तुञ्च तस्य उपयोगः भवति।

4. क.क.ग.ग. श्रवणव्यवस्था (Audio-Active Comparative System with controls)—एतादृश्यां भाषाप्रयोगशालायां केन्द्रस्थाने विद्यमानः अध्यापकः दूरवाणीद्वारा कोष्ठकेषु विद्यमानैः प्रत्येकं छात्रैः साकं सम्पर्कं स्थापयितुं शक्नोति। छात्राणां प्रतिक्रियाः श्रुत्वा दोषनिराकरणाय मार्गनिर्देशं कर्तुमर्हति। अत्र मुख्यमार्गे परिमार्जयितुमशक्यानि उद्दीपनानि भवन्ति। छात्रः द्वितीये मार्गे स्वप्रतिक्रियाः यथेष्टं मुद्रयितुं, पुनः मुद्रयितुञ्च शक्नोति। छात्रः मुद्रिताः स्वप्रतिक्रियाः मुख्यमार्गे लब्धेन पाठ्यविषयेण साकं तुलयितुं प्रभवति। अस्मिन् संविधाने अध्यापकः छात्रैः सह वैयक्तिकं सम्बन्धं स्थापयित्वा, यथोचितं निर्देशैः तेषां स्तरानुसारं पाठयति, मार्गनिर्देशनं करोति, नियन्त्रयति च। छात्रोऽपि स्वगत्यनुसारम् अध्ययनं करोति। अतः एतत् संविधानं सर्वोत्तमं मन्यते।

भाषाप्रयोगशालायाः लाभाः (Advantages of Language Laboratory)—

1. छात्रः अध्येतव्यायाः भाषायाः निर्दुष्टं भाषणं सम्यक् पुनः पुनः श्रोतुं शक्नोति। या भाषा अध्येतव्या अस्ति, तस्यां भाषायां निष्णातानां शुद्धं, स्पष्टं, सुन्दरञ्च भाषणम् अत्र श्रोतुम् उपलभ्यते। अतः छात्रः यथार्थं, सहजं भाषणं श्रुत्वा भाषाम् अधीते।
2. छात्रः न केवलम् एकस्य अध्यापकस्यैव भाषणं, किन्तु अनेकेषाम्, अनेकाविधं भाषणं श्रोतुं शक्नोति।
3. छात्रस्य अभ्यासाय सम्भाषणस्य कालः क्रमेण संवर्ध्यते।
4. अन्ये स्वस्य सम्भाषणं न शृण्वन्ति इति कारणेन छात्रः सम्भाषणे लज्जां, भीतिं वा न अनुभवति।

5. अध्यापकस्य प्रोत्साहनेन, मार्गदर्शनेन च छात्रः सोत्साहं भाषाम् अधीते।
6. छात्रः स्वदोषान् स्वयम् अवगच्छतीति हेतोः स्वयमेव निवारयितुमपि शक्नोति।
7. अध्यापकः यदा एकस्य छात्रस्य मार्गदर्शनं करोति, तदा अन्येषां छात्राणाम् अध्ययनस्य विघ्नो न भवति।
8. अध्यापकस्य पारम्परिकरीत्या अध्यापनस्य विरसतापि न भवति।
9. अध्यापकः प्रत्येकं छात्रान् व्यक्तिगतरूपेण बोधयितुं समर्थो भवति।

भाषाप्रयोगशालायाः सीमाः (Limitations of Language Laboratory)—

1. विद्युद्यन्त्राणामुपयोगेन भाषाप्रयोगशालायाः निर्माणं क्लेशकरं, बहुव्ययसाध्यञ्च। भारतस्य आर्थिकस्थितिः तदर्थं समर्था नास्ति।
2. भाषाप्रयोगशालायाः निर्माणाय प्रविधिविशेषज्ञाः, भाषाशास्त्रविशेषज्ञाश्च अपेक्षिताः। तादृशाः कुशलाः भारते नोपलभ्यन्ते। भाषाप्रयोगशालायाः व्यवस्थायै, उपयोगाय च निपुणाः अध्यापकाः आवश्यकाः। तादृशाः प्रशिक्षिताः अध्यापकाः अपि नोपलभ्यन्ते।
3. अस्मिन् संविधाने छात्रः अन्यैः छात्रैः साकं सम्बन्धं विना वैयक्तिकम् अध्ययनं करोति। अतः छात्रेषु परस्परं स्नेहः, सहकारः, सहानुभूतिः इत्यादयो भावाः लुप्यन्ते। किञ्चित्कालान्तरं छात्राणाम् अध्ययने अभिरुचिः, आसक्तिश्च विनश्यति।
4. प्राचीनकाले समर्थानां गुरूणाम् उच्चारणम् अनुकरणयोग्यम् आसीत्। अधुना तादृशानां गुरूणाम् असुलभत्वात् भाषाप्रयोगशालायाः आवश्यकता अनुभूयते। तथापि अधिकव्ययसाध्यत्वात् विद्यालयेषु भाषाप्रयोगशालायाः स्थापनम् अशक्यम् अस्ति।
5. विद्यालयेषु, कलालयेषु, विश्वविद्यालेषु विभिन्नस्तरेषु, विभिन्नभाषाणाम् अध्यापनं प्रचलति। सर्वत्र भाषाप्रयोगशालानां स्थापनं दुष्करं भवति।

उपसंहारः (Conclusion)—

भाषाबोधने भाषाप्रयोगशाला विनूतनम् अन्वेषणं भवति। भाषाप्रयोगशालाद्वारा

भाषाया: विभिन्नकौशलानि छात्रा: स्वेच्छया, स्वगत्या प्राप्तुं शक्नुवन्ति। यद्यपि भाषाप्रयोगशालासु प्रधानतया श्रवणभाषणोपकरणान्येव प्रयुज्यन्ते, तथापि कानिचित् दृश्यचित्राण्यपि दृश्योपकरणैः प्रदर्श्यन्ते। तेन छात्राणां भाषाध्ययनसामर्थ्यं वर्धते। शब्दानामर्थज्ञानं स्पष्टं भवति। भाषाध्ययनं रुचिकरम्, उत्साहजनकञ्च भवति।

भाषाप्रयोगशालानां स्थापनम् अतिव्ययसाध्यं भवति, तथापि भाषाध्यापकैः अनया पद्धत्या भाषाशिक्षणं ज्ञातव्यम्। विद्यालयेषु भाषाध्यापकानां प्रशिक्षणाय भाषाप्रयोगशालानां व्यवस्था कर्तव्या।

नगरेषु प्रायः छात्राणां गृहेषु ध्वनिमुद्रणयन्त्राणि भवन्ति। ध्वनिमुद्रणयन्त्राणां (Tape recorders) साह्येन छात्राः आदर्शभाषणानि श्रोतुं तदनुकरणेन तान् शब्दान् पुनः पुनः वक्तुं, स्वीयमुच्चारणं मुद्रयित्वा आदर्शभाषणेन साकं तुलयितुञ्च शक्नुवन्ति। ततः स्वदोषान् ज्ञात्वा सम्यगभ्यसितुं प्रयत्नं करिष्यन्ति। अतः केचित् छात्राः अध्यापकस्य मार्गदर्शने स्वगृहे ध्वनिमुद्रणयन्त्रेण भाषायाः अभ्यासं कुर्युः। येषां गृहे ध्वनिमुद्रणयन्त्रं नास्ति, तेषां कृते सर्वकारस्य, समाजे आढ्यानां, जनप्रतिनिधीनाञ्च धनसाहाय्येन विद्यालये व्यवस्था कर्तव्या। कालक्रमेण एतानि अल्पमूल्येन लप्स्यन्ते। भारतस्य आर्थिकी स्थितिरपि उत्तमा भविष्यति। एवमस्माभिः शुभप्रत्याशया अनन्तरसन्ततेः उत्तमशिक्षायाः व्यवस्था कल्पनीया।

अधुना नगरेषु सर्वेषु विद्यालयेषु सङ्गणकयन्त्राणि स्थापितानि सन्ति। तत्रैव केषाञ्चित् यन्त्राणां संयोजनेन भाषाप्रयोगशालायाः कार्यं साधयितुं शक्यते।

संस्कृतभाषया निर्मितानां सान्द्रमुद्रिकाणाम् (C.D.) उपयोगेन संस्कृताध्यापकः संस्कृतभाषां सुष्ठु पाठयितुं समर्थः स्यात्।

❖❖❖

लेखक परिचय



नाम : **प्रो. चल्ला लक्ष्मीनारायण शर्मा**
शिक्षा : साहित्य-व्याकरणविद्याप्रवीणः (आन्ध्र)
भाषा प्रवीणः, एम.ए. (संस्कृतम्),
एम.एड., पी.एच.डी.
पितरौ : : श्रीराममूर्तिः, कमलम्मा
जन्म-स्थानम् : राजमहेन्द्रवरम्, पूर्वगोदावरीमण्डलम्,
आन्ध्रप्रदेशः।
जन्मतिथिः : 30.07.1955
वृत्तिः : आचार्यः, शिक्षक-प्रशिक्षण-विभागः, राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः), जयपुर परिसर, त्रिवेणी नगरम्,
जयपुरम्, राजस्थानम्
शिक्षणानुभवः : 1. विद्यालये पञ्चवर्षाणि, 2. महाविद्यालये द्वे वर्षे
3. शिक्षकप्रशिक्षणविभागे षड्विंशतिवर्षाणि
प्रकाशिताः ग्रन्थाः : 1. वाणीविहारः (कथाकवितानाटकसमाहारः), 2. सन्धिदर्शनम्,
3. संस्कृतशिक्षणम्, 4. धातुकोशः, 5. लिङ्गकोशः,
6. श्रीजगन्नाथचरितम्-काव्यम्, 7. श्रीजगन्नाथ-सुप्रभातम्,
8. कारकदीपिका



नाम : **डॉ. फतेहसिंहः**
शिक्षा : एम.ए. (संस्कृतम्), शिक्षाशास्त्री,
शिक्षाचार्यः (M.Ed.)
विद्यावारिधिः (Ph.D.) शिक्षा
पितरौ : : श्रीयादवदासः, श्रीमतीमामकौरदेवी
जन्म स्थानम् : ग्रामः-थलइनायतपुर, त.स्याना,
जिला-बुलन्दशहर, उ.प्र.
जन्मतिथिः : 20.01.1959
वृत्तिः : उपाचार्यः, शिक्षक-प्रशिक्षण-विभागः, राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः), जयपुर परिसर, त्रिवेणी नगरम्,
जयपुरम्, राजस्थानम्
शिक्षणानुभवः : 1. विद्यालये वर्षद्वयम्, 2. शिक्षकप्रशिक्षणविभागे एकविंशतिवर्षाणि
प्रकाशिताः ग्रन्थाः : 1. संस्कृतशिक्षणम् (संस्कृतमाध्यमेन)
2. दक्षिणभारते संस्कृतशिक्षणम् (संस्कृतमाध्यमेन)
3. शिक्षा-मनोविज्ञानम् (संस्कृतमाध्यमेन)
4. विद्यालयप्रशासनं सङ्घटनञ्च (संस्कृतेन अनुवादः)

Ideal Computer Centre • 9829028926